M-2689

शिर्षक	ग्रंथकार	विषय	विस्तार (पुर्ण/ अपूर्ण)	टिकाकार	आकार	पृष्ठे	लिपी	सामग्री	Lines per page	Letters per line	Condition & age (शके/विक्रम सवंत)	Additional Particulars / Remark
भागवद्गीताटीका	हरिदास	धर्मविचार	पुर्ण	हरिदास	~~१३१~~ 3/12	१९५	संस्कृत	कागद	12	41		

अथभगवद्गीताटीकाश्रीधरीप्रारंभः॥पत्रसंख्या॥९७॥७

श्रीगणेशायनमः शेषाशेषमुखव्याख्याचातुर्यंत्वेकवक्त्रतः दधानमद्भुतंवंदेपरमानंदमाधवं १ श्रीमा
धवंप्रणम्योमाधवंविश्वेशमादरात् तद्भक्तियंत्रितःकुर्वेगीताव्याख्यांसुबोधिनीम् २ भाष्यकारमतंसम्यक्तद्व्या
ख्यातृगिरस्तथा यथामतिसमालोच्यगीताव्याख्यांसमारभे ३ गीताव्याख्यायतेयस्याःपाठमात्रप्रयत्नतः
सेयंसुबोधिनीटीकासदासेव्यामनीषिभिः ४ इहखलुसकललोकवंदितचरणोविहितावतारःपरमकारुणिको
भगवान्देवकीसुतः तत्त्वज्ञानविजृंभितशोकमोहविभ्रंशितविवेकतयानिजधर्मत्यागपरधर्माभिसंधिपरमर्जुनंध
र्मज्ञानरहस्योपदेशप्लवेनतस्माच्छोकमोहसागरादुद्धार तमेवश्रीभगवदुपदिष्टमर्थंकृष्णद्वैपायनःसप्तभिःश्लोकश
तैरुपनिबबंध तत्रचप्रायशःश्रीकृष्णमुखान्निःसृतानेवश्लोकानलिखत् कांश्चित्तत्संगत्यर्थंस्वयमप्यरचयत् यथोक्तंगी
तामाहात्म्ये गीतासुगीताकर्त्तव्याकिमन्यैःशास्त्रविस्तरैः या स्वयंपद्मनाभस्यमुखपद्माद्विनिःसृतेति तत्रतावद्धर्म
क्षेत्रइत्यादिनाविषीदन्निदमब्रवीदित्यंतेनग्रंथेनश्रीकृष्णार्जुनसंवादप्रस्तावायकथानिरूप्यते शास्त्रारंभापेक्षितवि
षयसंबंधप्रयोजनाधिकारीस्त्वनुबंधश्चतुष्टयः तत्रतावद्विषयोमोक्षःप्रतिपाद्यप्रतिपादकलक्षणःसंबंधः अशेषानर्थ
रूपाज्ञाननिवृत्तिर्निरतिशयानंदावाप्तिः प्रयोजनंचतत्रइहामुत्रभोगविरक्तोधिकारी वस्त्वादौगुणरूपाभ्यांनामानिप्र
भवंतिहि नामतोवर्णतश्चैवरूपतःसन्नहीतिच ततःपरमासमाप्तेःतयोर्धर्मज्ञानार्थसंवादः तत्रधर्मक्षेत्रइत्यनेनश्लो

केन धृतराष्ट्रेण हस्तिनापुरस्थितं स्वसारथिं समीपस्थं संजयं प्रति कुरुक्षेत्रवृत्तांतं साक्षात्स्वस्यैन्निबध्य धृतराष्ट्राय निवेदयामास धर्मक्षेत्रे इत्या
दि हे संजय धर्मक्षेत्रे कुरुक्षेत्रे मत्पुत्राः दुर्योधनादयः अपरे पांडुपुत्राः पांडवाश्च युयुत्सवो योद्धुमिच्छवः समवेताः मिलिताः संतः किमकु
र्वत किं कृतवंतः संजय उवाच दृष्ट्वेति पुनस्तेषु मिलितेषु सत्सु राजा दुर्योधनः अनेकवीरसमुदायेलब्धदीप्तिर्दुःखेन योधयितुं शक्यः
दुर्योधनो राजा आचार्यं धनुर्वेदोपदेष्टारं द्रोणमुपसंगम्याधिकोनाचार्यत्वकृ नेन संगम्य संगतो भूत्वा द्रोणाचार्यसमीपं गत्वा वचनमनं
तरं वक्ष्यमाणवाक्यमब्रवीत् उवाच किं कृत्वा पांडवानीकं पांडवानां युधिष्ठिरादीनामनीकं सैन्यं व्यूढं चक्रादिव्यूहरचनया व्यवस्थितं

धृतराष्ट्र उवाच धर्मक्षेत्रे कुरुक्षेत्रे समवेता युयुत्सवः मामकाः पांडवाश्चैव किमकुर्वत
संजय १ संजय उवाच दृष्ट्वा तु पांडवानीकं व्यूढं दुर्योधनस्तदा आचार्यमुपसंगम्य राजा
वचनमब्रवीत् २ पश्यैतां पांडुपुत्राणामाचार्य महतीं चमूं व्यूढां द्रुपदपुत्रेण तव शिष्येण धीमता ३

संपन्ने दृष्ट्वावलोक्य दुर्योधनो द्रोणं प्रति यद्वचः अवोचत् तदेव नवभिः श्लोकैः संजयो धृतराष्ट्रं प्रति तदेव वचनमाह पश्यैतामिति हे आचार्य
पांडुपुत्राणां पांडवानामेतां महतीं चमूं सेनां समासाक्षोहिणीपरिमितां पश्यावलोकय कथंभूतां तव शिष्येण द्रुपदपुत्रेण धृष्टद्युम्नेन धीमता
तव शिष्यत्वेन सेनाव्यूहविन्यासादिबुद्धिमता व्यूढं व्यूहरचनया स्थापितां तव शिष्येणेति तवापि पांडवसेनायां कश्चिदनुरागोऽस्तीति कौटिल्य
वचनं दुर्योधनस्येति पांडुः पांडोर्धर्मस्त्त पुत्राज्ञोरपुत्रा इति साभिप्रायवचनं दुर्योधनस्य ३ अत्रेति अत्रास्यां चम्वां अमी शूराः शौर्ययुक्ताः क्षात्रध

र्गुणोपेता महेष्वासाः इषवो बाणा अस्यंते क्षिप्यंते यैरिति इष्वासा धनूंषि महांत इष्वासा येषां ते महेष्वासाः युधि संग्रामे भीमार्जुनसमाः भीमो भियाभ
येन भीयते चकितैरेव वीरांतरैर्विलोक्यते इति भीमः अर्जुनः पशुपतिसंग्रामोपार्जितयशोविभ्रमनिभिः स्वकैः पांडुरं संपादितं विश्वं येन स तथा परमार्जुनः
तौ भीमार्जुनौ अत्राति प्रसिद्धौ योद्धारौ ताभ्यां तुल्याः समाः शूराः संति तानेव नामभिर्निर्दिशति युयुधानः सात्यकिः वीरिवरैरेव गमिश्रीभावेन
युद्धाविष्टः युधिमिश्रण इति धातुपाठात् विगतो विपक्षभूतो राट् राजा यस्य शत्रुस्वदेशस्य स विराटः द्रुपदस्तु संग्रामे निश्चलौ पादौ यस्य
स द्रुपदः महारथः प्रत्येकं महारथत्वविशेषणं ४ धृष्टकेतुरिति धृष्टः प्रगल्भः शत्रुत्रासनः केतुश्चिन्हं ध्वजादिर्यस्य धृष्टानां रणे प्रगल्भानां

अत्र शूरा महेष्वासा भीमार्जुनसमा युधि युयुधानो विराटश्च द्रुपदश्च महारथः ४
धृष्टकेतुश्चेकितानः काशिराजश्च वीर्यवान् पुरुजित्कुंतिभोजश्च शैब्यश्च नरपुंगवः ५
युधामन्युश्च विक्रांत उत्तमौजाश्च वीर्यवान् सौभद्रो द्रौपदेयाश्च सर्व एव महारथाः ६

केतुर्विनाशक इति वा धृष्टकेतुश्चेकितानः संग्रामकुशलः चेकितानो नामैको राजा च काशिराजः काशेः प्रकाशनत्व प्रकाशनाय स्यां निवसनः सकलभः
सा काशी तस्याः राजा सः वैरिपुरविजयी शैब्यः संग्रामविजयार्हः नरपुंगवो नरश्रेष्ठः ५ युधामन्युश्च परं विक्रांतो वीर्यवान् उत्तमौजाः सौभद्रोऽभि
मन्युरपरे द्रौपदेयाः द्रौपद्यास्तनयाः अथवा विक्रांतो युधामन्युर्नामैकः सः द्रौपदेयः द्रौपद्यां पंचभ्यो युधिष्ठिरादिभ्यो जाताः प्रतिविंध्यादयः
पंच एते सर्वे महारथा एवं महायुद्धोत्साचायआसमंतात् रथः शस्त्राभ्यासादिसंभृतो येषां ते महारथादीनां लक्षणं ७ एको दशसहस्राणि योधयेद्यस्तु
धन्विनां अस्त्रशस्त्रप्रवीणश्च महारथ इति स्मृतः अमितान्योधयेद्यस्तु संप्राप्तोतिरथस्तु सः रथेनैकेन यो युद्धेत्तन्न्यूनोऽर्द्धरथो मत इति ६

अस्माकमिति हे द्विजोत्तम तु पुनः ये अस्माकं धार्त्तराष्ट्राणां विशिष्टाः पांडवसेनावीरेभ्योपि श्रेष्ठास्तान्निबोधावधारय मम सैन्यस्य ये नायका नेता
रस्तान्नेतुभ्यं संज्ञानार्थं सम्यक् ज्ञानार्थं ब्रवीमीत्यर्थः ७ तानेवाह भवानिति द्वाभ्यां भगवान् त्वमेव तावत् यस्य तव गुरुद्रोणस्योपदेशेन भगवान्
पशुपतिरप्यर्जुनेन निर्जितः स त्वं द्रोणः भीष्मः सकलक्षत्रक्षयकारिचक्रकुतूहललीलावतारपरशुरामस्यापि दुर्णिवार्यभयंकरस्तादृग्भीष्मः कर्णः वैरिवृंदकर्त्तना
त्कर्णः कृपः शत्रुवृंदे सनकृपालुः कृपालुः द्वेषार्थः समितिसंग्रामं जयतीति समितिंजयः अश्नुते व्याप्नोति अश्मानि वैरिणो भक्षयतीति वा अथवा अभिघाति
यं गच्छतीति येन स्थाम्ना बलेन तत् अश्वत्थप्रत्ययांतो वाम्बप्रत्ययः तत्तादृशं सकललोकोपसंहारदक्षस्य रुद्रस्यापनीपते लीलावतारदत्वम्बत्थामा यस्मा

अस्माकं तु विशिष्टा ये तान्निबोध द्विजोत्तम । नायका मम सैन्यस्य संज्ञार्थं तान्ब्रवीमि ते ॥ ७ ॥
भवान्भीष्मश्च कर्णश्च कृपश्च समितिंजयः । अश्वत्थामा विकर्णश्च सौमदत्तिस्तथैव च ॥ ८ ॥
अन्ये च बहवः शूरा मदर्थे त्यक्तजीविताः । नानाशस्त्रप्रहरणाः सर्वे युद्धविशारदाः ॥ ९ ॥

त् यस्य समानवीरसंग्रामोपार्जितकीर्त्तिमंजरीवर्णनायां प्रत्यर्थिनः पार्थिवा विगतकर्णा बधिरा इव हे द्विज भवंतीति विकर्णः पार्वती
पतिवरः सोमदत्तः तस्य पुत्रः सौमदत्तिः भूरिश्रवास्तथैव च एवं भवान्भीष्मश्चेत्येको कः पराजयक्षमो न तथैवेतरेपीत्यर्थः ८
अन्ये चेति अपरे अन्ये सहायत्वेन मया आहूता भगदत्तेशप्रभृतयः बहवः शूराः मदर्थे मत्प्रयोजनार्थं मम विजयसाधनार्थं वा त्यक्तजीवि
ताः जीवनं त्यक्तुं अध्यवसिता इत्यर्थः नानाविधान्यनेकानि शस्त्राणि प्रहरणसाधनानि येषां ते युद्धे विशारदा निपुणा इत्यर्थः ९
ततः किमित्यत आह अपर्याप्तमिति तत्तथाभूतैर्वीरैर्युक्तमपि भीष्मेणाभिरक्षितमपि अस्माकं बलं सैन्यमपर्याप्तं तैः सह योद्धुम्

भ० गी० टी०

२

समर्थं भाति इदं तु एतेषां पांडवानां बलं भीमेनाभिरक्षितं सत् पर्याप्तं समर्थं भाति तथा सैन्यद्वयपरिकथनस्य प्रयोजनमाह तत्र पांडवानां बलं सैन्यं भीमेन सेनापतिना रक्षितमस्माकं बलं पुनरेतेषां पांडवानां भीमाभिरक्षितं बलं प्रतिपर्याप्तं भीमस्यैकस्य प्रतिपूर्णसंख्यया सामर्थ्येन च इदं तु अस्माकं बलं पुनरेतेषां पांडवानां भीमाभिरक्षितं बलं प्रति योजना तदा भीष्ममेवाभिरक्षंत्विति स्यादिसंगतं स्यात् तथा च भाष्यांतरे भीमस्यैकपक्षपातित्वादेतेषां बलं समर्थं भाति भीष्मस्योभयपक्षित्वादस्माकं तु बलमसमर्थं भातीति दुर्योधनस्याभिप्रायः १० तस्माद्भवद्भिरेवं वर्तितव्यमित्याह अयनेष्विति हि यस्मात् सर्वे एव भवंतो यूयं वी-

अपर्याप्तं तदस्माकं बलं भीष्माभिरक्षितं पर्याप्तं त्विदमेतेषां बलं भीमाभिरक्षितं १०
अयनेषु च सर्वेषु यथाभागमवस्थिताः भीष्ममेवाभिरक्षंतु भवंतः सर्व एव हि ११
तस्य संजनयन् हर्षं कुरुवृद्धः पितामहः सिंहनादं विनद्योच्चैः शंखं दध्मौ प्रतापवान् १२

रा भवंतो वा वीराः सर्वेषु समस्तप्रकारेषु अयनेषु मार्गेषु गोमूत्रिकादिव्यूहरूपेषु यथाभागं व्यूहभागमनतिक्रम्य विभक्तां स्वां स्वां रणभूमिमपरित्यज्यावस्थिता वर्तमानाः संतो भीष्ममेव सेनानायकमभितः सर्वतो रक्षंतु स्वव्यूहाद्दूरस्थायाविपालयंतु यथान्यैर्युध्यमानः पृष्ठतः केनचिन्न हन्येत तथा रक्षंतु भीष्मबलेनास्माकं जीवनमिति भावः ११ एवं पांडवव्यूहदर्शनाद्विस्मयाविष्टस्य भीत्या संत्रस्तस्य राज्ञो दुर्योधनस्य वचनं श्रुत्वा भीष्मः किं कृतवानित्यत आह तस्येति कुरुवृद्धः पितामहो गांगेयः तस्य द्रोणं प्रति निरूपणं कुर्वतो दुर्योधनस्य राज्ञो हर्षं प्रीतिं संजनयन् कुर्वन् उच्चैर्महांतं सिंहनादं

विनद्य ... उच्चैः सिंहनादं कृत्वा ... इत्यर्थः
शंखं दध्मौ प्रतापवान् १२

श्रीः

३

तदेवं सेनापतेर्भीष्मस्य युद्धोत्सवमालक्ष्य सर्वतो युद्धोत्सवः प्रवृत्त इत्याह ततइति ततो भीष्मस्य शंखपूरणानंतरं शंखाश्चापरं भेर्यः
पणवानकगोमुखाः सहसैव युगपदेवैकस्मिन्काले तत्क्षणेवाभ्यहन्यंत ताः स्फालिता वादिताः सर्वे शंखादिशब्दः तुमुलो महान् ।कु
वलौ विवेचनायायोभवत् पणवा आनकाः गोमुखा इत्याद्या वाद्यविशेषाः १३ ततः पांडवसैन्ये प्रवृत्तं युद्धोत्सवमाह ततइतिपंच
भिः ततो दुर्योधनसैन्यवाद्यकोलाहलानंतरं श्वेतैः शुभ्रैः केवलसाश्ववह्निरथवरकल्पैः स्वसैन्योत्कर्षतन्नकरणसामर्थ्यबद्धिर्वा हयैः रतिवेगाति
रेकात् सभावतोवह्निआकाशेयातीति हयाविशिष्टअश्वा तैर्युक्ते संयोजिते महत्यादित्यमंडलकल्पे पृथ्वे संग्रामभूमिप्रद्रवणशीलेरथवरे स्थितौ

ततः शंखाश्च भेर्यश्च पणवानकगोमुखाः सहसैवाभ्यहन्यंत स शब्दस्तुमुलोभवत् १३
ततः श्वेतैर्हयैर्युक्ते महति स्यंदने स्थितौ माधवः पांडवश्चैव दिव्यौ शंखौ प्रदध्मतुः १४
पांचजन्यं हृषीकेशो देवदत्तं धनंजयः पौंड्रं दध्मौ महाशंखं भीमकर्मा वृकोदरः १५
अनंतविजयं राजा कुंतीपुत्रो युधिष्ठिरः नकुलः सहदेवश्च सुघोषमणिपुष्पकौ १६

वर्तमानो मायालक्ष्म्याधवः पतिः कृष्णः पांडवश्चापि दिव्यौ दिविभवौ अप्राकृतौ शंखौ प्रदध्मतुराहूरितवंतौ १४ तदेव विभागेन प्रदर्शयन्नाह
पांचजन्यमिति हृषीकाणामिंद्रियाणामीशोधिष्ठाता [illegible] देवो भगवान् श्रीविष्णुः पांचजन्यं पंचजने दैत्ये देहोद्भवं धनंजयो देवदत्तं वृकोदरो
भीमं कर्म यस्य स भीमकर्मा महाशंखं पौंड्रं धध्मौ आपूरितवान् १५ अनंतविजयमिति युग्मं द्वौ श्लोकौ कर्तृक्रियासंबध्यते कुंतीपुत्रो युधिष्ठिरो राजा
पांडवानां स्वामी अनंतविजयं शंखं दध्मौ यस्य शंखस्याहरणादनंतं संततो विजयो भवतीति अनंतविजयः तेन कुलः सुघोषनामकं शंखं प्रदध्मौ सहदेवो मणिपु

५

भ०गी०टी०

४

काश्यश्चेति चापरं काश्यः काशिराजः परमउत्कृष्टः इष्वासो धनुर्यस्य स परमेष्वासः च पुनः शिखंडी महारथः शिखंडवान् सकल सुरासुराजय्य
भीष्मवधार्थमुत्पन्नः पौरुषेय शिखासुतश्चापरं धृष्टद्युम्नश्च विराटश्च सात्यकिः स एवापराजितः अजेयः एते सर्वे पृथक् पृथक् शंखान्दध्मुः
वादयांचक्रुः इति परेण संबंधः १७ द्रुपद इति हे पृथिवीपते धृतराष्ट्र द्रुपदश्चान्ये द्रौपदेयाः द्रौपदीपुत्राः चापरं महाबाहुः सौभद्रः एते सर्वे
पृथक् पृथक् शंखान्दध्मुः १८ तस्य शंखनादस्य धार्त्तराष्ट्रान्प्रति भयजनकत्वं संजय आह स घोष इति स घोषः तुमुलो घोरः पांडवसे
नापतीनां शंखादि घोषो धार्त्तराष्ट्राणां त्वदीयानां हृदयानि व्यदारयत् विदारितवान् किं कुर्वन् नभश्चाकाशं पृथिवीं च व्यनुनादयन्

काश्यश्च परमेष्वासः शिखंडी च महारथः धृष्टद्युम्नो विराटश्च सात्यकिश्चापराजितः १७ द्रुपदो द्रौपदेयाश्च स
र्वशः पृथिवीपते सौभद्रश्च महाबाहुः शंखान्दध्मुः पृथक् पृथक् १८ स घोषो धार्त्तराष्ट्राणां हृदयानि व्यदारयत्
नभश्च पृथिवीं चैव तुमुलो व्यनुनादयन् १९ अथ व्यवस्थितान्दृष्ट्वा धार्त्तराष्ट्रान्कपिध्वजः प्रवृत्ते शस्त्रसंपाते ध
नुरुद्यम्य पांडवः २० हृषीकेशं तदा वाक्यमिदमाह महीपते सेनयोरुभयोर्मध्ये रथं स्थापय मेऽच्युत २१

प्रतिशब्दं कारयन् प्रतिध्वनिभिरापूरयन्नित्यर्थः १९ एतस्मिन्समये श्रीकृष्णमर्जुनो विज्ञापयामास तच्चतुर्भिः श्लोकैः संजय आह अ
थेति अथ शंखपूरणानंतरं कपिध्वजः व्यवस्थितान् युद्धोद्योगेन स्थितान् विशेषेण उत्साहेनावस्थितान् स्वशंखनादात् घोरतरादपि अ
परिभूतान् धार्त्तराष्ट्रान् दृष्ट्वा शस्त्रसंपाते उत्साहफले च धार्त्तराष्ट्राणां प्रवृत्ते सति धनुरुद्यम्य सज्जीकृत्य २० हृषीकेशमिति हे म
हीपते हृषीकेशमिदं वाक्यमाह किमिति हे अच्युत मे रथमुभयोः सेनयोः मध्ये स्थापय २१ श्रीगोपालकृष्णायनमः ७७

श्रीः

४

यावदिति अहमेतान्प्रधानवीरान्योद्धुकामानवस्थितान्यावन्निरीक्षे सम्यक्परीक्षां करोमि न तु त्वं योद्धा न तु युद्धप्रेक्षक इत्याह केरिति अस्मिन्रणसमुद्यमे मया कैः सह योद्धव्यमित्यर्थः २२ योत्स्यमानानिति अहं योत्स्यमानानवेक्षे युद्धं करिष्यतः अवेक्षे निरीक्षे य इमे य एते अत्र समागता दुर्बुद्धेरविचारकारिणो धार्तराष्ट्रस्य दुर्योधनस्य युद्धे युद्धस्थले प्रियं चिकीर्षवः प्रियं विजयं कर्तुकामाः समागताः प्राणलोभातिरेकेण सम्यग्वीरोचितसमारंभेण आगताः ते अप्यविचारकारिण इत्यर्थः तान्यावदहं पश्यामि तावदुभयोर्मध्ये रथं स्थापयेत्यन्वयः २३ ततः किं वृत्तमित्यपेक्षायां संजय उवाच एवमिति युग्मं हे भारत धृतराष्ट्र गुडाका निद्रा तस्या ईशेन जितनिद्रेणार्जुनेन

यावदेतान्निरीक्षेऽहं योद्धुकामानवस्थितान् कैर्मया सह योद्धव्यमस्मिन्रणसमुद्यमे २२ योत्स्यमानानवेक्षेऽहं य एतेऽत्र समागताः धार्तराष्ट्रस्य दुर्बुद्धेर्युद्धे प्रियचिकीर्षवः २३ संजय उवाच एवमुक्तो हृषीकेशो गुडाकेशेन भारत सेनयोरुभयोर्मध्ये स्थापयित्वा रथोत्तमं २४ भीष्मद्रोणप्रमुखतः सर्वेषां च महीक्षितां उवाच पार्थ पश्यैतान्समवेतान्कुरूनिति २५ तत्रापश्यत्स्थितान्पार्थः पितॄनथ पितामहान् आचार्यान्मातुलान्भ्रातॄन्पुत्रान्पौत्रान्सखींस्तथा

नभीष्मद्रोणयोः प्रमुखतः अग्रे द्रोणः द्राक्कुत्सात याञ्जनोः रक्षित इति द्रोणस्तथा सर्वेषां च महीक्षितां भूमंडलाध्यक्षाणां राज्ञां योधवीराणां मध्ये इत्युवाच इतीति किं हे पार्थ एतान्समवेतान्द्रष्टुमभीष्टान् कुरून्पश्येत्युवाच २५ ततः किं वृत्तमित्यत आह तत्रेति अथानंतरं पार्थोऽर्जुनः तत्रोभयोः सेनयोरपि स्थितान्पितॄन्यान्ति बंति पिबंति लालयंति तर्पयंति चापत्यानीति पितरः तान् पितॄन् अत्र च पितृकल्पाः पितृव्यादयः पितृव्यानीत्यर्थः पितामहान् गांगेयादीन् आचार्यान्द्रोणादीन् मात्रा जनन्या साम्यं येषां ते मातुलास्तान् भ्रातॄन्

भ०गी०टी०
५

सोदरान्पुत्रान्पुन्नाम्नो नरकात्पितॄणां त्राणात्पुत्राः तत्पुत्राः पौत्रास्तान्दुर्योधनादीनां ये मित्राणि सुहृदः कृतोपकारा[illegible]पश्यत् २६ त
थाश्वशुरानितिच पुनः श्वशुरान्सुहृदश्चापश्यत् ततः किं कृतवानित्यत आह तानिति स कौंतेयः अर्जुनः सर्वान्विशेषेण बंधनात् बध्नंति
परस्परं स्नेहपाशैः इति बंधवस्तानवस्थितान्समीक्ष्य २७ कृपया करुणया परयातिशयया आविष्टः व्याप्तः पुनः विषीदन् विशेषेण सी
दन् अवसादं ग्लानिं लभमानः इदमनंतरमुच्यमानमब्रवीत् २८ किमब्रवीदित्यपेक्षायामाह दृष्ट्वेममित्यादि यावदध्यायपरिसमा
प्ति हे कृष्ण भक्तानां क्लेशविलेखनात् विनाशनात् कृष्ण इमं स्वजनं युयुत्सुं योद्धुमिच्छंतं पुरतः सम्यगवस्थितं बंधुजनं दृष्ट्वा मदीयानि गात्राणि करच

श्वशुरान्सुहृदश्चैव सेनयोरुभयोरपि तान्समीक्ष्य स कौंतेयः सर्वान्बंधूनवस्थितान् २७ कृपया परयावि
ष्टो विषीदन्निदमब्रवीत् २८ अर्जुन उवाच दृष्ट्वेमं स्वजनं कृष्ण युयुत्सुं समुपस्थितं सीदंति मम गात्राणि मुखं
च परिशुष्यति २९ वेपथुश्च शरीरे मे रोमहर्षश्च जायते गांडीवं स्रंसते हस्तात्त्वक्चैव परिदह्यते ३० न च श
क्नोम्यवस्थातुं भ्रमतीव च मे मनः निमित्तानि च पश्यामि विपरीतानि केशव ३१ ५ ॥ ५ ॥ ५ ॥ ५

रणादीन्यंगानि सीदंति विशीर्णानि शिथिलान्यतिसंहानि भवंतीति विशीर्यंत इत्यर्थः च पुनः मुखं परितः समंतात् शुष्यति निर्द्रवीभवतीति २९
किंच वेपथुरिति मे मम शरीरे वेपथुः कंपस्तथा रोमहर्षो रोमांचश्च जायते गांडीवमिति मे मम गांडीवं स्रंसते अधः पतति त्वक्चैव परिदह्यते आंतर
शोकज्वलनेन सर्वतः संतप्यते चापरं मे मनः कर्तव्याकर्तव्यबोधसाधनमंतःकरणं भ्रमतीव भ्रमं गच्छति किंच [illegible]रणे कर्तुं न शक्नोमि निमित्तानीति
हे केशव विपरीतानि अनिष्टसूचकानि निमित्तानि आविरनिष्टसूचकानि चिह्नानि शकुनानि पश्यामि ३१ ५ ॥ श्रीगोपालकृष्णायनमः ५

श्रीः
५

ननु

किंचनचेति स्वजनं आहवे युद्धे हत्वा श्रेयः फलं न पश्यामि विजयादिकं फलं किं न पश्यसीति चेत् तत्राह न कांक्ष इति एतदेव प्रपंचयति किं न इति सार्द्धाभ्यां ३३ त इति यदर्थमस्माकं राज्यादिकमपेक्षितं त एते प्राणान्धनानि च त्यक्त्वा त्यागमंगीकृत्य युद्धार्थमवस्थिताः अतः किमस्माकं राज्यादिभिः कृत्यमित्यर्थः ३४ ननु यदि कृपया त्वमेतान्न हंसि तर्हि त्वामेते राज्यलोभेन हनिष्यंत्येव अतस्त्वमेवैतान्हत्वा राज्यं भुंक्ष्वेत्यत आह सार्द्धेन एतानिति घ्नतोपि अस्मान्घातयतोप्येतान्त्रैलोक्यराज्यस्यापि हेतोः तत्प्राप्त्यर्थमपि न हंतुमिच्छामि किं पुनर्महीमात्रप्राप्त्यर्थमित्यर्थः ३५

न च श्रेयोऽनुपश्यामि हत्वा स्वजनमाहवे न कांक्षे विजयं कृष्ण न च राज्यं सुखानि च ३२ किं नो राज्येन गोविंद
किं भोगैर्जीवितेन वा येषामर्थे कांक्षितं नो राज्यं भोगाः सुखानि च ३३ त इमेऽवस्थिता युद्धे प्राणांस्त्यक्त्वा ध
नानि च आचार्याः पितरः पुत्रास्तथैव च पितामहाः ३४ मातुलाः श्वशुराः पौत्राः श्यालाः संबंधिनस्तथा
एतान्न हंतुमिच्छामि घ्नतोपि मधुसूदन ३५ अपि त्रैलोक्यराज्यस्य हेतोः किं नु महीकृते निहत्य धार्तराष्ट्रान्नः
का प्रीतिः स्याज्जनार्दन ३६ पापमेवाश्रयेदस्मान्हत्वैतानाततायिनः तस्मान्नार्हा वयं हंतुं धार्तराष्ट्रान्स्वबांधव

ननु च अग्निदो गरदश्चैव शस्त्रपाणिर्धनापहः क्षेत्रदारापहारी च षडेते आततायिनः इति स्मरणात् अग्निदत्वादिभिः षड्भिरपि हेतुभिरेते आततायिनः आततायिनां च वधो युक्त एव आततायिनमायांतं हन्यादेवाविचारयन् नाततायिवधे दोषो हंतुर्भवति कश्चनेति वचनात् तत्राह सार्द्धेन पापमिति आततायिनमायांतमित्यादि अर्थशास्त्रं हि तद्धर्मशास्त्रात् दुर्बलं यथोक्तं याज्ञवल्क्येन स्मृत्योर्विरोधे न्यायस्तु बलवान्व्यवहारतः अर्थशास्त्रात्तु बलवद्धर्मशास्त्रमिति स्थितिः तस्मादाततायिनामप्येतेषामाचार्यादीनां वधे अस्माकं पापमेव भवेत् अन्याय्यत्वादधर्मत्वाच्चेति हृदयम् ३६

हे माधव यस्मात्स्वजनं हत्वा वयं सुखिनः कथं स्याम दोष

नचैतत्कर्त्तव्यं स्यादित्याह स्वजनं हीति ननु तवैतेषामपि बंधुवधे समाने सति तथैवैते बंधुवधमंगीकृत्य बंधुवधे प्रवर्त्तन्ते तथैव भवान
पि प्रवर्त्ततां किमनेन विषादेनेत्यत आह द्वाभ्यां यद्यपीति राज्यलोभेनोपहतं भ्रष्टविवेकं चेतो येषां त एते दुर्योधनादयो यद्यपि दोषं न
पश्यंति तथाप्यस्माभिर्दोषं प्रपश्यद्भिरस्मात्पापान्निवर्त्तितुं कथं न ज्ञेयं निवृत्तावेव बुद्धिः कर्त्तव्येत्यर्थः ३९ तमेव दोषं दर्शयति कु

हे जनार्दन

स्वजनं हि कथं हत्वा सुखिनः स्याम माधव यद्यप्येते न पश्यंति लोभोपहतचेतसः ३८ कुलक्षयकृतं दो
षं मित्रद्रोहे च पातकं कथं न ज्ञेयमस्माभिः पापादस्मान्निवर्त्तितुं ३९ कुलक्षयकृतं दोषं प्रपश्यद्भिर्जना
र्दन कुलक्षये प्रणश्यंति कुलधर्माः सनातनाः ४० धर्मे नष्टे कुलं कृत्स्नमधर्मोभिभवत्युत अधर्माभि
भवात्कृष्ण प्रदुष्यंति कुलस्त्रियः ४१ स्त्रीषु दुष्टासु वार्ष्णेय जायते वर्णसंकरः संकरो नरकायैव कुलघ्ना
नां कुलस्य च ४२ पतंति पितरो ह्येषां लुप्तपिंडोदकक्रियाः दोषैरेतैः कुलघ्नानां वर्णसंकरकारकैः ४३
उत्साद्यंते जातिधर्माः कुलधर्माश्च शाश्वताः उत्सन्नकुलधर्माणां मनुष्याणां जनार्दन ४४ ६ ६

लक्षय इति सनातनाः परंपराप्राप्ताः ३९ ततश्च किं कृत्स्नमवशिष्टमपि कुलं अधर्मोऽभिभवति व्याप्नोतीति ततश्च अधर्माभिभवादिति ४०
एवं च सति संकर इति एषां कुलघ्नानां पितरः पतंति हि यस्मात् लुप्ता पिंडोदकक्रिया येषां ते ४१ उक्तदोषमुपसंहरति द्वाभ्यां दोषैरेतैरिति उत्सा
द्यंते लुप्यंते जातिधर्माः वर्णधर्माः कुलधर्माश्च चकारादाश्रमधर्मादयोपि गृह्यंते ४२ उत्सन्नेति उत्सन्नाः कुलधर्मा येषां ते उत्सन्नजातिधर्मा
दीनां अप्युपलक्षणम् अनंतमशुतं वर्णे नावयं प्रायश्चित्तमकुर्वाणाः पापेषु निरता नराः अप्रायश्चित्तिनः कश्चाद्रिरयान्यांति दारुणान्नित्यादिवचनेभ्यः
४३

श्रीः

६

वंधुवधव्यवसायेन संतप्यमान आह अहो इति स्वजनं हंतुं उद्यताः इति यत् एतत् महत्पापं कर्तुं अध्यवसायं कृतवंतो वयं अ
हो बत कष्टमित्यर्थः ४५ एवं संतप्तः सन् मृत्युमेवाशंसान आह यदीति अकृतप्रतीकारं तूष्णीमुपविष्टं मां यदि हनिष्यं

यदि शस्त्रपाणयः धार्तराष्ट्राः अशस्त्रं

नरके नियतं वासो भवतीत्यनुशुश्रुम अहो बत महत्पापं कर्तुं व्यवसिता वयं यद्राज्यसुख
लोभेन हंतुं स्वजनमुद्यताः ४५ यदि मामप्रतीकारमशस्त्रं शस्त्रपाणयः धार्तराष्ट्रा रणे
हन्युस्तन्मे क्षेमतरं भवेत् ४६ संजय उवाच एवमुक्त्वार्जुनः संख्ये रथोपस्थ उपाविशत्
विसृज्य सशरं चापं शोकसंविग्नमानसः ४७ इति महाभारते शतसाहस्र्यां वैयासिक्यां सं
हितायां भीष्मपर्वणि श्रीभगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे
अर्जुनविषादो नाम प्रथमोऽध्यायः १ ॥

ति तर्हि तद्धननं मम क्षेमतरं अत्यंतहितं भवेत् पापानिष्पत्तेः ४६ ततः किं वृत्तमित्यपेक्षायां संजय आह एवमिति संख्ये संग्रा
मे रथोपस्थे रथोपरि उपाविशत् उपविवेश शोकेन संविग्नं मानसं चित्तं यस्य सः ४७ इति गीताटीकायां सुबोधिन्यां प्रथमोऽध्यायः १

भ०गी०टी०

१०

ततः किं वृत्तमित्यपेक्षायां संजय आह तं तथेति अश्रुभिः पूर्णे आकुले ईक्षणे यस्य तं तथा उक्तप्रकारेण विषीदन्तमर्जुनं प्रति मधुसूदन इदं वा
क्यमुवाच १ तदेवाह कुत इति कुतो हेतोस्त्वा इति त्वां विषमे संकटे इदं कश्मलं समुपस्थितं अयं मोहः प्राप्तः यतः आर्यैरसेवितं अस्वर्ग्यम्
अयशस्करं च २ तस्मात्क्लैब्यमिति हे पार्थ क्लैब्यं कातर्यं मा स्म गमः न प्राप्नुहि अतस्त्वय्येतन्नोपपद्यते योग्यं न भवति क्षुद्रं तुच्छं हृदयदौर्बल्यं
त्यक्त्वा युद्धायोत्तिष्ठ परंतप शत्रुतापन ३ नाहं कातरत्वेन युद्धादुपरतः किंतु युद्धस्यान्याय्यत्वादित्यर्जुन उवाच कथमिति भीष्मद्रोणौ पूजा
यामर्हौ योग्यौ तौ प्रति कथमहं योत्स्यामि तत्रापि इषुभिः यत्र वाचापि योत्स्यामीति वक्तुं नोचितं तत्र बाणैः कथं योत्स्यामीत्यर्थः हे अरिसूदन

संजय उवाच तं तथा कृपयाविष्टमश्रुपूर्णाकुलेक्षणं विषीदन्तमिदं वाक्यमुवाच मधुसूदनः १ श्रीभगवानुवाच कुतस्त्वा
कश्मलमिदं विषमे समुपस्थितं अनार्यजुष्टमस्वर्ग्यमकीर्तिकरमर्जुन २ क्लैब्यं मा स्म गमः पार्थ नैतत्त्वय्युपपद्यते क्षुद्रं
हृदयदौर्बल्यं त्यक्त्वोत्तिष्ठ परंतप ३ अर्जुन उवाच कथं भीष्ममहं संख्ये द्रोणं च मधुसूदन इषुभिः प्रतियोत्स्यामि पू
जार्हावरिसूदन ४ गुरूनहत्वा हि महानुभावान् श्रेयो भोक्तुं भैक्ष्यमपीह लोके हत्वार्थकामांस्तु गुरूनिहैव भुंजीय भोगान् रुधिरप्रदिग्धान्

शत्रुसूदन ४ तर्हि तेषां देहयात्रापि न स्यादिति चेत्तत्राह गुरूनिति गुरून् द्रोणादीन् अहत्वा परलोकविरुद्धो गुरुवधः तमकृत्वा इह लोके भि
क्षान्नमपि भोक्तुं श्रेयः उचितं विपक्षे तु न केवलं परत्र दुःखं इहैव तु नरकदुःखमनुभवेयमित्याह गुरून् हत्वा इहैव तु रुधिरेण प्रदिग्धान् प्रकर्षेण लिप्ता
न् अर्थकामात्मकान् भोगानहं भुंजीय अश्नीयां यद्वा अर्थकामानिति गुरूणां विशेषणं अर्थे तस्माकुलत्वादेनेतावद्युद्धान्न निवर्त्तेरन् तस्मा
देतद्वधः प्रसज्येतैवेत्यर्थः तथा च युधिष्ठिरं प्रति भीष्मेणोक्तं अर्थस्य पुरुषो दासो दासस्त्वर्थो न कस्यचित् इति सत्यं महाराज बद्धोस्म्यर्थेन कौर
वैरिति

श्रीः

किंच यद्यप्यधर्ममंगीकरिष्यामः तथापि किमस्माकं जयः पराजयो वा भवेदिति न ज्ञायत इत्याह न चैतदिति एतद्द्वयोर्मध्ये कतरत् किं नाम गरीयः
अधिकतरं भवतीति न विद्मः तदेव द्वयं दर्शयति यद्वा एतान्वयं जयेम जेष्यामः यदि वा नो स्मानेते जयेयुः जेष्यंतीति किंच अस्माकं जयो
पि फलतः पराजय एवेत्याह यानेव हत्वा जिजीवितुं नेच्छामः ते एवैते संमुखे ऽवस्थिताः ५ तस्मात्कार्पण्येनेति एतान्हत्वा कथं जीविष्या
मीति कार्पण्यं दोषः कुलक्षयकृतः ताभ्यामुपहतः अभिभूतः स्वभावः शौर्यादिलक्षणो यस्य सोहं त्वां पृच्छामि तथा धर्मे संमूढं चेतो यस्य सः

न चैतद्विद्मः कतरन्नो गरीयो यद्वा जयेम यदि वा नो जयेयुः यानेव हत्वा न जिजीविषामस्तेवस्थिताः प्रमुखे धार्त्तराष्ट्राः ६ कार्पण्यदो
षोपहतस्वभावः पृच्छामि त्वां धर्मसंमूढचेताः यच्छ्रेयः स्यान्निश्चितं ब्रूहि तन्मे शिष्यस्तेहं शाधि मां त्वां प्रपन्नं ७ न हि प्रप
श्यामि ममापनुद्याद्यच्छोकमुच्छोषणमिंद्रियाणां अवाप्य भूमावसपत्नमृद्धं राज्यं सुराणामपि चाधिपत्यं ८ संजय उवाच ए
वमुक्त्वा हृषीकेशं गुडाकेशः परंतप न योत्स्य इति गोविंदमुक्त्वा तूष्णीं बभूव ह ९ तमुवाच हृषीकेशः प्रहसन्निव भारत सेनयो
रुभयोर्मध्ये विषीदंतमिदं वचः १०

युद्धस्य क्षात्रधर्मत्वाद्भिक्षाटनमपि क्षत्रियस्य धर्मो वा अधर्मो वेति संमूढं चित्तं यस्य सः सन्नित्यर्थः अतो मे यन्निश्चितं श्रेयः सुकं स्यात्तन्मे ब्रूहि किंच ते अहं शि
ष्यः शासनार्हः अतस्त्वां प्रपन्नं शरणागतं मां शाधि शिक्षय ७ त्वमेव विचार्य यद्युक्तं तत्कुर्विति चेत्तत्राह नहीति इंद्रियाणामुच्छोषणमतिशो
षकरं मदीयं शोकं यत्कर्म अपनुद्यात् अपनयेत् तदहं न प्रपश्यामि यद्यपि भूमौ निष्कंटकं समृद्धं राज्यं प्राप्स्यामि एवमभीष्टं तत्सर्वमवाप्यापि शोका
पनोदनोपायं न प्रपश्यामीत्यन्वयः ८ एवमुक्तो अर्जुनः किं कृतवानित्यपेक्षायां संजय उवाच एवमिति ९ ततः किं वृत्तमित्यत आह तमुवाचेति

तथा स्करेंद्रत्वमपि यदि प्राप्स्यामि २

१४

देहात्मनोरविवेकादस्यैवं शोको भवतीति तद्विवेकप्रदर्शनार्थं श्रीभगवानुवाच अशोच्यानिति शोकस्याविषयभूतानेव बंधूंस्त्व
मनुशोचः शोचितवानसि दृष्ट्वेमं स्वजनं कृष्ण युयुत्सुं समुपस्थितमित्यादिना ततः कुतस्त्वा कश्मलमिदं विषमे समुपस्थितमित्यादिना
मया बोधितोपि पुनश्च प्रज्ञावतां पंडितानां वादान् शब्दान् कथं भीष्ममहं संख्य इत्यादीन् केवलं भाषसे न तु पंडितोसि यतः गतासून्गत
प्राणान् बंधून् अगतासूंश्च जीवतोपि बंधुहीना एते कथं जीविष्यंतीति नानुशोचंति ११ अशोच्यत्वे हेतुमाह न त्वेवेति यथाहं
परमेश्वरो जातु कदाचित् लीलाविग्रहस्याविर्भावेपि नासमिति तु नैव अपि त्वासमेव अनादित्वात् न च त्वं नासीः नाभूः अपि त्वासी

श्रीभगवानुवाच अशोच्यानन्वशोचस्त्वं प्रज्ञावादांश्च भाषसे गतासूनगतासूंश्च नानुशो
चंति पंडिताः ११ न त्वेवाहं जातु नासं न त्वं नेमे जनाधिपाः न चैव न भविष्यामः सर्वे वयमतः
परं १२ देहिनोस्मिन्यथा देहे कौमारं यौवनं जरा तथा देहान्तरप्राप्तिर्धीरस्तत्र न मुह्यति १३

रेव इमे जनाधिपा नृपाः नासन्निति न अपि त्वासन्नेव मदंशत्वात् तथा अतः परं इत ऊर्ध्वमपि न भविष्यामो न स्थास्याम इति चैव अपि तु
स्थास्यामः एवं जन्ममरणशून्यत्वादशोच्या इत्यर्थः १२ ननु ईश्वरस्यैव जन्मादिशून्यत्वं सत्यमेव जीवानां तु जन्ममरणे प्रसिद्धे
तत्राह देहिन इति देहिनो देहाभिमानिनो जीवस्य यथास्मिन्स्थूलदेहे कौमाराद्यवस्था देहनिबंधना एव न तु स्वतः पूर्वावस्थानाशे
अवस्थांतरोत्पत्तावपि स एवाहमिति प्रत्यभिज्ञानात् तथैव देहनाशे देहांतरप्राप्तिरपि लिंगदेहनिबंधना न तु तावदात्मनो नाशः
जातमात्रस्य पूर्वसंस्कारेण स्तन्यादौ प्रवृत्तिदर्शनात् अतो धीरः धीमान् तत्र तयोर्देहनाशोत्पत्त्योर्न मुह्यति आत्मैव मृतो जातश्चेति

ननु गतानगतानहं न शोचामि किंतु तद्वियोगादिदुःखभाजं मामेव इति चेत् तत्राह मात्रास्पर्शा इति मीयंते विषया आभिरिति मात्रा इं-
द्रियवृत्तयः तासां स्पर्शा विषयैः संबंधाः ते शीतोष्णादिप्रदा भवंति ते त्वागमापायित्वादनित्या अस्थिराः अतस्तांस्तितिक्षस्व
सहस्व यथा जलातपादिसंपर्कास्ते कालवृत्ताः स्वभावतः शीतादिप्रयच्छंतीति एवमिष्टसंयोगवियोगा अपि सुखदुःखादि प्रयच्छं-
तीति तेषां चास्थिरत्वात् सहनं उचितं न तु तन्निमित्तहर्षविषादपारवश्यमित्यर्थः १४ तत्प्रतीकारप्रयत्नादपि तत्सहनमे-
वोचितं महाफलत्वादित्याह यं हीति एते मात्रास्पर्शा यं न व्यथयंति नाभिभवंति समे सुखदुःखे यस्य तं सतैरविक्षिप्यमाणं

मात्रास्पर्शास्तु कौंतेय शीतोष्णसुखदुःखदाः आगमापायिनोऽनित्यास्तांस्तितिक्षस्व भारत १४ यं हि न व्यथयंत्येते
पुरुषं पुरुषर्षभ समदुःखसुखं धीरं सोऽमृतत्वाय कल्पते १५ नासतो विद्यते भावो नाभावो विद्यते सतः उभयोरपि
दृष्टोऽन्तस्त्वनयोस्तत्त्वदर्शिभिः १६ अविनाशि तु तद्विद्धि येन सर्वमिदं ततं विनाशमव्ययस्यास्य न कश्चित्कर्तुमर्हति १७

धर्मज्ञानद्वारा अमृतत्वाय मोक्षाय कल्पते योग्यो भवति १५ ननु तथापि शीतोष्णादिकमतिदुःसहं कथं सोढव्यं अत्यंततत्सह-
नेन कदाचिदात्मनाशस्यापि संभवादित्याशंक्य तत्त्वविचारतः सर्वं सोढुं शक्यमित्याशयेनाह नेति असतः अनात्मधर्मत्वादविद्यमा द्य
नस्य शीतोष्णादेरात्मनि भावः सत्ता न विद्यते तथा सतः सत्स्वभावस्यात्मनोऽभावो विनाशो न विद्यते एवमुभयोः सदसतोरन्तो
निर्णयो दृष्टः कैः तत्त्वदर्शिभिः वस्तुयाथार्थ्यविद्भिः एवंभूतविवेकेन सहस्वेत्यर्थः १६ तत्र सत्स्वभावं वस्तु सामान्येनोक्तं विशेषतो
दर्शयति अविनाशीति येन सर्वमिदमागमापायधर्मकं देहादिकं ततं साक्षित्वेन व्याप्तं तत्तु आत्मस्वरूपं अविनाशि नाशरहितं विद्धि जा-
नीहि तत्र हेतुमाह विनाशमिति १७

नाशिवि

भ०गी०टी०
८

अंतवंतविनाशिन २ सुख

आगमापायधर्मकमसद्दर्शयति अंतवंत इति अंतो नाशो विद्यते येषां ते अंतवंतः नित्यस्य सर्वदैकरूपस्य शरीरिणः शरीरवतः अत ए
वानाशिनः अप्रमेयस्यापरिछिन्नस्यात्मन इमे सुखदुःखादिधर्मका देहा उक्तास्तत्वदर्शिभिः यस्मादेवमात्मनो विनाशो नैव दुःखादि
संबंधः तस्मात् मोहजं शोकं त्यक्त्वा युध्यस्व स्वधर्मं मा त्याक्षीः १८ तदेवं भीष्मादिमृत्युनिबंधनः शोको निवारितः यच्चात्मनो हंतृत्व
निमित्तं दुःखमुक्तं एतान्न हंतुमिच्छामि इत्यादिना तदपि तद्वदेव तन्निमित्तमित्याह य एनमिति एनमात्मानं हननक्रियायां कर्मत्वं क
र्तृत्वमपि नास्तीत्यर्थः तत्र हेतुर्नायमिति १९ न हन्यत इत्येतदेव षड्भावविकारशून्यत्वेनोपपादयति नेति न जायत इति जन्मप्रतिषे

अंतवंत इमे देहा नित्यस्योक्ताः शरीरिणः अनाशिनोऽप्रमेयस्य तस्माद्युध्यस्व भारत १८ य एनं
वेत्ति हंतारं यश्चैनं मन्यते हतं उभौ तौ न विजानीतो नायं हंति न हन्यते १९ न जायते म्रियते वा
कदाचिन्नायं भूत्वा भविता वा न भूयः अजो नित्यः शाश्वतोऽयं पुराणो न हन्यते हन्यमाने शरीरे २०

धः न म्रियत इति विनाशप्रतिषेधः वाशब्दश्चार्थे नचायं भूत्वा उत्पद्य भविता भवति अस्तित्वं भजते किंतु प्रागेव स्वतः सद्रूप इति ज
न्मानंतरास्तित्वलक्षणद्वितीयविकारप्रतिषेधः तत्र हेतुः यस्मादजः यो हि जायते स जन्मानंतरमस्तित्वं भजते न तु यः स्वयमेवा
स्ति सोऽप्यस्मादस्तित्वं भजत इत्यर्थः नित्यः सर्वदैकरूप इति वृद्धिप्रतिषेधः शाश्वतः शश्वद्भव इत्यपक्षयप्रतिषेधः पुराण इति
विपरिणामप्रतिषेधः पुरापि नव एव न तु परिणामतो रूपांतरं प्राप्य नवो भवतीत्यर्थः यद्वा न भविता इत्यस्यानुषंगं कृत्वा न भूयः अधिकं
यथा भवति तथा न भविता इति वृद्धिप्रतिषेधः अजो नित्य इति चोभयत्र जन्माभावे हेतुरित्यपौनरुक्त्यं तदेवं जायते अस्ति वर्धते विपरिणम

ते अपक्षीयते विनश्यतीति षड्भावविकारा यास्कादिभिरुक्ताः
श्रीः ते प्रतिषिद्धाः तेषां निरासाद्विकारा नात्मनि सन्तीति ॥ ८
मतिदत्ता॥ २०

तदेवमात्मनो जन्मविनाशाभावान्न शोकः कार्य इत्युक्तं इदानीं देहेन सहात्मनो जन्म तद्विनाशेन च विनाशमंगीकृत्यापि शोको न कार्य
इत्याह अथ चेति अथ च यद्यप्येनमात्मानं नित्यं सर्वदा तत्तद्देहजाते जातं मन्यसे तथा तत्तद्देहे मृते च मृतं मन्यसे पुण्यपापयोस्तत्फ
लभूतयोश्च जन्ममरणयोरात्मगामित्वात् तथापि त्वं शोचितुं नार्हसि २६ कुत इत्याह जातस्येति हि यस्मात् जातस्य स्वारंभ
कर्मक्षये मृत्युर्ध्रुवो निश्चितः मृतस्य च तत्कृतेन कर्मणा जन्मापि ध्रुवमेव तस्मादेवमपरिहार्येऽवश्यंभाविनि जन्ममरण
लक्षणेऽर्थे शोचितुं नार्हसि योग्यो न भवसि २७ किं च देहानां च स्वभावं पर्यालोच्य तदुपाधिके आत्मनो जन्ममरणे शोको न कार्य इत्याह

अथ चैनं नित्यजातं नित्यं वा मन्यसे मृतं तथापि त्वं महाबाहो नैवं शोचितुमर्हसि २६ जातस्य हि ध्रुवो मृत्युर्ध्रुवं ज
न्म मृतस्य च तस्मादपरिहार्येऽर्थे न त्वं शोचितुमर्हसि २७ अव्यक्तादीनि भूतानि व्यक्तमध्यानि भारत अव्यक्तनिध
नान्येव तत्र का परिदेवना २८ आश्चर्यवत्पश्यति कश्चिदेनमाश्चर्यवद्वदति तथैव चान्यः आश्चर्यवच्चैनमन्यः शृणोति

अव्यक्तेति अव्यक्तं प्रधानं तदेव आदिः उत्पत्तेः पूर्वरूपं येषां तानि भूतानि शरीराणि कारणात्मना स्थितानामेवोत्पत्तेः तथा व्यक्तं अभि
व्यक्तं मध्यं जन्ममरणांतरालस्थितिलक्षणं येषां अव्यक्ते निधनं लयो येषां तानि ईदृशान्येवंभूतान्येव तत्र तेषु का परिदेवना कः शोक
निमित्तो विलापः प्रतिबुद्धस्य स्वप्नदृष्टवस्तुष्विव शोको न युज्यत इत्यर्थः २८ कुतस्तर्हि विद्वांसोऽपि लोके शोचंति आत्माज्ञानादेव इत्या
शयेनात्मनो दुर्विज्ञेयतामाह आश्चर्यवदिति कश्चिदेनमात्मानं शास्त्राचार्योपदेशाभ्यां पश्यन् आश्चर्यवत्पश्यति सर्वगतस्य नित्यज्ञा
नानंदस्वभावस्यात्मनो लौकिकवस्तुविलक्षणत्वादैंद्रजालिकवद्घटमानं पश्यन्निव विस्मयेन पश्यति असंभावनाभिभूतत्वात् तथा आश्चर्यवद्वदति अन्यो

अत एव हंतृत्वाभावोपि दृष्टांतः सिद्ध इत्याह वेदेति नित्यं वृद्धिशून्यं अव्ययं अपक्षयशून्यं अजमविनाशिनं च यो वेद स पुरुषः कं हंति कथं वा हंति एवंभूतस्य वधे साधनाभावात् तथा स्वयं प्रयोजको भूत्वा अन्येन कं घातयति कथं वा घातयति न कथंचिदपीत्यर्थः अनेनापि प्रयोजकत्वदोषदृष्टिं माकार्षीरित्युक्तं भवति २१ नन्वात्मनो ऽविनाशेपि तदीयशरीरनाशं पर्यालोच्य शोचामि इति चेत् तत्राह वासांसीति कर्मनिबंधनानां भूतानां देहानां अवश्यंभावित्वात् जीर्णदेहनाशे शोको न कार्य इत्यर्थः २२ कथं हंतीत्यनेनोक्तं वधसाधना

वेदाविनाशिनं नित्यं य एनमजमव्ययं कथं स पुरुषः पार्थ कं घातयति हंति कं २१ वासांसि जीर्णानि यथा विहाय नवानि गृह्णाति नरोपराणि तथा शरीराणि विहाय जीर्णान्यन्यानि संयाति नवानि देही २२ नैनं छिंदंति शस्त्राणि नैनं दहति पावकः न चैनं क्लेदयंत्यापो न शोषयति मारुतः २३ अछेद्योयमदाह्योयमक्लेद्यो ऽशोष्य एव च नित्यः सर्वगतः स्थाणुरचलोयं सनातनः २४ अव्यक्तोयमचिंत्योयमविकार्योयमुच्यते तस्मादेवं विदित्वैनं नानुशोचितुमर्हसि २५ ६७

भावं दर्शयन्नविनाशित्वमात्मनः स्फुटीकरोति नेनमिति आपो नैनं क्लेदयंति मृदूकरणेन शिथिलं न कुर्वंति २३ तत्र हेतुमाह अछेद्य इत्यादि सार्धेन निरवयवत्वाद् छेद्योयं अक्लेद्यश्च अमूर्तत्वाद् दाह्यः द्रवत्वाभावात् अशोष्य इति भावः अतश्च छेदादियोग्यो न भवति यतो नित्यः अविनाशी सर्वगतः स्थाणुः स्थिरस्वभावः रूपांतरापत्तिशून्यः अचलः पूर्वरूपापरित्यागी सनातनः अनादिः २४ किं च अव्यक्त इति अव्यक्तः चक्षुराद्यविषयः अचिंत्यः मनसो प्यविषयः अविकार्यः कर्मेंद्रियाणामप्यगोचरः इत्यर्थः उच्यते इति नित्यत्वादावभियुक्तो किं प्रमाणयति उपसंहरति तस्मादिति २५

तदेवं दुर्बोधमात्मतत्त्वं संक्षेपेणोपदिश्य तु अशोच्यत्वमुपसंहरति देहीति ३० यच्चोक्तमर्जुनेन वेपथुश्च शरीरे मे रोमहर्षश्च जायत इति
तदप्ययुक्तमित्याह स्वधर्ममिति आत्मनो नाशाभावादेव एतेषां हनने पि विकंपितुं नार्हसि किंच स्वधर्ममपि चावेक्ष्य विकंपितुं नार्ह
सीति भावः यच्चोक्तं न च श्रेयो नुपश्यामि हत्वा स्वजनमाहव इत्यादि तत्राह धर्म्यादिति धर्मादनपेतात् न्याय्याद्युद्धादन्यदिति ३१
किंच महति श्रेयसि स्वयमेवागते सति कुतो विकंपसे इत्याह यदृच्छयेति यदृच्छया अप्रार्थितमेवोपपन्नं श्रा समीदृशं युद्धं सुखि

देही नित्यमवध्यो यं देहे सर्वस्य भारत तस्मात्सर्वाणि भूतानि न त्वं शोचितुमर्हसि ३० स्वधर्ममपि चा
वेक्ष्य न विकंपितुमर्हसि धर्म्याद्धि युद्धाच्छ्रेयो न्यत्क्षत्रियस्य न विद्यते ३१ यदृच्छया चोपपन्नं स्वर्गद्वारम
पावृतं सुखिनः क्षत्रियाः पार्थ लभंते युद्धमीदृशं ३२ अथ चेत्त्वमिमं धर्म्यं संग्रामं न करिष्यसि ततः स्वध
र्मं कीर्तिं च हित्वा पापमवाप्स्यसि ३३ अकीर्तिं चापि भूतानि कथयिष्यंति ते व्ययां संभावितस्य चाकीर्तिर्मर
णादतिरिच्यते ३४ भयाद्रणादुपरतं मंस्यंते त्वां महारथाः येषां च त्वं बहुमतो भूत्वा यास्यसि लाघवं ३५

नः सभाग्या एव लभंते यतो निरावरणं निवारितं स्वर्गद्वारमेवैतत् यद्वा य एवंविधं युद्धं लभंते त एव क्षत्रियाः सुखिन इत्यर्थः एतेन स्वजनं हि
कथं हत्वा सुखिनः स्याम इति यदुक्तं तन्निरस्तं भवति ३२ विपक्षे दोषमाह अथ चेत्त्वमिति ३३ किंच अकीर्तिमिति अव्ययां शाश्व
तीं संभावितस्य बहुमानितस्य अतिरिच्यते अधिका भवति ३४ किंच भयादिति येषां च बहुगुणत्वेन पूर्वं संमतो भूः त एव भयेन सं
ग्रामान्निवृत्तं मन्येरन् ततश्च पूर्वं बहुमतो भूत्वा लाघवं यास्यसि ३५

किंचअवाच्येति अवाच्यान्वादान्वक्तुमनर्हान्शब्दान्तवाहिताःत्वच्छत्रवोवदिष्यंति ३६ यच्चैतदुक्तं नचैतद्विद्मःकतरन्नोगरीयो यद्वाजयेमयदिवानोजयेयुः इतितत्राह हतोवेति पक्षद्वयेपितवलाभएवेत्यर्थः ३७ यदप्युक्तंपापमेवाश्रयेदस्मानितितत्राह सुखदुःखेइति सुखदुःखेसमेकृत्वा तथातयोःकारणभूतौलाभालाभावपि तयोरपिकारणभूतौजयाजयावपिसमौकृत्वा एते षांसमत्वेकारणंहर्षविषादराहित्यंयुद्धेस्वसन्नद्धोभव सुखाभिलाषंहित्वा स्वधर्मबुद्ध्यायुध्यमानःपापंनप्राप्स्यसीत्यर्थः ३८ ७

अवाच्यवादांश्चबहून्वदिष्यंतितवाहिताः निंदंतस्तवसामर्थ्यंततोदुःखतरंनुकिम् ३६

हतोवाप्राप्स्यसिस्वर्गंजित्वावाभोक्ष्यसेमहीं तस्मादुत्तिष्ठकौंतेययुद्धायकृतनिश्चयः ३७

सुखदुःखेसमेकृत्वालाभालाभौजयाजयौ ततोयुद्धाययुज्यस्वनैवंपापमवाप्स्यसि ३८

एषातेभिहितासांख्येबुद्धिर्योगेत्विमांशृणु बुद्ध्यायुक्तोययापार्थकर्मबंधंप्रहास्यसि ३९

उपदिष्टंज्ञानयोगंउपसंहरंस्तत्साधनंकर्मयोगंप्रस्तौति एषेति सम्यक्ख्यायतेप्रकाश्यतेवस्तुतत्वमनयेतिसंख्यासम्यग्ज्ञानं तस्मि न्प्रकाशमानमात्मतत्वंसांख्यंतस्मिन्करणीयाबुद्धिरेषातवाभिहिता एवमभिहितायामपिसांख्यबुद्धौतवचेदात्मतत्वमपरोक्षम् नभवतितर्हिअंतःकरणशुद्धिद्वारा आत्मतत्वापरोक्षार्थंकर्मयोगेत्विमांबुद्धिंशृणु ययाबुद्ध्यायुक्तःपरमेश्वरार्पितकर्मयोगेनशुद्धां तःकरणःसन् तत्प्रसादप्राप्तापरोक्षज्ञानेनकर्मात्मकंबंधंप्रकर्षेणहास्यसिसंत्यक्ष्यसि ३९ ७ श्रीगोपालकृष्णायनमः ७ ७

ननु कृष्यादिवत्कर्मणां कदाचिद्विघ्नबाहुल्येन फलव्यभिचारात् मंत्राद्यंगवैगुण्येन च प्रत्यवायसंभवात् कुतः कर्मयोगेन कर्मबंधप्रहाणं तत्राह नेहेति इह निष्कामकर्मयोगे अभिक्रमस्य प्रारंभस्य नाशो निष्फलत्वं नास्ति प्रत्यवायश्च न विद्यते ईश्वरोद्देशेनैव विघ्नवैगुण्याद्यसंभवात् किंच अस्य धर्मस्य स्वल्पमपि उपक्रममात्रमपि कृतं महतो भयात् संसारात् त्रायते रक्षति न काम्यकर्मवत् किंचिद्वैगुण्यादिना नैष्फल्यमस्येत्यर्थः ४० कुत इत्यपेक्षायां उभयोर्वैषम्यमाह व्यवसायेति इह ईश्वराराधनलक्षणे कर्मयोगे व्यवसायात्मिका परमेश्वरभक्त्यैव ध्रुवं तरिष्यामीति निश्चयात्मिका एकनिष्ठैव बुद्धिर्भवति अव्यवसायिनां तु बहिर्मुखानां कामिनां कामानामानन्त्यादनं

नेहाभिक्रमनाशोऽस्ति प्रत्यवायो न विद्यते स्वल्पमप्यस्य धर्मस्य त्रायते महतो भयात् ४०
व्यवसायात्मिका बुद्धिरेकेह कुरुनंदन बहुशाखा ह्यनंताश्च बुद्धयोऽव्यवसायिनाम् ४१
यामिमां पुष्पितां वाचं प्रवदंत्यविपश्चितः वेदवादरताः पार्थ नान्यदस्तीति वादिनः ४२

ताः तत्रापि कर्मफलगुणफलादिप्रकारभेदाद्बहुशाखाश्च बुद्धयो भवंति ईश्वराराधनार्थं हि नित्यं नैमित्तिकं कर्म किंचिदंगवैगुण्येऽपि न नश्यति यथाशक्ति कुर्यात्तथा कुर्यादिति हि तद्विधीयते न च वैगुण्यं ईश्वरोद्देशेनैव वैगुण्योपशमात् न तु तथा काम्यं कर्म अतो महद्वैषम्यमिति भावः ४१ ननु कामिनोऽपि कस्मात्कामार्थानुविद्धां व्यवसायात्मिकामेव बुद्धिं किं न कुर्वंति तत्राह यामिमामिति पुष्पितां विषलतावदापातरमणीयां प्रकृष्टां परमार्थफलपरामेव वदंति वाचं स्वर्गादिफलश्रुतिं तेषां तया वाचा अपहृतचेतसां व्यवसायात्मिका बुद्धिर्न विधीयते इति तृतीयेनान्वयः किमिति तथा वदंति यतोऽविपश्चितो मूढाः तत्र हेतुः वेदे ये वादाः अर्थवादाः अक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतं भवति अपाम सोमममृता अभूम इत्याद्यास्तेष्वेव रताः प्रीताः अत एव अतः परमन्यदीश्वरतत्त्वं प्राप्यं नास्तीति वदनशीलाः

[४२]

अतएवकामात्मानइति कामात्मानःकामाकुलितचित्ताः अतः स्वर्गएवपरः पुरुषार्थः येषांतेजन्मचतत्रकर्माणिचतत्फलानिचप्रददा
तीतितथातांभोगैश्वर्ययोर्गतिंप्राप्तिंप्रतिसाधनभूतायेक्रियाविशेषास्तेबहुलायस्यांतांप्रवदंतीत्यनुषंगः ४३ ततश्चभोगैश्वर्यप्रस
क्तानामिति भोगैश्वर्ययोःप्रसक्तानामतिनिविष्टानांतयापुष्पितयावाचाअपहृतमाकृष्टंचेतोयेषांसमाधिश्चित्तैकाग्र्यंपरमेश्वरै
काग्र्यंस्वत्वेनतस्मिन्निश्चयात्मिकाबुद्धिर्नविधीयतेनोत्पद्यतइत्यर्थः कर्मकर्त्तरिप्रयोगः ४४ ननुचयदिस्वर्गादिकंपरमंफलंभवति
न

नभि

कामात्मानः स्वर्गपराजन्मकर्मफलप्रदां क्रियाविशेषबहुलांभोगैश्वर्यगतिंप्रति ४३
भोगैश्वर्यप्रसक्तानांतयापहृतचेतसां व्यवसायात्मिकाबुद्धिःसमाधौनविधीयते ४४
त्रैगुण्यविषयावेदानिस्त्रैगुण्योभवार्जुन निर्द्वंद्वोनित्यसत्त्वस्थोनिर्योगक्षेमआत्मवान् ४५

तर्हिवेदैःकिमितितत्साधनकर्माणिविधीयंतेतत्राह त्रैगुण्येति त्रिगुणात्मकाःसकामायेअधिकारिणःतद्विषयाःकर्मसंबंधप्रतिपा
दकावेदाः त्वंतुनिस्त्रैगुण्योनिष्कामोभव तत्रोपायमाह निर्द्वंद्वः सुखदुःखशीतोष्णादियुगलानिद्वंद्वानितद्रहितोभव तानि
सहस्वेत्यर्थः कथमित्यत्राह नित्यंसत्त्वस्थःसन्धैर्यमवलंब्येत्यर्थः तथानिर्योगक्षेमः अप्राप्तस्यसंप्राप्तिर्योगः प्राप्तपालनं
क्षेमः तद्रहितः आत्मवान्अप्रमत्तः नहिद्वंद्वाकुलस्ययोगक्षेमव्यापृतस्यचप्रमादिनःत्रैगुण्यातिक्रमःसंभवतीति ४५

नतुवेदोक्तेननानाफलपरित्यागेन निष्कामतयेश्वराराधनविषयाव्यवसायात्मिकाबुद्धिः कुबुद्धिरेवेत्याशंक्याह यावानिति उदकं पीयतेऽस्मिन्निति उदपानं वापीकूपादि तस्मिन्स्वल्पोदके एकत्र कृत्स्नस्य स्वार्थस्यासंभवात् तत्रतत्रभ्रमणेन विभागशो यावान्स्नानपानादिरर्थः प्रयोजनं भवति तावान्सर्वोप्यर्थः सर्वतः संप्लुतोदके महाह्रदे एकत्रैव यथा भवति एवं यावान्सर्वेषु वेदेषु तत्तत्कर्मफलरूपोर्थः तावान्सर्वोपि विजानतो व्यवसायात्मिकबुद्धियुक्तस्य ब्राह्मणस्य ब्रह्मनिष्ठस्य भवत्येव ब्रह्मानंदे क्षुद्रानंदानामंतर्भूतत्वात् एतस्यैवानंदस्यान्यानि भूतानि मात्रामुपजीवंतीति श्रुतेः तस्मादियमेव सुबुद्धिरित्यर्थः ४६ तर्हि सर्वकर्माणि परमेश्वरा

यावानर्थ उदपाने सर्वतः संप्लुतोदके तावान्सर्वेषु वेदेषु ब्राह्मणस्य विजानतः ४६

कर्मण्येवाधिकारस्ते मा फलेषु कदाचन मा कर्मफलहेतुर्भूर्मा ते संगोस्त्वकर्मणि ४७

योगस्थः कुरु कर्माणि संगं त्यक्त्वा धनंजय सिद्ध्यसिद्ध्योः समो भूत्वा समत्वं योग उच्यते ४८

राधनादेव भविष्यंतीत्यभिसंधाय प्रवर्त्ततेत्याशंक्य तद्वारयन्नाह कर्मण्येवेति तेतव तत्त्वज्ञानार्थिनः कर्मण्येवाधिकारः तत्फलेषु बंधहेतुषु अधिकारः कामो मास्तु ननु कर्मणि कृते तत्फलं स्यादेव भोजने कृते तृप्तिवदित्याशंक्याह मा कर्मफलहेतुर्भूः कर्मफलं प्रवृत्तिहेतुर्यस्य तथाभूतो मा भूः कामितस्यैव स्वर्गादेर्नियोज्यविशेषणत्वेन फलत्वात् अकामितं फलं न स्यादिति भावः अत एव फलं बंधकं भविष्यतीति भयादकर्मणि कर्माकरणेपि तव संगो निष्ठा मास्तु ४७ किं तर्हि योगस्थ इति योगः परमेश्वरैकपरता तत्र स्थितः कर्माणि कुरु तथा संगं कर्तृत्वाभिनिवेशं त्यक्त्वा केवलमीश्वराश्रयेणैव कुरु तत्फलस्यापि ज्ञानस्यापि सिद्ध्यसिद्ध्योः समो भूत्वा केवलमीश्वरार्पणेनैव कुरु यत एवंभूतं समत्वमेव योग उच्यते सद्भिः चित्तसमाधानरूपत्वात् ४८

काम्यं तु कर्मातिनिकृष्टमित्याह दूरेणेति बुद्ध्या व्यवसायात्मिकया कृतः कर्मयोगो बुद्धियोगः बुद्धिसाधनभूतो वा तस्मात्सकाशा
त् अन्यत्काम्यकर्म दूरेणावरं अत्यंतमपकृष्टं हि यस्मात् बुद्धौ ज्ञाने शरणमाश्रयं कर्मयोगं अन्विच्छ अनुतिष्ठ यद्वा बुद्धौ शरणं त्राता
रमीश्वरमाश्रयेत्यर्थः फलहेतवस्तु सकामा नराः कृपणाः दीनाः यो वा एतदक्षरमविदित्वा गार्ग्यस्माल्लोकात्प्रैति स कृपण इति श्रुतेः ४९
बुद्धियोगस्य श्रेष्ठत्वमाह बुद्धियुक्त इति सुकृतं स्वर्गादिप्रापकं दुष्कृतं निरयप्रापकं ते उभे इहैव जन्मनि परमेश्वरप्रसादेन जहाति त्यजति
तस्माद्योगाय तदर्थाय कर्मयोगाय युज्यस्व घटस्व यतः योगः कर्मसु कौशलं बंधकानामपि तेषां ईश्वराराधनेन मोक्षपरत्वसंपा

दूरेण ह्यवरं कर्म बुद्धियोगाद्धनंजय बुद्धौ शरणमन्विच्छ कृपणाः फलहेतवः ४९ बुद्धियुक्तो जहातीह उभे सुकृत
दुष्कृते तस्माद्योगाय युज्यस्व योगः कर्मसु कौशलं ५० कर्मजं बुद्धियुक्ता हि फलं त्यक्त्वा मनीषिणः जन्मबंधवि
निर्मुक्ताः पदं गच्छंत्यनामयं ५१ यदा ते मोहकलिलं बुद्धिर्व्यतितरिष्यति तदा गंतासि निर्वेदं श्रोतव्यस्य श्रुतस्य च ५२

दनं चातुर्यं स एव योगः ५० कर्मणां मोक्षसाधनत्वप्रकारमाह कर्मेति कर्मजं फलं त्यक्त्वा केवलमीश्वराराधनार्थं कर्म कुर्वा
णाः मनीषिणो ज्ञानिनो भूत्वा जन्मरूपेण बंधनेन विनिर्मुक्ताः संतः अनामयं सर्वोपद्रवरहितं विष्णोः पदं मोक्षाख्यं गच्छंति ५१
कदा तत्पदमहं प्राप्स्यामीत्यपेक्षायामाह यदेति द्वाभ्यां मोहो देहादिष्वात्मबुद्धिः तदेव कलिलं गहनं कलिलं गहनं विदुरित्यभि
धानात् ततश्चायमर्थः एवं परमेश्वराराधने क्रियमाणे यदा तत्प्रसादेन तव बुद्धिः देहाभिमानलक्षणं मोहमयं गहनं दुर्गं विशेषे
णातितरिष्यति तदा श्रोतव्यस्य श्रुतस्य चार्थस्य निर्वेदं वैराग्यं गंतासि प्राप्स्यसि तयोरनुपादेयत्वेन जिज्ञासां न करिष्यसीत्यर्थः

श्रुतीति श्रुतिभिर्नानावैदिकलौकिकार्थश्रवणैर्विप्रतिपन्ना इतः पूर्वं विक्षिप्ता सती तव बुद्धिर्यदा समाधौ स्थास्यति समाधीयते
चित्तमस्मिन्निति समाधिः परमेश्वरस्तस्मिन्निश्चला विषयांतरैरनाकृष्टा अत एवाचला अभ्यासपटुत्वेन तत्रैव स्थिरा सती
तदा योगं योगफलं तत्त्वज्ञानं अवाप्स्यसि ५३ पूर्वश्लोकोक्तस्य आत्मतत्त्वज्ञस्य लक्षणं जिज्ञासुः अर्जुन उवाच स्थितप्रज्ञस्ये
ति स्वाभाविके समाधौ स्थितस्य अत एव स्थिता निश्चला प्रज्ञा बुद्धिर्यस्य तस्य का भाषा भाष्यते अनयेति भाषा लक्षणमिति या
वत् केन लक्षणेन स्थितप्रज्ञ उच्यत इत्यर्थः तथा स्थितधीः कथं भाषणमासनं व्रजनं च कुर्यादित्यर्थः ५४ अत्र च यानि साध

श्रुतिविप्रतिपन्ना ते यदा स्थास्यति निश्चला समाधावचला बुद्धिस्तदा योगमवाप्स्यसि ५३ अ
र्जुन उवाच स्थितप्रज्ञस्य का भाषा समाधिस्थस्य केशव स्थितधीः किं प्रभाषेत किमासीत व्रजेत किं ५४
श्रीभगवानुवाच प्रजहाति यदा कामान्सर्वान्पार्थ मनोगतान् आत्मन्येवात्मना तुष्टः स्थितप्रज्ञस्तदो
च्यते ५५ दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः वीतरागभयक्रोधः स्थितधीर्मुनिरुच्यते ५६

कस्य ज्ञानसाधनानि तान्येव स्वाभाविकानि सिद्धस्य लक्षणानि अतः सिद्धस्य लक्षणान्येव कथयन् अंतरंगाणि ज्ञानसाधनान्याह
यावदध्यायसमाप्तिः तत्र प्रथमप्रश्नोत्तरं श्रीभगवानुवाच प्रजहातीति द्वाभ्यां मनसि स्थितान्कामान् यदा प्रकर्षेण जहाति त्यागे हेतुः
आत्मन्येव स्वस्मिन्नेव परमानंदरूपे आत्मना स्वयमेव तुष्ट इति आत्मारामः सन् यदा क्षुद्रान् विषयाभिलाषान् त्यजति तदा तेन लक्षणेन
मुनिः स्थितप्रज्ञ इत्युच्यत इत्यर्थः ५५ किंच दुःखेष्विति दुःखेषु प्राप्तेष्वपि अनुद्विग्नमक्षुभितं मनो यस्य सः सुखेषु विगता स्पृहा यस्य
सः तत्र हेतुः वीता गता रागभयक्रोधा यस्मात् तत्र रागः प्रीतिः स मुनिः स्थितधीः स्थितप्रज्ञ इत्युच्यते ५६

कथंभाषेतेत्यस्योत्तरमाह यः सर्वत्रेति यः सर्वत्र पुत्रमित्रादिष्वपि अनभिस्नेहः स्नेहशून्यः अत एव तत्तदापतितानुवत्स्यात तत्तच्छुभं अनुकूलं प्राप्य ना
भिनंदति न प्रशंसति अशुभं प्रतिकूलं प्राप्य न द्वेष्टि न निंदति किंतु केवलमुदासीन एव भाषते तस्य प्रज्ञा प्रतिष्ठितेत्यर्थः ५७ किंच यदेति यदा
चायं योगी इंद्रियार्थेभ्यः शब्दादिभ्यः सकाशात् इंद्रियाणि संहरते प्रत्याहरति अनायासेन संहारे दृष्टांतः अंगानि करचरणादीनि कूर्मो
यथा स्वभावेनैवाकर्षति तद्वत् ५८ ननु इंद्रियाणां विषयेष्वप्रवृत्तिः स्थितप्रज्ञस्य लक्षणं भवितुं नार्हति जडानामातुराणां उपवासपराणां
विषयेष्वप्रवृत्तेरविशेषात्तत्राह विषया इति इंद्रियैर्विषयाणामाहरणं ग्रहणमाहारः निराहारस्य इंद्रियैर्विषयग्रहणमकुर्वतो

यः सर्वत्रानभिस्नेहस्तत्तत्प्राप्य शुभाशुभं नाभिनंदति न द्वेष्टि तस्य प्रज्ञा प्रतिष्ठिता ५७ यदा संहरते चायं कूर्मोंगानीव
सर्वशः इंद्रियाणींद्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता ५८ विषया विनिवर्त्तंते निराहारस्य देहिनः रसवर्जं रसोप्यस्य
परं दृष्ट्वा निवर्त्तते ५९ यततो ह्यपि कौंतेय पुरुषस्य विपश्चितः इंद्रियाणि प्रमाथीनि हरंति प्रसभं मनः ६० ६०

देहिनो देहाभिमानिनोऽज्ञस्य विषया विनिवर्त्तंते तदनुभवो निवर्त्तत इत्यर्थः किंतु रसो रागोऽभिलाषस्तद्वर्जं अभिलाषस्तु न निवर्त्तत
इत्यर्थः रसोपि रागोपि परं परमात्मानं दृष्ट्वाऽस्य स्थितप्रज्ञस्य सतो निवर्त्तते नश्यतीत्यर्थः यद्वा निराहारस्य उपवासपरस्य वि
षयाः प्रायशो निवर्त्तंते क्षुधासंतप्तस्य शब्दस्पर्शाद्यपेक्षाभावात् परं तु रसवर्जं रसापेक्षा तु न निवर्त्तत इत्यर्थः शेषं समानं ५९
इंद्रियसंयमं विना तु स्थितप्रज्ञता न संभवति अतः साधकावस्थायां तत्र महान् प्रयत्नः कर्त्तव्य इत्याह यततो ह्यपीति द्वाभ्यां
यततः मोक्षे प्रयतमानस्यापि विपश्चितो विवेकिनोपि मनः इंद्रियाणि प्रसभं बलात् हरंति यतः प्रमाथीनि प्रमथनशीलानि क्षोभ

यस्मादेवं तस्मात् तानीति युक्तो योगी तानींद्रियाणि संयम्य मत्परः सन् आसीत यस्य वशे वशवर्तीनि एतेन कथमासीतेति प्रश्नस्य वशीकृतेंद्रियः सन्नासीतेत्युत्तरमुक्तं भवति ६१ बाह्येंद्रियसंयमाभावे दोषमुक्त्वा मनःसंयमाभावे दोषमाह ध्यायत इति द्वाभ्यां गुणबुद्ध्या विषयान् ध्यायतः पुरुषस्य तेषु संग आसक्तिर्भवति आसक्त्या च तेष्वधिकः कामो भवति कामाच्च केनचित्प्रतिहतात्क्रोधो भवति ६२ किंच क्रोधादिति क्रोधात्संमोहः कार्याकार्यविवेकाभावः ततः शास्त्राचार्योपदिष्टार्थस्मृतेर्विभ्रमो विचलनं विभ्रंशः

तानि सर्वाणि संयम्य युक्त आसीत मत्परः वशे हि यस्येंद्रियाणि तस्य प्रज्ञा प्रतिष्ठिता ६१ ध्यायतो विषयान्पुंसः संगस्तेषूपजायते संगात्संजायते कामः कामात्क्रोधोभिजायते ६२ क्रोधाद्भवति संमोहः संमोहात्स्मृतिविभ्रमः स्मृतिभ्रंशाद्बुद्धिनाशो बुद्धिनाशात्प्रणश्यति ६३ रागद्वेषवियुक्तैस्तु विषयानिंद्रियैश्चरन् आत्मवश्यैर्विधेयात्मा प्रसादमधिगच्छति ६४ प्रसादे सर्वदुःखानां हानिरस्योपजायते प्रसन्नचेतसो ह्याशु बुद्धिः पर्यवतिष्ठते ६५

ततो बुद्धेश्चेतनायाः नाशः वृक्षादिसमभावः ततः प्रणश्यति मृतस्तुल्यो भवतीत्यर्थः ६३ नन्विंद्रियाणां विषयप्रवणस्वभावानां निरोद्धुमशक्यत्वादयं दोषो दुःपरिहर इति स्थितप्रज्ञस्य कथं स्यादित्याशंक्याह रागेति द्वाभ्यां रागद्वेषरहितैर्विगतदर्पैरिंद्रियैर्विषयांश्चरन् उपभुंजानोपि प्रसादं शांतिं प्राप्नोति रागद्वेषराहित्यमेवाह आत्मनो मनसो वश्यैर्विधेयो वशवर्ती आत्मा मनो यस्येति अनेनैव कथं व्रजेत भुंजीतेति तस्य चतुर्थप्रश्नस्य स्वाधीनैरिंद्रियैर्विषयानधिगच्छेत इत्युत्तरमुक्तं भवति ६४ प्रसादे सति किं स्यादित्यत्राह प्रसाद इति प्रसादे सति सर्वदुःखनाशः ततश्च प्रसन्नचेतसो बुद्धिः प्रतिष्ठिता भवतीत्यर्थः ६५

भ०गी०टी०

३९

इंद्रियनिग्रहस्य स्थितप्रज्ञतासाधनत्वं व्यतिरेकमुखेनोपपादयति नास्तीति अयुक्तस्य अवशीकृतेंद्रियस्य नास्ति बुद्धिः शास्त्राचार्योपदेशाभ्यां आत्मविषया बुद्धिः प्रज्ञैव नोत्पद्यते कुतस्तस्याः प्रतिष्ठा वार्तेत्यत आह न चायुक्तस्य भावनाध्यानं भावनया हि बुद्धेरात्मनि प्रतिष्ठा भवति सा चायुक्तस्य यतो नास्ति न चाभावयतः आत्मध्यानमकुर्वतः शांतिः आत्मन्येव रतिः अशांतस्य कुतः सुखं मोक्षानंद इत्यर्थः ६६ नास्ति बुद्धिरयुक्तस्येत्यत्र हेतुमाह इंद्रियाणामिति इंद्रियाणामवशीकृतानां स्वैरं

नास्ति बुद्धिरयुक्तस्य न चायुक्तस्य भावना न चाभावयतः शांतिरशांतस्य कुतः सुखं ६६
इंद्रियाणां हि चरतां यन्मनोनुविधीयते तदस्य हरति प्रज्ञां वायुर्नावमिवांभसि ६७
तस्माद्यस्य महाबाहो निगृहीतानि सर्वशः इंद्रियाणींद्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता ६८

विषयेषु चरतां मध्ये यदेवैकमिंद्रियं मनोनुविधीयते अवशीकृतं सदिंद्रियेण सह गच्छता तदेवेंद्रियं अस्य मनसः पुरुषस्य वा प्रज्ञां हरति विषयविक्षिप्तां करोति किमुत वक्तव्यं बहूनि प्रज्ञां हरंतीति यथा प्रमत्तस्य कर्णधारस्य नावं वायुः समुद्रे सर्वतः परिभ्रामयति तद्वत् ६७ इंद्रियसंयमस्य स्थितप्रज्ञत्वे साधनत्वं लक्षणत्वं चोक्तमुपसंहरति तस्मादिति प्रतिष्ठिता भवतीत्यर्थः लक्षणत्वोपसंहारे तस्य प्रज्ञा प्रतिष्ठिता ज्ञातव्येत्यर्थः महाबाहो इति संबोधयन् वैरिनिग्रहे समर्थस्य तवात्रापि सामर्थ्यं भवेदिति सूचयति ६८

श्रीः
३९

ननु च न कश्चिदपि प्रसक्तस्तद्वद्दर्शनादिव्यापाररहितः सर्वात्मना निगृहीतेंद्रियो लोके दृश्यते अतो संभावितमिदं लक्षणमित्याशंक्याह
यानिशेति सर्वेषां भूतानां या निशा निशेव निशा आत्मनिष्ठा आत्माज्ञानध्वांतावृत्तमतीनां तस्यां दर्शनादिव्यवहाराभावात् तस्यामा
त्मनिष्ठायां संयमी निगृहीतेंद्रियो जागर्ति प्रतिबुध्यते यस्यां तु विषयनिष्ठायां भूतानि जाग्रति प्रतिबुध्यंते सा आत्मतत्त्वं पश्यतो मुने
र्निशा तस्यां दर्शनादिव्यापारस्तस्य नास्तीत्यर्थः एतदुक्तं भवति यथा दिवांधानामुलूकादीनां रात्रावेव दर्शनं न तु दिवसे एवं ब्रह्मनिष्ठस्यामी
लिताक्षस्यापि ब्रह्मण्येव दृष्टिर्न तु विषयेषु अतो नासंभावितमिदं लक्षणमिति ६९ ननु विषयेषु दृष्ट्यभावे कथमसौ तान्भुंक्ते इत्य

या निशा सर्वभूतानां तस्यां जागर्ति संयमी । यस्यां जाग्रति भूतानि सा निशा पश्यतो मुनेः ॥ ६९ ॥
आपूर्यमाणमचलप्रतिष्ठं समुद्रमापः प्रविशंति यद्वत् । तद्वत्कामा यं प्रविशंति सर्वे स शांतिमाप्नोति न कामकामी ॥ ७० ॥
विहाय कामान्यः सर्वान्पुमांश्चरति निस्पृहः । निर्ममो निरहंकारः स शांतिमधिगच्छति ॥ ७१ ॥

पेक्षायामाह आपूर्यमाण इति नानानदीभिरापूर्यमाणमपि अचलप्रतिष्ठं अनतिक्रांतमर्यादमेव समुद्रं पुनरप्यन्या आपो यथा प्र
विशंति तथा कामा विषया यं मुनिमंतर्दृष्टिं भोगैरविक्रियमाणमेव प्रारब्धकर्मभिराक्षिप्ताः संतः प्रविशंति स शांतिं कैवल्यं प्राप्नो
ति न तु कामकामी भोगकामनाशीलः ७० यस्मादेवं तस्मात् विहायेति प्राप्तान्कामान्विहाय त्यक्त्वा अप्राप्तेषु च निस्पृहः यतो
निरहंकारः अत एव तद्भोगसाधनेषु निर्ममः सन् अंतर्दृष्टिर्भूत्वा यश्चरति प्रारब्धवशेन भोगाननुभुंक्ते यत्र क्वापि गच्छति वा स शांतिं प्राप्नो

८

ग्कों ज्ञाननिष्ठां स्तुवन्नुपसंहरति एषेति ब्राह्मी स्थितिः ब्रह्मज्ञाननिष्ठा एषा एवंविधा एनां परमेश्वराराधनेन विशुद्धांतःकरणः पुमा
न् प्राप्य न मुह्यति पुनः संसारमोहं न प्राप्नोति यतः अंतकाले मृत्युसमये अस्यां क्षणमात्रमपि स्थित्वा ब्रह्मनिर्वाणमृच्छति प्राप्नोति किं
पुनर्वक्तव्यं बाल्यमारभ्य स्थित्वा प्राप्नोतीति ७२ ॥ इति श्रीभगवद्गीताटीकायां सुबोधिन्यां द्वितीयोऽध्यायः २ ॥ श्रीकृष्णाय॰
शोकपंके निमग्नं यः सांख्ययोगोपदेशतः उज्जहारार्जुनं भक्तं स कृष्णः शरणं मम एवं तावद् अशोच्यानन्वशोचस्त्वमित्यादिना प्रथमं

एषा ब्राह्मी स्थितिः पार्थ नैनां प्राप्य विमुह्यति स्थित्वास्यामंतकालेपि ब्रह्मनिर्वाणमृच्छति ७२ ॥ इति श्री
भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे सांख्ययोगो नाम द्वितीयोऽध्यायः २
अर्जुन उवाच ज्यायसी चेत्कर्मणस्ते मता बुद्धिर्जनार्दन तत्किं कर्मणि घोरे मां नियोजयसि केशव १ ५ ५

मोक्षसाधनत्वेन देहात्मविवेकबुद्धिरुक्ता तदनंतरम् एषा तेऽभिहिता सांख्ये बुद्धिर्योगे त्विमां शृणु इत्यादिना कर्म चोक्तं न च तयोर्गुणप्र
धानभावः स्पष्टं दर्शितः तत्र बुद्धियुक्तस्य स्थितप्रज्ञस्य निष्कामत्वनियतेंद्रियत्वनिरहंकारत्वाद्यभिधानात् एषा ब्राह्मी स्थितिः पार्थेति स
प्रशंसमुपसंहाराच्च बुद्धिकर्मणोर्मध्ये बुद्धेः श्रेष्ठं भगवतोऽभिमतं मत्वार्जुन उवाच ज्यायसीति कर्मणः सकाशान्मोक्षांतरंगत्वे
न बुद्धिर्ज्यायसी अधिकतरा श्रेष्ठा चेत्तव संमता तर्हि किमर्थं तस्माद्युध्यस्वेति तस्मादुत्तिष्ठेति च वारंवारं वदन् घोरे हिंसात्मके कर्मणि मां नियो
जयसि केशव ४

ननु धर्म्याद्धि युद्धाच्छ्रेयोऽन्यत्क्षत्रियस्य न विद्यते इत्यादिना कर्मणोपि श्रेष्ठत्वमुक्तमेवेत्याशंक्याह व्यामिश्रेणेति क्वचित्कर्मप्रशंसा क्व
चित् ज्ञानप्रशंसा इति व्यामिश्रं संदेहोत्पादकमिव यद्वाक्यं तेन मे बुद्धिं मतिं उभयत्र दोलायितां कुर्वन् मोहयसीव परमकारुणिकस्य तव
मोहकत्वं नास्त्येव तथापि भ्रांत्या ममैवमाभाति अत उभयोर्मध्ये यत् दृढं तदेकं निश्चित्य वदेति यद्वा इदमेव श्रेयःसाधनमिति निश्चित्य
येनानुष्ठितेन श्रेयो मोक्षमहमाप्नुयां प्राप्स्यामि तदेवैकं वदेत्यर्थः २ अत्रोत्तरं श्रीभगवानुवाच लोकेस्मिन्निति अयमर्थः यदि मया प
रस्पर निरपेक्षमोक्षसाधनत्वेन कर्मज्ञानयोगरूपं निष्ठाद्वयमुक्तं स्यात् तर्हि तयोर्द्वयोर्मध्ये यदेकं भद्रं तदेकं वदेति तवायं प्रश्नः संगच्छे
त नतु मया तथोक्तं किंतु द्वाभ्यामेकैव ब्रह्मनिष्ठोक्ता गुणप्रधानभूतयोः स्वातंत्र्यानुपपत्तेः एकस्यैव तु प्रकारभेदमधिकारिभेदेनोक्तमि

व्यामिश्रेणेव वाक्येन बुद्धिं मोहयसीव मे तदेकं वद निश्चित्य येन श्रेयोहमाप्नुयां २ श्रीभगवा
नुवाच लोकेस्मिन्द्विविधा निष्ठा पुरा प्रोक्ता मयानघ ज्ञानयोगेन सांख्यानां कर्मयोगेन योगिनां ३

ति अस्मिन् शुद्धाशुद्धांतःकरणतया द्विविधे लोके अधिकारिजने द्विविधे द्वे विधे प्रकारौ यस्याः सा द्विविधा निष्ठा मोक्षपरता पुराद्ध
र्वाध्याये मया सर्वं तेन प्रोक्ता स्पष्टमेवोक्ता प्रकारद्वयमेव निर्दिशति शुद्धांतानां शुद्धांतःकरणानां ज्ञानभूमिकामारूढानां ज्ञानपरि
पाकार्थं ज्ञानयोगेन ध्यानादिना निष्ठा ब्रह्मपरतोक्ता ताानि सर्वाणि संयम्य युक्त आसीत मत्पर इत्यादिना सांख्यभूमिकामारुरुक्ष
णां तु अंतःकरणशुद्धिद्वारा तदारोहार्थं तदुपायभूतकर्मयोगाधिकारिणां योगिनां कर्मयोगेन निष्ठोक्ता धर्म्याद्धि युद्धाच्छ्रेयोऽन्यत्क्षत्रि
यस्य न विद्यते इत्यादिना अत एव चित्तशुद्ध्यशुद्धिरूपावस्थाभेदेनैव द्विविधापि निष्ठोक्ता एषा तेभिहिता सांख्ये बुद्धियोगे त्विमां शृणु इति
३

अतः सम्यक्(चित्त)शुद्ध्या ज्ञानोत्पत्तिपर्यन्तं वर्णाश्रमोचितानि कर्माणि कर्तव्यानि अन्यथा चित्तशुद्ध्यभावेन ज्ञानानुत्पत्तिरित्याह न कर्मणामिति कर्मणामनारंभादननुष्ठानात् नैष्कर्म्यं ज्ञानं नाश्नुते न प्राप्नोति ननु च एतमेव प्रव्राजिनो लोकमीप्सन्तः प्रव्रजन्तीति संन्यासस्य मोक्षांगत्वमिति श्रुतेः संन्यासादेव मोक्षो भविष्यति किं कर्मभिरित्याशंक्याह न च चित्तशुद्धिं विना कृतात् संन्यसनादेव ज्ञानशून्यात् सिद्धिं मोक्षं समधिगच्छति प्राप्नोति ४ कर्मणां च संन्यासस्तेषु नासक्तिमात्रं न तु स्वरूपेण अशक्यत्वादित्याह न हीति जातु कस्यांचिदवस्थायां क्षणमात्रमपि कश्चिदपि ज्ञानी

न कर्मणामनारंभान्नैष्कर्म्यं पुरुषोऽश्नुते न च संन्यसनादेव सिद्धिं समधिगच्छति ४
न हि कश्चित्क्षणमपि जातु तिष्ठत्यकर्मकृत् कार्यते ह्यवशः कर्म सर्वः प्रकृतिजैर्गुणैः ५
कर्मेंद्रियाणि संयम्य य आस्ते मनसा स्मरन् इंद्रियार्थान्विमूढात्मा मिथ्याचारः स उच्यते ६
यस्त्विंद्रियाणि मनसा नियम्यारभतेऽर्जुन कर्मेंद्रियैः कर्मयोगमसक्तः स विशिष्यते ७

वा अज्ञो वा अकर्मकृत् कर्माण्यकुर्वाणो न तिष्ठति तत्र हेतुः प्रकृतिजैः स्वभावप्रभवै रागद्वेषादिभिर्गुणैः सर्वोऽपि जनः कर्म कार्यते कर्मणि प्रवर्त्यते अवशः अस्वतंत्रः सन् ५ अतोऽज्ञं कर्मत्यागिनं निंदति कर्मेति वाक्पाण्यादीनि कर्मेंद्रियाण्यपि निगृह्य यो मनसा भगवद्ध्यानच्छलेन इंद्रियार्थान्विषयाननुस्मरन्नास्ते अविशुद्धतया मनस आत्मनि स्थैर्याभावात् स मिथ्याचारः कपटाचारः दांभिक उच्यत इत्यर्थः ६ एतद्विपरीतः कर्मकर्ता श्रेष्ठ इत्याह यस्त्विति यस्तु ज्ञानेंद्रियाणि मनसा नियम्य ईश्वरप्रवणानि कृत्वा कर्मेंद्रियैः कर्मरूपं योगमुपायमारभते अनुतिष्ठति असक्तः फलाभिलाषरहितः स विशि

यस्मादेवं तस्मात् नियतमिति नियतं नित्यं संध्योपासनादि कुरु हि यस्मात् अकर्मणः अकरणात् सकाशात् कर्म ज्यायः अधिक
तरं अन्यथा अकर्मणः सर्वकर्मशून्यस्य तव शरीरनिर्वाहोपि न भवेत् ८ सांख्यास्तु सर्वमपि कर्म बंधकत्वान्न कार्यमित्याहुः तन्निरा
कुर्वन्नाह यज्ञार्थादिति यज्ञोत्र विष्णुः यज्ञो वै विष्णुरिति श्रुतेः तदाराधनार्थात् कर्मणोन्यत्र तदेकं विना अयं लोकः कर्मबंधनः कर्म
भिर्बध्यते न त्वीश्वराराधनार्थेनेति अतस्तदर्थं विष्णुप्रीत्यर्थं मुक्तसंगः निष्कामः सन्कर्म सम्यगाचर ९ प्रजापतिवचनादपि कर्मकर्त
व्यमेवेत्याह सहयज्ञा इति चतुर्भिः यज्ञेन सह वर्तन्त इति सहयज्ञाः यज्ञाधिकृताः ब्राह्मणाद्याः प्रजाः पुरा सर्गादौ सृष्ट्वा ब्रह्मा इदमुवाच

नियतं कुरु कर्म त्वं कर्म ज्यायो ह्यकर्मणः शरीरयात्रापि च ते न प्रसिद्ध्येदकर्मणः ८ यज्ञार्थात्कर्मणोन्यत्र लोकोयं कर्मबंध
नः तदर्थं कर्म कौंतेय मुक्तसंगः समाचर ९ सहयज्ञाः प्रजाः सृष्ट्वा पुरोवाच प्रजापतिः अनेन प्रसविष्यध्वमेष
वोस्त्विष्टकामधुक् १० देवान्भावयतानेन ते देवा भावयंतु वः परस्परं भावयंतः श्रेयः परमवाप्स्यथ ११ ६ ६

अनेन यज्ञेन प्रसविष्यध्वं प्रसूयध्वं प्रसवो वृद्धिः उत्तरोत्तरामभिवृद्धिं लभध्वमित्यर्थः तत्र हेतुः एष यज्ञः वो युष्माकं इष्टकामधुक्
इष्टान्कामान्दोग्धीति तथा अभीष्टभोगदोस्त्वित्यर्थः अत्र च यज्ञग्रहणमावश्यककर्मोपलक्षणार्थं काम्यकर्मप्रशंसा तु प्रकरणे प्रसंग
तापि सामान्येनाकर्मणः कर्म श्रेष्ठमित्येतदर्थेनादोषः १० कथमिष्टकामदोग्धा यज्ञो भवेदित्यत्राह देवानिति अनेन यज्ञेन यूयं देवा
न्भावयत हविर्भागैः संवर्द्धयत ते च देवा युष्मान् संवर्द्धयंतु एवमन्योन्यं संवर्द्धयंतो देवाश्च यूयं च परस्परं श्रेयः अभीष्टमर्थं प्राप्स्यथ ११

एतदेव स्पष्टीकुर्वन् कर्माकरणे दोषमाह इष्टानिति यज्ञैर्भाविताः संतो देवा वृष्ट्यादिद्वारेण युष्मभ्यं भोगान्दास्यंति हि अतो देवैर्दत्तान
न्नादीनेभ्यः देवेभ्यः पंचयज्ञादिभिरदत्वा यो भुंक्ते स तु चोर एव ज्ञेयः अतश्च यजंत एव श्रेष्ठा नेतर इत्याह यज्ञशिष्टाशिन इति वैश्वदे
वादियज्ञावशिष्टं ये अश्नंति ते पंचसूनाकृतैः सर्वैः किल्बिषैर्मुच्यंते पंचसूनाश्च स्मृतावुक्ताः कंडनी पेषणी चुल्ली उदकुंभी च मार्जनी
पंचसूना गृहस्थस्य ताभिः स्वर्गं न विंदति एत्वात्मनो भोजनार्थमेव पचंति न तु वैश्वदेवाद्यर्थं ते पापाः दुराचाराः अघमेव भुंजते १३
जगच्चक्रप्रवृत्तिहेतुत्वादपि कर्म कर्तव्यमित्याह अन्नादिति त्रिभिः अन्नात् शुक्रशोणितरूपेण परिणतान् भूतान् भूतान्युत्पद्यंते अन्न

इष्टान्भोगान्हि वो देवा दास्यंते यज्ञभाविताः तैर्दत्तानप्रदायैभ्यो यो भुंक्ते स्तेन एव सः १२ यज्ञशिष्टाशिनः संतो मुच्यंते सर्व शिष्टा
किल्बिषैः भुंजते ते त्वघं पापा ये पचंत्यात्मकारणात् १३ अन्नाद्भवंति भूतानि पर्जन्यादन्नसंभवः यज्ञाद्भवति
पर्जन्यो यज्ञः कर्मसमुद्भवः १४ कर्म ब्रह्मोद्भवं विद्धि ब्रह्माक्षरसमुद्भवं तस्मात्सर्वगतं ब्रह्म नित्यं यज्ञे प्रतिष्ठितं १५

स्य च संभवः पर्जन्याद्वृष्टेः स च पर्जन्यो यज्ञाद्भवति स च यज्ञः कर्मसमुद्भवः कर्मणा यजमानादिव्यापारेण सम्यक् निष्पद्यत इत्यर्थः अग्नौ
प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजा इत्यादिस्मृतेः १४ तथा कर्म ब्रह्मोद्भवमिति तच्च यजमान
व्यापाररूपं कर्म ब्रह्मोद्भवं विद्धि ब्रह्म वेदः तस्मात्प्रवृत्तं जानीहि तच्च ब्रह्म वेदाख्यं अक्षरात्परब्रह्मणः समुद्भूतं विद्धि अस्य महतो भूत
स्य निश्वसितमेतद्यदृग्वेदो यजुर्वेदः सामवेद इति श्रुतेः यत एवमक्षरादेव यज्ञप्रवृत्तेरतस्तस्याभिप्रेतो यज्ञः तस्मात्सर्वगतमप्यक्षरं
ब्रह्म नित्यं सर्वदा यज्ञे प्रतिष्ठितं यज्ञेनोपायभूतेन प्राप्यत इति यज्ञे प्रतिष्ठितमुच्यते उद्यमस्थाः सदा लक्ष्मीरितिवत् यस्माज्जगच्चक्रमूलं
कर्मैतस्मात्सर्वगतं यज्ञाख्यधर्माद्यैः सर्वैश्वर्यमानाख्यानादियुक्तं
तंरुद्धतमपि वेदाख्यं ब्रह्म सर्वदा यज्ञे तात्पर्येण प्रतिष्ठितं अतो यज्ञादि कर्म कर्तव्यमित्यर्थः १५

यस्मादेवं परमेश्वरेणैव भूतानां पुरुषार्थसिद्ध्यै कर्मादिचक्रं प्रवर्तितं तस्मात्तदकुर्वतो वृथैव जीवितमित्याह एवमिति एवमिति परमेश्वरवाक्यभूताद्वेदाख्यात् ब्रह्मणः पुरुषाणां कर्मणि प्रवृत्तिः ततः कर्मनिष्पत्तिः ततः पर्जन्यः ततोऽन्नं ततो भूतानि भूतानां च पुनस्तथैव कर्मप्रवृत्तिरित्येवं प्रवर्तितं चक्रं यो नानुवर्त्तयति नानुतिष्ठति अघं पापरूपमायुर्यस्य सः यतः इन्द्रियैर्विषयेष्वेव रमते न त्वीश्वराराधनाख्ये कर्मणि अतो मोघं व्यर्थं स जीवति ॥१६॥ तदेवं न कर्मणामनारंभान्नैष्कर्म्यं पुरुषोऽश्नुत इत्यादिनाऽज्ञस्यान्तःकरणशुद्ध्यर्थं कर्मयोगमुक्त्वा ज्ञानिनः कर्मानुपयोगमाह यस्त्विति द्वाभ्यां आत्मन्येव रतिः प्रीतिर्यस्य ततश्चात्मन्येव तृप्तः स्वानुभवेन निर्वृतः अत एव आत्मन्येव संतुष्टः भोगापेक्षारहितो यस्तस्य

एवं प्रवर्तितं चक्रं नानुवर्तयतीह यः। अघायुरिंद्रियारामो मोघं पार्थ स जीवति ॥१६॥

यस्त्वात्मरतिरेव स्यादात्मतृप्तश्च मानवः। आत्मन्येव च संतुष्टस्तस्य कार्यं न विद्यते ॥१७॥

नैव तस्य कृतेनार्थो नाकृतेनेह कश्चन। न चास्य सर्वभूतेषु कश्चिदर्थव्यपाश्रयः ॥१८॥

कर्त्तव्यं नास्ति ॥१७॥ तत्र हेतुमाह नैवेति कृतेन कर्मणा तस्यार्थः पुण्यं नैवास्ति न चाकृतेन कश्चन कोऽपि प्रत्यवायोऽस्ति निरहंकारत्वेन विधिनिषेधातीतत्वात् तथापि तस्मात्तदेषां न प्रियं यदेतन्मनुष्या विद्युरिति श्रुतेः मोक्षे देवकृतविघ्नसंभवात्तत्परिहारार्थं कर्मभिर्देवाः सेव्या इत्याशंक्याह न चेति सर्वभूतेषु ब्रह्मादिस्थावरान्तेषु कश्चिदपि अर्थव्यपाश्रयः आश्रय एव व्यपाश्रयः अर्थे मोक्षे आश्रयणीयोऽस्य नास्तीत्यर्थः विघ्नाभावस्य श्रुत्यैवोक्तत्वात् तथा च श्रुतिः तस्य ह न देवाश्च नाभूत्या ईशते आत्मा ह्येषां स भवतीति चेत्यव्ययमप्यर्थे देवा अपि तस्यात्मत्वप्राप्तस्य अभूत्यै ब्रह्मभावप्रतिबंधाय नेशते न शक्नुवन्तीति श्रुतेरर्थः देवकृतास्तु विघ्नाः सम्यग्ज्ञानोत्पत्तेः प्रागेव यदेतद्ब्रह्म मनुष्या विद्युस्तदेषां देवानां न प्रियमिति ब्रह्मज्ञानस्यैवाप्रियोक्तत्वात्तत्रैव विघ्नकर्तृत्वस्य सूचितत्वात् ॥१८॥

मी

यस्मादेवंभूतस्य ज्ञानिन एव कर्मानुपयोगो नान्यस्य तस्मात्त्वं कर्म कुर्वित्याह तस्मादिति असक्तः फलसंगरहितः सन् कार्यं अवश्यकर्तव्यतया नित्यं नैमित्तिकं कर्म सम्यगाचर हि यस्मात् असक्तः कर्माचरन्पुरुषः परं मोक्षं चित्तशुद्धिज्ञानद्वारा प्राप्नोति १९ अत्र सदाचारं प्रमाणयति कर्मणैवहीति कर्मणैव शुद्धसत्वाः संतः संसिद्धिं सम्यक्ज्ञानं प्राप्ता इत्यर्थः यद्यपि त्वं सम्यक्ज्ञानिनमेवात्मानं मन्यसे तथापि कर्माचरणं भद्रमेवेत्याह लोकसंग्रहः स्वधर्मे प्रवर्तनं मया कर्मणि कृते जनः सर्वोपि करिष्यति अन्यथा ज्ञानी देहत्वान्नाज्ञः कर्म त्यजेदित्येवं लोकरक्षणमपि तावत्प्रयोजनं संपश्यन् कर्म कर्तुमेवार्हसि न तु त्यक्तुमित्यर्थः २० कर्मकरणे लोकसंग्रहो यथा स्यात्तथाह यद्यदिति इतरः प्राकृतो जनोपि

तस्मादसक्तः सततं कार्यं कर्म समाचर असक्तो ह्याचरन्कर्म परमाप्नोति पूरुषः १९ कर्मणैव हि संसिद्धिमास्थिता
जनकादयः लोकसंग्रहमेवापि संपश्यन्कर्तुमर्हसि २० यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः स यत्प्रमाणं कुरु
ते लोकस्तदनुवर्तते २१ न मे पार्थास्ति कर्तव्यं त्रिषु लोकेषु किंचन नानवाप्तमवाप्तव्यं वर्त एव च कर्मणि २२
यदि ह्यहं न वर्तेयं जातु कर्मण्यतंद्रितः मम वर्त्मानुवर्तंते मनुष्याः पार्थ सर्वशः २३ उत्सीदेयुरिमे लोका
न कुर्यां कर्म चेदहं संकरस्य च कर्ता स्यामुपहन्यामिमाः प्रजाः २४ ५ ५ ॥ ५ ॥ ५ ॥ ५ ॥ ५ ॥

अ

तत्तदेवाचरति स श्रेष्ठो जनः कर्मशास्त्रं निवृत्तिशास्त्रं वा यत्प्रमाणं मन्यते तदेव लोकोप्यनुसरति २१ अत्र चाहमेव दृष्टांत इत्याह नमइति त्रिभिः हे पार्थ मे कर्तव्यं नास्ति यतस्त्रिष्वपि लोकेषु प्राप्तं सत् प्राप्यं नास्ति तथापि कर्मणि वर्त्त एव कर्म करोमीत्यर्थः २२ अकरणे लोकस्य नाशं दर्शयति यदीति जातु कदाचित् अतंद्रितो अनलसः सन् यदि कर्मणि न वर्त्तेयं कर्म नानुतिष्ठेयं तर्हि ममैव वर्त्म मार्गं मनुष्या अनुवर्त्तंते अनुवर्त्तेरन्नित्यर्थः २३ ततः किमत आह उत्सीदेयुरिति उत्सीदेयुः कर्मलोपेन नश्येयुः ततश्च वर्णसंकरो भवेत् तस्याप्यहमेव कर्ता स्यां भवेयं एवमहमेव प्रजा उपहन्यां मलिनीकुर्यां २४

सर्वशः सर्वैः प्रकारैः २

तस्मादात्मविदापि लोकसंग्रहार्थं तत्कृपया कर्म कार्यमित्युपसंहरति सक्ता इति कर्मणि सक्ताः अभिनिविष्टाः संतः अज्ञा यथा कर्म कु
र्वंति असक्तः सन् विद्वानपि तथैव कुर्यात् लोकसंग्रहं कर्तुमिछुः २५ ननु कृपया तत्त्वज्ञानमेवोपदेष्टुं युक्तं नेत्याह नबुद्धीति अज्ञा
नां अत एव कर्मसंगिनां कर्मासक्तानां अकर्त्रात्मोपदेशेन बुद्धेर्भेदमन्यथात्वं न जनयेत् कर्मणः सकाशात् बुद्धिचालनं न कुर्यात् अपि तु जो
षयेत् सेवयेत् अज्ञान् कर्माणि कारयेदित्यर्थः कथं युक्तः अवहितो भूत्वा स्वयमाचरन् बुद्धिचालने कृते सति कर्मसु श्रद्धानिवृत्तेर्ज्ञानस्य चानु
त्पत्तेस्तेषामुभयत्रभ्रंशः स्यादित्यर्थः २६ ननु विदुषापि कर्म कर्तव्यं तर्हि विद्वदविदुषोः को विशेष इत्याशंक्योभयविशेषं दर्शयति प्रकृतेरिति

सक्ताः कर्मण्यविद्वांसो यथा कुर्वंति भारत कुर्याद्विद्वांस्तथासक्तश्चिकीर्षुर्लोकसंग्रहं २५ नबुद्धिभेदं जनयेदज्ञानां
कर्मसंगिनां जोषयेत्सर्वकर्माणि विद्वान्युक्तः समाचरन् २६ प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः अहं
कारविमूढात्मा कर्ताहमिति मन्यते २७ तत्त्ववित्तु महाबाहो गुणकर्मविभागयोः गुणा गुणेषु वर्तंत इति मत्वा
न सज्जते २८ प्रकृतेर्गुणसंमूढाः सज्जंते गुणकर्मसु तानकृत्स्नविदो मंदान्कृत्स्नविन्न विचालयेत् २९

द्वाभ्यां प्रकृतेर्गुणैः कार्यैरिंद्रियैः सर्वप्रकारेण क्रियमाणानि यानि कर्माणि तान्यहमेव कर्ता करोमीति मन्यते अत्र हेतुः अहंकारेण इंद्रिया
दिष्वात्माध्यासेन विमूढः आत्मा बुद्धिर्यस्य सः २७ विद्वांस्तु तथा न मन्यत इत्याह तत्त्वविन्त्विति नाहं गुणात्मक इति गुणेभ्य आत्मनो विभा
गः न मे कर्माणीति कर्मभ्योप्यात्मनो विभागः तयोर्गुणकर्मविभागयोर्यस्तत्त्वं वेत्ति स तु न सज्जते कर्तृत्वाभिनिवेशं न करोति तत्र हेतुः गुणा
इंद्रियाणि गुणेषु विषयेषु वर्तंते नाहमिति मत्वा २८ नबुद्धिभेदं जनयेदित्युक्तमुपसंहरति प्रकृतेरिति ये प्रकृतेर्गुणैः सत्त्वादिभिः संमूढाः
संतो गुणेष्विंद्रियेषु तत्कर्मसु च सज्जंते तानकृत्स्नविदो मंदमतीन् कृत्स्नवित् सर्वज्ञो न विचालयेत् २९ ७ श्रीगोपालकृष्णाय नमः ७

तदेवं तत्त्वविदापि कर्म कर्त्तव्यं त्वं तु नाद्यापि तत्त्ववित् अतः कर्मैव कुर्वित्याह मयिसर्वाणीति सर्वाणि कर्माणि मयि संन्यस्य समर्प्य अध्यात्मचे
तसा अंतर्याम्यधीनोहं करोमीति दृष्ट्या निराशीर्निष्कामः अत एव मत्फलसाधनं मदर्थमिदं कर्मेत्येवं ममताशून्यश्च भूत्वा विगतज्वरः त्यक्तशो
कश्च भूत्वा युद्ध्यस्व ३० एवं कर्मानुष्ठाने गुणमाह येमेमतमिति मद्वाक्ये श्रद्धावंतः अनसूयंतः दुःखात्मके कर्मणि प्रवर्त्तयतीति दोषदृष्टि
मकुर्वंतश्च ये मदीयमिदं मतमनुतिष्ठंति तेपि ज्ञानेनो निवत् कर्मभिर्मुच्यंते ३१ विपक्षे दोषमाह येत्वेतदिति येतुनानुतिष्ठंति तानचेतसः वि

मयि सर्वाणि कर्माणि संन्यस्याध्यात्मचेतसा निराशीर्निर्ममो भूत्वा युद्ध्यस्व विगतज्वरः ३०
ये मे मतमिदं नित्यमनुतिष्ठंति मानवाः श्रद्धावंतोनसूयंतो मुच्यंते तेपि कर्मभिः ३१
ये त्वेतदभ्यसूयंतो नानुतिष्ठंति मे मतम् सर्वज्ञानविमूढांस्तान्विद्धि नष्टानचेतसः ३२
सदृशं चेष्टते स्वस्याः प्रकृतेर्ज्ञानवानपि प्रकृतिं यांति भूतानि निग्रहः किं करिष्यति ३३

वेकशून्यान् अत एव सर्वस्मिन्कर्मविषये यज्ज्ञानं तत्र विमूढान् अंधान्विद्धि ३२ ननु तर्हि महाफलत्वादिंद्रियाणि निगृह्य निष्कामाः संतः
सर्वेपि स्वधर्ममेव किं नानुतिष्ठंति तत्राह सदृशमिति प्रकृतिः प्राचीनकर्मसंस्काराधीनः स्वभावः स्वस्याः स्वकीयायाः प्रकृतेः स्वभावस्य स
दृशमनुरूपमेव गुणदोषज्ञानवानपि चेष्टते किं पुनर्वक्तव्यमज्ञश्चेष्टत इति यस्माद्भूतानि सर्वेपि प्राणिनः प्रकृतिं यांति अनुवर्त्तंते एवं च
सति इंद्रियनिग्रहः किं करिष्यति प्रकृतेर्बलिष्ठत्वादित्यर्थः ३३ श्रीगोपालकृष्णाय नमः ॥ ॥ ॥ श्रीनर्मदादेव्यै नमः ॥

स्रोतःपातवत्   सर्वथा रागद्वेषौ त्याज्याविति भावः

नन्वेवं प्रकृत्यधीनैव चेत्पुरुषस्य प्रवृत्तिस्तर्हि विधिनिषेधवैयर्थ्यं प्राप्तमित्याशंक्याह। इंद्रियस्येति। इंद्रियस्येंद्रियस्येति वीप्सया प्रत्येकं सर्वेषामिंद्रियाणामित्युक्तं। अर्थे स्वस्य विषये अनुकूले रागः प्रतिकूले द्वेष इत्येवं रागद्वेषौ व्यवस्थितौ अवश्यंभाविनौ ततश्च तदनुरूपा प्रवृत्तिरिति भूतानां प्रकृतिः तथापि तयोर्वशवर्तिना न भवेदिति शास्त्रेण नियम्यते हि यस्मादस्य मुमुक्षोस्तौ परिपंथिनौ प्रतिपक्षौ अयं भावः विषयस्मरणादिना रागद्वेषावुत्पाद्यानवहितं पुरुषमनर्थगंभीरस्रोतसीव प्रकृतिर्बलात् प्रवर्त्तयति शास्त्रं तु ततः प्रागेव विषयेषु रागद्वेषप्रतिबंधके परमेश्वरभजनादौ प्रवर्त्तयति ततश्च गंभीरस्रोतःपातात्पूर्वमेव नावमाश्रित इव नानर्थं प्राप्नोति ३४ तदेवं स्वाभाविकीं प्रत्यादि

इंद्रियस्येंद्रियस्यार्थे रागद्वेषौ व्यवस्थितौ तयोर्न वशमागच्छेत्तौ ह्यस्य परिपंथिनौ ३४

श्रेयान्स्वधर्मो विगुणः परधर्मात्स्वनुष्ठितात् स्वधर्मे निधनं श्रेयः परधर्मो भयावहः ३५

अर्जुन उवाच अथ केन प्रयुक्तोयं पापं चरति पूरुषः अनिच्छन्नपि वार्ष्णेय बलादिव नियोजितः ३६

सद्धर्मप्रवृत्तिः स्वकीयधर्मे प्रवर्तितव्यमित्युक्तं तर्हि स्वधर्मस्य युद्धादेर्दुःखरूपस्य यथावत्कर्तुमशक्यत्वात् परधर्मस्य च अहिंसादेः सुकरत्वात् धर्मत्वाविशेषाच्च तत्र प्रवर्तितुमिच्छंतं प्रत्याह श्रेयानिति। किंचिदंगहीनोपि स्वधर्मः श्रेयान् प्रशस्यतरः अनुष्ठितात् सकलांगसंपूर्त्या कृतात् परधर्मात् सकाशात्। तत्र हेतुः स्वधर्मे युद्धादौ प्रवर्त्तमानस्य निधनं मरणमपि श्रेष्ठं स्वर्गादिप्रापकत्वात् परधर्मस्तु परस्य भयावहः निषिद्धत्वेन नरकप्रापकत्वात् ३५ तयोर्न वशमागच्छेदित्युक्तं तदेतदशक्यं मन्वानो अर्जुन उवाच अथ केनेति हे वृष्णिवंशेऽवतीर्णत्वाद्वार्ष्णेयः हे वार्ष्णेय अनर्थरूपं पापं कर्तुमनिच्छन्नपि केन प्रयुक्तः प्रेरितोयं पुरुषः पापं चरति कामक्रोधौ विवेकबलेन निरुंधतोपि पुरुषस्य पुनः पापे प्रवृत्तिदर्शनात्

भ०गी०टी०

२२

अत्रोत्तरं श्रीभगवानुवाच काम एष इति यस्त्वया पृष्टो हेतुः एष काम एव ननु क्रोधोऽपि पृथगुक्तः इन्द्रियस्येन्द्रियस्यार्थे इत्यत्र सत्यं नासौ ततः पृथक् किन्तु क्रोधोऽप्येष एव काम एव हि केनचित्प्रतिहतः क्रोधात्मना परिणमते अतः पूर्वं पृथक्त्वेनोक्तोऽपि क्रोधः कामजय एव क्रोधजय इत्यभिप्रायेण कामेनैकीकृत्योच्यते रजोगुणात्समुद्भवतीति तथा अनेन सत्त्ववृद्ध्या रजसि क्षयं नीते कामो विक्षीयत इत्युक्तं एनं काममिह मोक्षमार्गे वैरिणं विद्धि अयं च वक्ष्यमाणक्रमेण हन्तव्य एव यतो नासौ दानेन संधातुं शक्य इत्याह महाशनः महदशनं यस्य दुःपूर इत्यर्थः न च साम्ना संधातुं शक्यः यतो महापाप्मा अत्युग्रः ३७ कामस्य वैरित्वं दर्शयति धूमेनेति सहजेन वह्निराव्रियते आच्छाद्यते यथा चादर्शो मलेनागन्तुकेन यथा उल्बेन गर्भवेष्टनचर्मणा गर्भः सर्व

श्रीभगवानुवाच काम एष क्रोध एष रजोगुणसमुद्भवः महाशनो महापाप्मा विद्ध्येनमिह वैरिणं ३७ धूमेनाव्रियते वह्निर्यथादर्शो मलेन च यथोल्बेनावृतो गर्भस्तथा तेनेदमावृतं ३८ आवृतं ज्ञानमेतेन ज्ञानिनो नित्यवैरिणा कामरूपेण कौन्तेय दुष्पूरेणानलेन च ३९ इन्द्रियाणि मनो बुद्धिरस्याधिष्ठानमुच्यते एतैर्विमोहयत्येष ज्ञानमावृत्य देहिनं ४०

तो निरुद्धावृतः तथा प्रकारत्रयेणापि तेन कामेनावृतमिदं ३८ इदं शब्दनिर्दिष्टं दर्शयन् वैरित्वं स्फुटयति आवृतमिति इदं विवेकज्ञानं एतेनावृतं अज्ञस्य खलु भोगसमये कामः सुखहेतुरेव परिणामे तु वैरितां प्रपद्यते ज्ञानिनः पुनस्तत्कालमप्यनर्थानुसंधानात् दुःखहेतुरेवेति नित्यवैरिणेत्युक्तं किंच विषयैः पूर्यमाणोऽपि यो दुःपूरः अपूर्यमाणस्तु शोकसंतापहेतुत्वादनलतुल्यः अनेन सर्वान्प्रति नित्यवैरित्वमुक्तं ३९ इदानीं तस्याधिष्ठानं कथयन् जयोपायमाह इन्द्रियाणीति द्वाभ्यां विषयैर्दर्शनश्रवणादिभिः संकल्पेनाध्यवसायेन च कामस्याविर्भावात् इन्द्रियाणि च मनश्च बुद्धिश्चास्याधिष्ठानमुच्यते एतैरिन्द्रियादिभिर्दर्शनादिव्यापारवद्भिराश्रयभूतैर्विवेकज्ञानमावृत्य देहिनं विमोहयति ४० ५ श्रीकृष्ण

श्रीः

२२

यस्मादेवं तस्मादिति आदौ विमोहात्पूर्वमेवेंद्रियाणि मनो बुद्धिं च नियम्य पाप्मानमेनं कामं हि स्फुटं प्रजहिहि घातय यद्वा प्रजहिहि परित्यज ज्ञान
मात्मविषयं विज्ञानं शास्त्रीयं तयोर्नाशकं यद्वा ज्ञानं शास्त्राचार्योपदेशजं विज्ञानं निदिध्यासनं विज्ञाय प्रज्ञां कुर्वीतेति श्रुतेः ४१ यत्र चित्तप्रणि
धानेनेंद्रियाणि नियंतुं शक्यंते एनं दात्मनः स्वरूपं देहादिभ्यो विविच्य दर्शयति इंद्रियाणीति इंद्रियाणि देहादिभ्यो ग्राह्येभ्यः पराणि श्रेष्ठान्या
हुः सूक्ष्मत्वात्प्रकाशकत्वाच्च अत एव तद्व्यतिरिक्तत्वमप्यर्थादुक्तं भवति इंद्रियेभ्यश्च संकल्पात्मकं मनः परं तत्प्रवर्तकत्वात् मनसस्तु ब

तस्मात्त्वमिंद्रियाण्यादौ नियम्य भरतर्षभ पाप्मानं प्रजहिह्येनं ज्ञानविज्ञाननाशनं ४१ इंद्रिया
णि पराण्याहुरिंद्रियेभ्यः परं मनः मनसस्तु परा बुद्धिर्यो बुद्धेः परतस्तु सः ४२ एवं बुद्धेः परं बुध्वा
संस्तभ्यात्मानमात्मना जहि शत्रुं महाबाहो कामरूपं दुरासदं ४३ ॥ इति श्रीमद्भगवद्गीता
सूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे कर्मयोगो नाम तृतीयोध्यायः ३ ॥

द्धिर्निश्चयात्मिका परा निश्चयपूर्वकत्वात् संकल्पस्य यस्तु बुद्धेः परतस्तत्साक्षित्वेनावस्थितः सर्वांतरः स आत्मा विमोहयति देहिनमि
ति देहिशब्देनोक्त आत्मा इति परामृश्यते ४२ उपसंहरति एवमिति बुद्धेरेव विषयेंद्रियादिजन्याः कामादिविक्रियाः आत्मा तु निर्विकार
स्तत्साक्षीत्येवं बुद्धेः परमात्मानं बुध्वा आत्मना एवंभूतनिश्चयात्मिकया बुद्ध्या आत्मानं मनः संस्तभ्य निश्चलं कृत्वा कामरूपं शत्रुं जहि मारय
दुरासदं दुःखेनासादनीयं दुर्विज्ञेयगतिमित्यर्थः स्वधर्मेण यमाराध्य भक्त्या मुक्तिमिता बुधाः तं कृष्णं परमानंदं तोषयेत्सर्वकर्मभिः ४३ ॥

इति श्रीभगवद्गीतासु कर्मयोगो नाम तृतीयोध्यायः ३

एवंतावदध्यायद्वयेनकर्मयोगोपायोज्ञानयोगोमोक्षसाधनत्वेनोक्तः तमेवब्रह्मार्पणादिगुणविधानेनतत्त्वंपदार्थविवेकादिनाचप्रपं
चयिष्यन्प्रथमंतावत्स्वरंपराप्राप्तत्वेनस्तुवन्श्रीभगवानुवाच इममितित्रिभिः अव्ययफलत्वादव्ययंइमंयोगंपुराहंविवस्वतेआदित्या
यकथितवान् सचस्वपुत्रायमनवेश्राद्धदेवायप्राह सचमनुःस्वपुत्रायइक्ष्वाकवेऽब्रवीत् १ एवमिति राजानश्चतेऋषयश्चअन्येपिराजर्षयो
निमिप्रमुखाः स्वपित्रादिभिरिक्ष्वाकुप्रमुखैःप्रोक्तमिमंयोगंविदुःजानंति अद्यतनानामज्ञानेकारणमाह हेपरंतपमहताकालेनसयोगःका

श्रीभगवानुवाच इमंविवस्वतेयोगंप्रोक्तवानहमव्ययं विवस्वान्मनवेप्राहमनुरिक्ष्वाकवेब्रवीत् १
एवंपरंपराप्राप्तमिमंराजर्षयोविदुः सकालेनेहमहतायोगोनष्टःपरंतप २ सएवायंमया
तेद्ययोगःप्रोक्तःपुरातनः भक्तोसिमेसखाचेतिरहस्यंह्येतदुत्तमं ३ अर्जुनउवाच
अपरंभवतोजन्मपरंजन्मविवस्वतः कथमेतद्विजानीयांत्वमादौप्रोक्तवानिति ४ ५

लवशादिहलोकेनष्टःविच्छिन्नः २ सएवायमिति सएवायंयोगोद्यविच्छिन्नेसंप्रदायेसतिपुनश्चमयातेतुभ्यमुक्तः यतस्त्वंममभक्तोसि
सखाचइत्यन्यस्मैमयानोच्यतेहि यस्मादिदमुत्तमंरहस्यं ३ भगवतोविवस्वंतंप्रतियोगोपदेशासंभवंपश्यन्नर्जुनउवाच अपरमि
ति अपरंअर्वाचीनंतवजन्मपरंप्राक्कालीनंविवस्वतोजन्मतस्मात्तवाधुनिकत्वाच्चिरंतनायविवस्वतेऽहमादौयोगंप्रोक्तवानित्ये
तत्कथमहंविजानीयांज्ञातुंशक्नुयामिति ४ ५

इति पृष्टवन्तमर्जुनं कृष्णान्तरेणोपदिष्टवानित्यभिप्रायेणोत्तरं श्रीभगवानुवाच बहूनीति मम बहूनि जन्मानि तव च व्यतीतानि तानि सर्वा
ण्यहं वेद जानामि अलुप्तविद्याशक्तित्वात् त्वं तु न जानासि अविद्यावृतत्वात् ॥ ५ ॥ ननु अनादेस्तव कुतो जन्म अविनाशिनश्च कथं पुनः पुनर्ज
न्म येन बहूनि व्यतीतानीत्युच्यते ईश्वरस्य तव पापपुण्यविहीनस्य कथं जीववज्जन्मेत्यत आह अजोपीति सत्यमेवं तथापि अजोपि सन्नहं
तथा अव्ययात्मापि अनश्वरस्वभावोपि सन् तथा ईश्वरोपि कर्मपारतंत्र्यरहितोपि सन् स्वमायया संभवामि सम्यगप्रच्युतज्ञानबलवीर्यादिशक्त्यै

श्रीभगवानुवाच बहूनि मे व्यतीतानि जन्मानि तव चार्जुन तान्यहं वेद सर्वाणि न त्वं वेत्थ परं
तप ॥ ५ ॥ अजोपि सन्नव्ययात्मा भूतानामीश्वरोपि सन् प्रकृतिं स्वामधिष्ठाय संभवाम्यात्म
मायया ॥ ६ ॥ यदा यदा हि धर्मस्य ग्लानिर्भवति भारत अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्य
हं ॥ ७ ॥ परित्राणाय साधूनां विनाशाय च दुष्कृतां धर्मसंस्थापनार्थाय संभवामि युगे युगे ॥ ८ ॥

व भवामि ननु तथापि षोडशकलात्मकलिंगशून्यस्य तव कुतो जन्मेत्यत उक्तं स्वां शुद्धसत्वात्मिकां प्रकृतिमधिष्ठाय स्वीकृत्य विशुद्धोर्जितसत्वमूर्त्या
स्वेच्छया अवतरामीत्यर्थः ॥ ६ ॥ कदा संभवसीत्यपेक्षायामाह यदा यदेति ग्लानिर्हानिः अभ्युत्थानमधिक्यं ॥ ७ ॥ किमर्थमित्यपेक्षायामाह परि
त्राणायेति साधूनां स्वधर्मवर्तिनां रक्षणाय दुष्टं कर्म कुर्वंतीति दुष्कृतस्तेषां वधाय च एवं धर्मस्य संस्थापनार्थाय साधुरक्षणेन दुष्टवधेन च धर्मं स्थि
रीकर्तुं युगे युगे तत्तदवसरे संभवामीत्यर्थः न चैवं दुष्टनिग्रहं कुर्वतोपि नैर्घृण्यं शंकनीयं तथाचाहुः लालने ताडने मातुर्नाकारुण्यं यथार्भके तद्वदेव महे

एवंविधानामीश्वरजन्मकर्मणां ज्ञाने फलमाह जन्मकर्मेति मे जन्म स्वेच्छाकृतं कर्म च धर्मपालनरूपं दिव्यमलौकिकं तत्त्वतः परानुग्रहार्थमेवेति यो वेत्ति स देहाभिमानं त्यक्त्वा पुनर्जन्म नैति न प्राप्नोति किंतु मामेव प्राप्नोति ९ कथं जन्मकर्मज्ञानेन त्वत्प्राप्तिः स्यादित्यत्राह वीतरागेति अहं शुद्धसत्त्वावतारैर्धर्मपरिपालनं करोमीति मदीयं परमकारुणिकत्वं ज्ञात्वा वीताः विगता रागभयक्रोधा येभ्यस्ते विक्षेपाभावात् मन्मया मदेकचित्ता भूत्वा मामेवोपाश्रिताः संतो मत्प्रसादलभ्यं यदात्मज्ञानं तपश्च तत्परिपाके हेतुः स्वधर्मः तयोर्द्वंद्वैकवद्भावः तेन ज्ञानतपसा पूताः शुद्धाः निरस्ताज्ञानतत्कार्यमलाः मद्भावं मत्सायुज्यं प्राप्ता बहवः न त्वधुनैव प्रवृत्तोयं मद्भक्तिमार्ग इत्यर्थः तदेवं तान्यहं वेद सर्वाणीत्यादिना विद्यो

जन्म कर्म च मे दिव्यमेवं यो वेत्ति तत्त्वतः त्यक्त्वा देहं पुनर्जन्म नैति मामेति सोर्जुन ९
वीतरागभयक्रोधा मन्मया मामुपाश्रिताः बहवो ज्ञानतपसा पूता मद्भावमागताः १०
ये यथा मां प्रपद्यंते तांस्तथैव भजाम्यहं मम वर्त्मानुवर्त्तंते मनुष्याः पार्थ सर्वशः ११

विद्योपाधिभ्यां तत्त्वंपदार्थौ ईश्वरजीवौ प्रदर्श्य ईश्वरस्य चाविद्याभावेन नित्यशुद्धत्वात् जीवस्य चेश्वरप्रसादलब्धज्ञानेनाज्ञाननिवृत्तेः शुद्धस्य सतश्चिदंशेनतदैक्यमुक्तमिति द्रष्टव्यं १० ननु तर्हि किं त्वयापि वैषम्यमस्ति यस्मादेवं त्वदेकशरणानामेवात्मभावं ददासि नान्येषां सकामानामिति तत्राह ये यथेति यथा येन प्रकारेण सकामतया निष्कामतया वा ये मां भजंति तानहं तथैव तदपेक्षितफलदानेन भजामि अनुगृह्णामि न तु सकामा मां विहाय इंद्रादीनेव भजंतीति तानहमुपेक्ष इति मंतव्यं यतः सर्वप्रकारैरिंद्रादिसेवका अपि ममैव वर्त्म मार्गमनुवर्त्तंते इंद्रादिरूपेणापि ममैव सेव्यत्वात् ११

तर्हि मोक्षार्थमेव किमिति सर्वे न भजंतीत्यत्राह कांक्षंत इति कर्मणां सिद्धिं फलं कांक्षंतः प्रायशः इह मनुष्यलोके इंद्रादिदेवता एव भजंते न तु सा
क्षान्मामेव हि यस्मात् कर्मजा सिद्धिः कर्मफलं शीघ्रं भवति न तु ज्ञानफलं कैवल्यं ज्ञानस्य दुःप्रापत्वात् १२ ननु च केचित्सकामतया प्रवर्त्तं
ते केचिन्निष्कामतयेति कर्मवैचित्र्यं तत्कर्तृणां च ब्राह्मणादीनां उत्तममध्यमादिवैचित्र्यं कुर्वतस्तव कथं वैषम्यं नास्तीत्याशंक्याह चातुर्वर्ण्यमि
ति चत्वारो वर्णा एव चातुर्वर्ण्यं स्वार्थे ष्यञ् प्रत्ययः अयमर्थः सत्वप्रधाना ब्राह्मणास्तेषां च शमदमादीनि कर्माणि सत्वरजःप्रधानाः क्षत्रियाः तेषां च

कांक्षंतः कर्मणां सिद्धिं यजंत इह देवताः क्षिप्रं हि मानुषे लोके सिद्धिर्भवति कर्मजा १२
चातुर्वर्ण्यं मया सृष्टं गुणकर्मविभागशः तस्य कर्तारमपि मां विद्ध्यकर्तारमव्ययं १३
न मां कर्माणि लिंपंति न मे कर्मफले स्पृहा इति मां योऽभिजानाति कर्मभिर्न स बध्यते १४

शौर्ययुद्धादीनि कर्माणि रजस्तमःप्रधाना वैश्यास्तेषां कृषिवाणिज्यादीनि कर्माणि तमःप्रधानाः शूद्रास्तेषां च त्रैवर्णिकशुश्रूषादि कर्माणि ए
वं गुणानां कर्मणां च विभागैश्चातुर्वर्ण्यं मयैव सृष्टमिति सत्यं तथाप्येवं तस्य कर्त्तारमपि फलतोऽकर्त्तारमेव मां विद्धि तत्र हेतुः अव्ययं आसक्ति
राहित्येन श्रमरहितं १३ तदेवं दर्शयन्नाह न मामिति कर्माणि विश्वसृष्ट्यादीन्यपि मां न लिंपंति आसक्तं न कुर्वंति निरहंकारत्वात् ग
आप्तकामत्वेन मम कर्मफले स्पृहाभावाच्च मां न लिंपंतीति किमु वक्तव्यं यतः कर्मफलस्पृहाराहित्येन मां योऽभिजानाति सोऽपि कर्मभिर्न
बध्यते मम निर्लेपत्वे कारणं निरहंकारत्वनिस्पृहत्वादिकं जानतस्तस्याप्यहंकारादिशैथिल्यात् १४

येयथामांप्रपद्यंतइत्यादिभिश्चतुर्भिःश्लोकैःप्रासंगिकमीश्वरस्यवैषम्यंपरिहृत्यपूर्वोक्तमेवकर्मयोगंप्रपंचयतुंसंस्मारयति एवमिति अहं
कारादिराहित्येनकृतंकर्मबंधकंनभवतीत्येवंज्ञात्वापूर्वैर्जनकादिभिरपिमुमुक्षुभिःसत्वशुद्ध्यर्थंपूर्वतरंयुगांतरेष्वपिकृतंतस्मात्त्वंप्रथमं
कर्मैवकुरु १५ तच्चतत्त्वविद्भिःसहविचार्यकर्तव्यंनलोकपरंपरामात्रेणेत्याह किंकर्मेति किंकर्मकीदृशंकर्मकरणं किमकर्मकीदृशं
कर्माकरणमित्यस्मिन्नर्थेविवेकिनोपिमोहिताः अतोयज्ज्ञात्वाऽनुष्ठायअशुभात्संसारात्मोक्ष्यसेमुक्तोभविष्यसि तत्कर्मअकर्मचतु

एवंज्ञात्वाकृतंकर्मपूर्वैरपिमुमुक्षुभिः कुरुकर्मैवतस्मात्त्वंपूर्वैःपूर्वतरंकृतं १५
किंकर्मकिमकर्मेतिकवयोप्यत्रमोहिताः तत्तेकर्मप्रवक्ष्यामियज्ज्ञात्वामोक्ष्यसेशुभात् १६
कर्मणोह्यपिबोद्धव्यंबोद्धव्यंचविकर्मणः अकर्मणश्चबोद्धव्यंगहनाकर्मणोगतिः १७

भ्यस्तु १६ ननुलोकप्रसिद्धमेवकर्मदेहादिव्यापारात्मकं अकर्मचतदव्यापारात्मकं अतःकथमुच्यते कवयोप्यत्रमोहिता इति तत्राह
कर्मणइति कर्मणःविहितव्यापारस्यापितत्त्वंबोद्धव्यमस्तिनतुलौकिकप्रसिद्धमात्रमेव अकर्मणःअव्यापारस्यापितत्त्वंबोद्धव्यमस्ति
विकर्मणोनिषिद्धस्यापितत्त्वंबोद्धव्यमस्ति यतःकर्मणोगतिर्गहना कर्मणइत्युपलक्षणार्थंकर्माकर्मविकर्मणांतत्त्वंदुर्विज्ञेयमित्यर्थः १७

तदेवकर्मादीनांदुर्विज्ञेयंतत्त्वंदर्शयन्नाह कर्मण्यकर्मेति परमेश्वराराधनलक्षणेकर्मणिविषयेअकर्मकर्मेदंनभवतिइतियःपश्येत् तस्य
ज्ञानहेतुत्वेनबंधकत्वाभावात् अकर्मणिचविहिताकरणेकर्मयःपश्येत् प्रत्यवायापादकत्वेनबंधहेतुत्वात् मनुष्येषुकर्मकुर्वाणेषुसबुद्धि
मान् व्यवसायात्मकबुद्धिमत्त्वाच्छ्रेष्ठः तंस्तौति सयुक्तःयोगीतेनकर्मणाज्ञानयोगावाप्तेः सएवकृत्स्नकर्मकर्त्ताच सर्वतःसंप्लुतोदकस्था
नीयेतस्मिन्कर्मणिसर्वकर्मफलानामंतर्भूतत्वात् तदेवमारुरुक्षोःकर्मयोगाधिकारावस्थायांनकर्मणामनारंभादित्यादिनोक्तएवक
र्मयोगःस्फुटीकृतः तत्प्रपंचरूपत्वाच्चास्यप्रकरणस्यनपौनरुक्त्यदोषः अनेनैवयोगारूढावस्थायांयस्त्वात्मरतिरेवस्यादित्यादि
नायःकर्मानुपयोगउक्तस्तस्याप्यर्थात्प्रपंचःकृतोवेदितव्यः यदाआरुरुक्षोरपिकर्मबंधकंनभवति तदाआरूढस्यकुतोबंधकंस्यादि

कर्मण्यकर्मयःपश्येदकर्मणिचकर्मयः सबुद्धिमान्मनुष्येषुसयुक्तःकृत्स्नकर्मकृत् १८

यत्त्वापिश्लोकोयोज्यते कर्मणिदेहेंद्रियादिव्यापारेवर्त्तमानेपिआत्मनोदेहादिव्यतिरेकानुभवेनअकर्मस्वाभाविकंनैष्कर्म्यमेवयःप
श्येत् तथाअकर्मणिचज्ञानरहितेदुःखबुद्ध्याकर्मत्यागेकर्मयःपश्येत् तस्यप्रतिबंधकत्वेनमिथ्याचारत्वात् तदुक्तं कर्मेंद्रियाणिसं
यम्ययआस्तेमनसास्मरन्नित्यादि यएवंभूतःसतुसर्वेषुमनुष्येषुबुद्धिमान्पंडितः तत्रहेतुः यतःकृत्स्नानिसर्वाणियदृच्छाप्राप्तान्याहारा
दीनिकर्माणिकुर्वन्नपिसयुक्तएव अकर्त्तात्मज्ञानेनसमाधिस्थएवेत्यर्थः अनेनैवज्ञानिनःस्वभावादापन्नंकलंजभक्षणादिकंनदो
षः अज्ञस्यतुरागतःकृतदोषइतिविकर्मणोपितत्त्वंनिरूपितंद्रष्टव्यं १८ ७ श्रीपुराणपुरुषोत्तमायनमः ७ श्रीनर्मदादेव्यैनमः

भ०गी०टी०

२५

कर्मण्यकर्म यः पश्येदिति श्लोकार्थाभ्यां यदुक्तमर्थद्वयं तदेव स्पष्टयति यस्येत्यादिपंचभिः सम्यगारभ्यंत इति समारंभाः कर्माणि काम्यंत इति कामाः फलं तत्संकल्पेन वर्जिता यस्य भवंति तं पंडितमाहुः यतस्तैः समारंभैः शुद्धे चित्ते सति जाते न ज्ञानाग्निना दग्धानि अकर्मतां नीतानि कर्माणि यस्य तं आरूढावस्थायां तु कामः फलविषयः तदर्थमिदं कर्तव्यमिति कर्मविषयः संकल्पश्च ताभ्यां वर्जिताः शेषं स्पष्टं १९ किंच त्यक्त्वेति कर्मणि तत्फले चासक्तिं त्यक्त्वा नित्येन निजानंदेन तृप्तः अत एव योगक्षेमार्थमाश्रयणीयरहितः एवंभूतो यः स स्वाभावि

यस्य सर्वे समारंभाः कामसंकल्पवर्जिताः ज्ञानाग्निदग्धकर्माणं तमाहुः पंडितं बुधाः १९
त्यक्त्वा कर्मफलासंगं नित्यतृप्तो निराश्रयः कर्मण्यभिप्रवृत्तोपि नैव किंचित्करोति सः २०
निराशीर्यतचित्तात्मा त्यक्तसर्वपरिग्रहः शारीरं केवलं कर्म कुर्वन्नाप्नोति किल्बिषं २१

के विहिते वा कर्मणि अभितः प्रवृत्तोपि किंचिदपि नैव करोति तस्य कर्माकर्मतामापद्यत इत्यर्थः २० किंच निराशीरिति निर्गता आशिषः कामना यस्मात् यतं नियतं चित्तं आत्मा च शरीरं यस्य त्यक्ताः सर्वे परिग्रहा येन सः शारीरं शरीरमात्रनिर्वर्त्यं कर्तृत्वाभिनिवेशरहितम् कर्म कुर्वन्नपि किल्बिषं बंधनं न प्राप्नोति योगारूढपक्षे शरीरनिर्वाहमात्रोपयोगी स्वाभाविकं भिक्षाटनादि कुर्वन्नपि किल्बिषं विहिताकरणनिमित्तं दोषं न प्राप्नोतीति २१

श्रीः

किंच यदृच्छेति अप्रार्थितोपस्थितो लाभो यदृच्छालाभस्तेन संतुष्टः द्वंद्वातीतः शीतोष्णादीन्यतिक्रांतः तत्सहनशील इत्यर्थः विमत्सरो निर्वैरः यदृच्छालाभस्यापि सिद्धावसिद्धौ च समः हर्षविषादरहितः य एवंभूतः स पूर्वोक्तभूमिकयोर्यथायथं विहितं स्वाभाविकं वा कर्म कृत्वापि न बंधं प्राप्नोति २२ किंच गतसंगस्य निष्कामस्य रागादिभिर्मुक्तस्य ज्ञाने अवस्थितं चेतो यस्य तस्य यज्ञाय परमेश्वरार्थं कर्माचरतः समग्रं सवासनं कर्म प्रविलीयते अकर्मभावमापद्यते आरूढयोगपक्षे यज्ञायेति यज्ञसंरक्षणार्थं लोकसंग्रहार्थमेव कर्म कुर्वत इत्यर्थः २३

यदृच्छालाभसंतुष्टो द्वंद्वातीतो विमत्सरः समः सिद्धावसिद्धौ च कृत्वापि न निबध्यते २२

गतसंगस्य मुक्तस्य ज्ञानावस्थितचेतसः यज्ञायाचरतः कर्म समग्रं प्रविलीयते २३

ब्रह्मार्पणं ब्रह्म हविर्ब्रह्माग्नौ ब्रह्मणा हुतं ब्रह्मैव तेन गंतव्यं ब्रह्मकर्मसमाधिना २४

तदेवं परमेश्वराराधनलक्षणं कर्म ज्ञानहेतुत्वेन बंधकत्वाभावात् अकर्मैव आरूढावस्थायां त्वकर्त्रात्मज्ञानबाधितत्वात्स्वाभाविकमपि कर्म अकर्मैवेति कर्मण्यकर्म यः पश्येदित्यनेनोक्तः कर्मप्रविलयः प्रपंचितः इदानीं कर्मणि तदंगेषु च ब्रह्मैवानुस्यूतं पश्यतः कर्मप्रविलयमाह ब्रह्मार्पणमिति अर्प्यते अनेनेत्यर्पणं जुह्वादि तदपि ब्रह्मैव अर्प्यमाणं हविरपि घृतादिकं ब्रह्मैव ब्रह्मैवाग्निस्तस्मिन् ब्रह्मणा कर्त्रा हुतं होमः अग्निश्च कर्ता च क्रिया च ब्रह्मैवेत्यर्थः एवं ब्रह्मण्येव कर्मात्मके समाधिश्चित्तैकाग्र्यं यस्य तेन ब्रह्मैव गंतव्यं प्राप्यं न तु फलांतरमित्यर्थः २४

गुंफितं २

एतदेव यज्ञत्वेन संपादितं सर्वं ब्रह्मदृष्टिलक्षणं ज्ञानं सर्वयज्ञोपायप्राप्यत्वात् सर्वयज्ञेभ्यः श्रेष्ठमित्येवं स्तोतुमधिकारिभेदेन यज्ञोपायभू
तान्बहून्यज्ञानाह दैवमित्यादिभिरष्टाभिः देवा इंद्रवरुणादय इज्यंते ऽस्मिन् एवंकारे येनेंद्रादिषु ब्रह्मबुद्धिराहित्यं दर्शितं तं दैवं यज्ञं अपरे क
र्मयोगिनः पर्युपासते श्रद्धयानुतिष्ठंति अपरे तु ज्ञानयोगेन ब्रह्मरूपेऽग्नौ यज्ञेनैवोपायेन ब्रह्मार्पणमित्युक्तप्रकारेण यज्ञमुपजुह्वति यज्ञा
दि सर्वं कर्म ब्रह्मणि प्रविलापयंतीत्यर्थः सोऽयं ज्ञानयज्ञः २५ श्रोत्रादीनीति अन्ये नैष्ठिकब्रह्मचारिणस्तत्तदिंद्रियसंयमरूपेष्वग्निषु श्रो
त्रादीनि जुह्वति प्रविलापयंति इंद्रियाणि निरुध्य संयमप्रधानास्तिष्ठंतीत्यर्थः इंद्रियाण्येवाग्नयस्तेषु शब्दादीनन्ये गृहस्थाजुह्वति ×

दैवमेवापरे यज्ञं योगिनः पर्युपासते ब्रह्माग्नावपरे यज्ञं यज्ञेनैवोपजुह्वति २५
श्रोत्रादीनींद्रियाण्यन्ये संयमाग्निषु शब्दादीन्विषयानन्य इंद्रियाग्निषु जुह्वति २६
सर्वाणींद्रियकर्माणि प्राणकर्माणि चापरे आत्मसंयमयोगाग्नौ जुह्वति ज्ञानदीपिते २७

विषयभोगसमयेप्यनासक्ताः संतोऽग्नित्वेन भावितेष्विंद्रियेषु हवित्वेन भावितान् शब्दादीन् प्रक्षिपंतीत्यर्थः २६ सर्वाणीति अपरे ध्यान
निष्ठाः बुद्धींद्रियाणां श्रोत्रादीनां कर्माणि श्रवणदर्शनादीनि कर्मेंद्रियाणां वाक्पाण्यादीनां कर्माणि वचनोपादानादीनि प्राणानां च दशा
नां कर्माणि प्राणस्य बहिर्गमनं अपानस्याधोनयनं व्यानस्य व्यानयनं आकुंचनप्रसारणादि समानस्याशितपीतानां सम्यङ्नयनं उदानस्योर्ध्व
नयनं उद्गारे नाग आख्यातः कूर्म उन्मीलने स्मृतः कृकरः क्षुतकृज्ज्ञेयो देवदत्तो विजृंभणे न जहाति मृतं चापि सर्वव्यापी धनंजयः इत्येवंरूपाणि जु
ह्वति कं आत्मनि संयमो ध्यानैकाग्र्यं स एव योगः स एवाग्निस्तस्मिन् ज्ञानेन ध्येयविषयेण दीपितेऽग्निं सम्यक् ज्ञात्वा तस्मिन्मनः संयम्य तानि सर्वाणि कर्माण्युपरमयंतीत्यर्थः २७

प्रज्वालिते

किंच द्रव्येति द्रव्यदानमेव यज्ञो येषां ते द्रव्ययज्ञाः कृच्छ्रचान्द्रायणादि तप एव यज्ञो येषां ते तपोयज्ञाः योगश्चित्तवृत्तिनिरोधलक्षणः समाधिः स एव यज्ञो येषां ते योगयज्ञाः स्वाध्यायेन वेदेन श्रवणमननादिना यत्तदर्थज्ञानं स एव यज्ञो येषां ते अथवा वेदपाठयज्ञास्तदर्थज्ञानयज्ञाश्चेति द्विविधा यतयः प्रयत्नशीलाः सम्यक् शितं निशितं तीक्ष्णीकृतं व्रतं येषां ते २८ किंच अपान इति अपानेऽधोवृत्तौ प्राणमूर्ध्ववृत्तिं पूरकेण जुह्वति पूरककाले प्राणमपानेनैकीकुर्वंति तथा कुंभकेन प्राणापानयोरूर्ध्वाधोगती रुध्वा रेचककाले अपानं प्राणे जुह्वति एवं पूरककुंभकरेचकैः प्राणायामपरायणा अपरे इत्यर्थः २९ किंच अपर इति अपरे त्वाहारसंकोचमभ्यसंतः स्वयमेव जीर्यमाणेष्विंद्रियेषु तत्तदिंद्रियवृत्तिलयं होमं भाव-

द्रव्ययज्ञास्तपोयज्ञा योगयज्ञास्तथापरे । स्वाध्यायज्ञानयज्ञाश्च यतयः संशितव्रताः २८
अपाने जुह्वति प्राणं प्राणेऽपानं तथापरे । प्राणापानगती रुध्वा प्राणायामपरायणाः २९
अपरे नियताहाराः प्राणान्प्राणेषु जुह्वति । सर्वेऽप्येते यज्ञविदो यज्ञक्षपितकल्मषाः ३०

यंतीत्यर्थः यद्वा अपाने जुह्वति प्राणं प्राणेऽपानं तथापरे इत्यनेन पूरकरेचकयोरावर्तमानयोर्हंसः सोऽहमित्यनुलोमतः प्रतिलोमतश्चाभिव्यज्यमानेनाजपामंत्रेण तत्त्वंपदार्थैक्यं तिहारेण भावयंतीत्यर्थः तदुक्तं योगशास्त्रे सकारेण बहिर्याति हंकारेण विशेत्पुनः प्राणस्तत्र स एवाहं हंस इत्यनुचिंतयेत् इति प्राणापानगती रुध्वेत्यनेन तु कुंभकेन प्राणायामपरा अपरे कथ्यंते तत्रायमर्थः द्वौ भागौ पूरयेदन्नैस्तोयेनैकं प्रपूरयेत् मारुतस्य प्रचारार्थं चतुर्थमवशेषयेत् इत्येवमादिवचनोक्तो नियत आहारो येषां ते कुंभकेन प्राणापानगती रुध्वा प्राणायामपरायणाः संतः प्राणान्निंद्रियाणि प्राणेषु जुह्वति कुंभके हि सर्वे प्राणा एकीभवंति तत्र च लीयमानेष्विंद्रियेषु होमं भावयंतीत्यर्थः तदुक्तं योगशास्त्रे यथा यथा सदाभ्यासान्मनसः स्थिरता भवेत् वायुर्वाक्कायदृष्टीनां स्थिरता च तथा तथा ३०

तदेवमुक्तानां द्वादशानां यज्ञविदां फलमाह सर्वे इति यज्ञान्विदन्ति लभन्त इति यज्ञविदः यज्ञज्ञा इति वा यज्ञैः क्षपितं नाशितं किल्बिषं यैः ३०
ते यज्ञान् कृत्वा अवशिष्टे काले अनिषिद्धमन्नम् अमृतरूपं भुंजत इति तथा ते सनातनं नित्यं ब्रह्म ज्ञानद्वारेण प्राप्नुवंति तदकरणे दोषमाह नायंलो
क इति अयं अल्पसुखोपि मनुष्यलोकोऽयज्ञस्य यज्ञानुष्ठानशून्यस्य नास्ति अयं लोकः कुतोन्यः परलोकः अतो यज्ञाः सर्वथा कर्तव्या इत्यर्थः ३१
ज्ञानयज्ञं स्तोतुं उक्तान् यज्ञान् उपसंहरति एवमिति ब्रह्मणो वेदस्य मुखे वितता वेदेन साक्षाद्विहिता इत्यर्थः तथापि तान्सर्वान् वाङ्मनःका

यज्ञशिष्टामृतभुजो यांति ब्रह्म सनातनं नायं लोकोस्त्ययज्ञस्य कुतोन्यः कुरुसत्तम ३१
एवं बहुविधा यज्ञा वितता ब्रह्मणो मुखे कर्मजान्विद्धि तान्सर्वानेवं ज्ञात्वा विमोक्ष्यसे ३२
श्रेयान्द्रव्यमयाद्यज्ञात् ज्ञानयज्ञः परंतप सर्वं कर्माखिलं पार्थ ज्ञाने परिसमाप्यते . ३३

यकर्मजनितान् आत्मस्वरूपसंस्पर्शरहितान् विद्धि जानीहि आत्मनः कर्मणोऽगोचरत्वात् एवं ज्ञात्वा ज्ञाननिष्ठः सन् संसाराद्विमुक्तो भविष्य
सि ३२ ज्ञानयज्ञस्तु श्रेष्ठ इत्याह श्रेयानिति द्रव्यमयाद् अनात्मव्यापारजन्यात् दैवादियज्ञात् ज्ञानयज्ञः श्रेयान् श्रेष्ठ इत्यर्थः यद्यपि ज्ञानय
ज्ञस्यापि मनोव्यापाराधीनत्वमस्त्येव तथाप्यात्मस्वरूपस्य ज्ञानस्य मनःपरिणामेऽभिव्यक्तिमात्रं न तु तज्जन्यत्वमिति द्रव्यमयाद्विशेषः श्रेष्ठ
त्वे हेतुः सर्वं कर्म आफलं फलसहितं ज्ञाने परिसमाप्यते अंतर्भवतीत्यर्थः सर्वं तदभिसमेति यत् किंचित्प्रजाः साधु कुर्वंतीति श्रुतेः ३३

॰ऽयं कृतात्मज्ञाने साधनमाह तद्विद्धीति तत् ज्ञानं विद्धि प्राप्नुहि ज्ञानिनां प्रणिपातेन दंडवन्नमस्कारेण ततः परिप्रश्नेन कुतोयं मम संसा
रः कथं वा विनिवर्त्तेतेति परिप्रश्नेन सेवया गुरुशुश्रूषया च ज्ञानिनः शास्त्रज्ञाः तत्त्वदर्शिनः अपरोक्षानुभवसंपन्नाश्च ते तुभ्यं ज्ञानमुपदेशेन संपादयि
ष्यंति ३४ ज्ञानफलमाह यत् ज्ञात्वेति सार्द्धैस्त्रिभिः यत् ज्ञानं ज्ञात्वा प्राप्य पुनर्बंधुवधादिनिमित्तं मोहं न प्राप्स्यसि तत्र हेतुः येन ज्ञानेन भूतानि पितृ
पुत्रादीनि स्वाविद्याविरचितानि स्वात्मन्येवाभेदेन द्रक्ष्यसि अथो अनंतरं आत्मानं मयि परमात्मन्यभेदेन द्रक्ष्यसीत्यर्थः ३५ किंच अपि चेदिति सर्वेभ्यः पा

तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया उपदेक्ष्यंति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिनः ३४ यत् ज्ञात्वा न पुनर्मोहमेवं या
स्यसि पांडव येन भूतान्यशेषेण द्रक्ष्यस्यात्मन्यथो मयि ३५ अपि चेदसि पापेभ्यः सर्वेभ्यः पापकृत्तमः सर्वं
ज्ञानप्लवेनैव वृजिनं संतरिष्यसि ३६ यथैधांसि समिद्धोग्निर्भस्मसात्कुरुतेर्जुन ज्ञानाग्निः सर्वकर्माणि भ
स्मसात्कुरुते तथा ३७ न हि ज्ञानेन सदृशं पवित्रमिह विद्यते तत्स्वयं योगसंसिद्धः कालेनात्मनि विंदति ३८

पकारिभ्यो यद्यप्यतिशयेन पापकारी त्वमसि तथापि सर्वं पापसमुद्रं ज्ञानपोतेनैव सम्यगनायासेन न तरिष्यसि ३६ समुद्रवद्विजनस्यैव पापस्या
तिलंघनमात्रं न तु नाश इति भ्रांतिं दृष्टांतेन वारयन्नाह यथेति एधांसि काष्ठानि प्रदीप्तोग्निर्यथा भस्मीभावं नयति तथात्मज्ञानरूपोग्निः प्रारब्ध
कर्मव्यतिरिक्तानि सर्वाणि भस्मीकरोतीत्यर्थः ३७ तत्र हेतुमाह न हीति पवित्रं शुद्धिकरं इह तपोयोगादिषु मध्ये ज्ञानतुल्यं नास्त्येव तर्हि सर्वेपा
त्मज्ञानमेव किं न प्राप्नुवंतीत्यत आह तत्स्वयमिति सार्द्धेन तत् आत्मनि विषये ज्ञानं कालेन महता कर्मयोगेन संसिद्धो योग्यतां प्राप्तः सन् स्वयमेवान

किंचश्रद्धावानिति श्रद्धावान्गुरूपदिष्टेर्थेआस्तिक्यबुद्धिमान् तत्परस्तदेकनिष्ठः संयतेंद्रियश्चतत्ज्ञानंलभतेनान्यः अतःश्रद्धादिसंपत्त्याज्ञानलाभा त्प्राक्कर्मयोगएवशुद्ध्यर्थमनुष्ठेयः ज्ञानलाभानंतरंतुनतस्यकिंचित्कृत्यमस्तीत्याह ज्ञानंलब्ध्वातुअचिरेणमोक्षंप्राप्नोति ३९ ज्ञानाधिकारिणमु क्त्वातद्विपरीतमधिकारिणमाह अज्ञश्चेति अज्ञोगुरूपदिष्टार्थानभिज्ञः कथंचित्ज्ञानेजातेप्यश्रद्दधानश्च जातायामपिश्रद्धायांममेदंसिद्धंवा नवेतिसंशयाक्रांतचित्तश्चविनश्यतिस्वार्थाद्भ्रश्यति एतेषुचापिसंशयात्मासर्वथानश्यति यतस्तस्यायंलोकोनास्ति धनार्जनविवाहाद्यसिद्धेः नचपरलोकःधर्मस्यानिष्पत्तेः नचसुखं संशयेनैवभोगस्याप्यसंभवात् ४० अध्यायद्वयोक्तांपूर्वापरभूमिकाभेदेनकर्मज्ञानमयींद्विविधांब्रह्म

श्रद्धावाँल्लभतेज्ञानंतत्परःसंयतेंद्रियः ज्ञानंलब्ध्वापरांशांतिमचिरेणाधिगच्छति ३९ अज्ञश्चाश्रद्दधानश्च संशयात्माविनश्यति नायंलोकोस्तिनपरोनसुखंसंशयात्मनः ४० योगसंन्यस्तकर्माणंज्ञानसंछिन्नसंश यं आत्मवंतंनकर्माणिनिबध्नंतिधनंजय ४१ तस्मादज्ञानसंभूतंहृत्स्थंज्ञानासिनात्मनः छित्त्वैनंसंशयंयो गमातिष्ठोत्तिष्ठभारत ४२ ॥ इतिश्रीमद्भगवद्गीता० श्रीकृष्णार्जुनसंवादेकर्मसंन्यासयोगोनामचतुर्थोध्यायः ४

निष्ठामुपसंहरति योगेतिद्वाभ्यां योगेनपरमेश्वराराधनरूपेणतस्मिन्समर्पितानिकर्माणियेनतं कर्माणितत्फलैर्नबध्नंति यतश्चज्ञानेनआत्म बोधेनसंछिन्नःसंशयोदेहाद्यभिमानलक्षणोयस्यतं आत्मवंतमप्रमादिनंकर्माणिलोकसंग्रहार्थानिस्वाभाविकानिवाननिबध्नंति ४१ यस्मादेवं तस्माद्धिति आत्मनोऽज्ञानेनसंभूतंहृदिस्थितमेनंसंशयंशोकादिनिमित्तंदेहात्मविवेकज्ञानखड्गेनछित्त्वाकर्मयोगमातिष्ठआश्रय तत्रचप्रथमं प्रवृत्तायायुद्धायउत्तिष्ठ हेभारतेति क्षत्रियत्वेनयुद्धस्यधर्मत्वंदर्शितं पूर्वापरभूमिकाभेदेनकर्मज्ञानमयीद्विधा निष्ठोक्तायेनतंवंदेशौरिंसंशयसंछिदं ४२

अज्ञानसंभूतं संशयं ज्ञानासिनाछित्वा कर्मयोगमातिष्ठेत्युक्तं तत्र पूर्वापरविरोधं मन्वानोर्जुन उवाच संन्यासमिति यस्त्वात्मरतिरेव स्या
दित्यादिना सर्वं कर्माखिलं पार्थेत्यादिना च ज्ञानिनः कर्मसंन्यासं कथयसि ज्ञानासिना संशयं छित्वा योगमातिष्ठेति पुनर्योगं कथयसि न
च कर्मसंन्यासः कर्मयोगश्चैकस्यैकदैव संभवतः विरुद्धस्वरूपत्वात् तस्मादेतयोर्मध्ये एकस्मिन्ननुष्ठातव्ये सति मम यच्छ्रेयः सुनिश्चितं
तदेकं ब्रूहि ॥१॥ अत्रोत्तरं श्रीभगवानुवाच संन्यास इति अयं भावः न हि वेदान्तवेद्यात्मतत्वविदं प्रति कर्मयोगमहं ब्रवीमि यतः पूर्वो

अर्जुन उवाच संन्यासं कर्मणां कृष्ण पुनर्योगं च शंससि यच्छ्रेय एतयोरेकं तन्मे ब्रूहि सुनिश्चितं ॥१॥
श्रीभगवानुवाच संन्यासः कर्मयोगश्च निःश्रेयसकरावुभौ तयोस्तु कर्मसंन्यासात्कर्मयोगो विशिष्यते ॥२॥

क्तेन संन्यासेन विरोधः स्यात् अपि तु देहात्माभिमानिनं त्वां बंधुवधादिनिमित्तशोकमोहादिकृतं मनःसंशयं देहात्मविवेकज्ञानासि
नाछित्वा परमात्मज्ञानोपायभूतं कर्मयोगमातिष्ठेति ब्रवीमि कर्मयोगेन शुद्धचित्तस्यात्मतत्वज्ञाने जाते सति तत्परिपाकार्थं ज्ञान
निष्ठांगत्वेन संन्यासः पूर्वमुक्तः एवं सत्यंगप्रधानयोर्विकल्पायोगात्संन्यासः कर्मयोगश्चेत्येतावुभावपि भूमिकाभेदेन समुच्चितावे
व निःश्रेयसं साधयतः तथापि तु तयोर्मध्ये कर्मसंन्यासात् सकाशात् कर्मयोगो विशिष्टो भवति ॥२॥ ७ श्रीनर्मदादेव्यै नमः ७७

कृतं इत्यपेक्षायां संन्यासित्वेन कर्मयोगिनं स्तुवन् तस्य श्रेष्ठत्वं दर्शयति ज्ञेय इति रागद्वेषराहित्येन परमेश्वरार्थं कर्माणि योऽनुतिष्ठति
स नित्यं कर्मानुष्ठानकालेऽपि संन्यासी त्वेव ज्ञेयः तत्र हेतुः निर्द्वन्द्वो रागद्वेषादिद्वन्द्वशून्यो हि शुद्धचित्तो ज्ञानद्वारा सुखमनायासेन संसारात्प्र
मुच्यते ३ यस्मादेवं मंगप्रधानत्वेन उभयोरवस्थाभेदेन क्रमसमुच्चयः अतो विकल्पमंगीकृत्य उभयोरेकः श्रेष्ठ इति प्रश्नोऽज्ञानामेवोचितो
न विवेकिनामित्याह सांख्ययोगाविति सांख्यशब्देन ज्ञाननिष्ठावाचिना तदंगं संन्यासं लक्षयति संन्यासकर्मयोगावेकफलौ संतौ पृथक्

ज्ञेयः स नित्यसंन्यासी यो न द्वेष्टि न कांक्षति निर्द्वन्द्वो हि महाबाहो सुखं बंधात्प्रमुच्यते ३
सांख्ययोगौ पृथग्बालाः प्रवदंति न पंडिताः एकमप्यास्थितः सम्यगुभयोर्विंदते फलं ४
यत्सांख्यैः प्राप्यते स्थानं तद्योगैरपि गम्यते एकं सांख्यं च योगं च यः पश्यति स पश्यति ५

स्वतंत्राविति बाला अज्ञा एव प्रवदंति न तु पंडिताः तत्र हेतुः अनयोरेकमपि सम्यगास्थित आश्रितः सन्नुभयोरपि फलं प्राप्नोति तथाहि कर्मयो
गं सम्यगनुतिष्ठन् शुद्धचित्तः सन् ज्ञानद्वारा यदुभयोः फलं कैवल्यं तद्विंदतीति न पृथक्फलत्वमनयोरित्यर्थः ४ एतदेव स्फुटयति यत्सांख्यैरिति
सांख्यैर्ज्ञाननिष्ठैः संन्यासिभिर्यत्स्थानं मोक्षाख्यं प्रकर्षेण साक्षात्प्राप्यते योगैरित्यत्र अर्शआदित्वेन मत्वर्थीयोऽच् द्रष्टव्यः कर्मयोगि
भिरपि तदेव ज्ञानद्वारेण गम्यतेऽवाप्यत इत्यर्थः अतः सांख्यं च योगं च एकफलत्वेन एकं यः पश्यति स एव सम्यक्पश्यतीत्यर्थः ५ ५ ५

यदि कर्मयोगिनो प्यंततः संन्यासेनैव ज्ञाननिष्ठाँत र्हि आदित एव संन्यासः कर्त्तुं युक्त इति मन्वानं प्रत्याह संन्यास इति अयोगतः कर्मयोगं विना संन्यासः प्राप्तुं दुःखं दुःखहेतुरशक्य इत्यर्थः चित्तशुद्ध्यभावेन ज्ञाननिष्ठाया असंभवात् योगयुक्तस्तु चित्तशुद्धतया मुनिः संन्यासी भूत्वा अचिरेणैव ब्रह्म अधिगच्छति अपरोक्षं जानाति अतः चित्तशुद्धेः प्राक् कर्मयोग एव संन्यासाद्विशिष्यत इति पूर्वोक्तं सिद्धं तदुक्तं वार्तिककृद्भिः प्रमादिनो बहिश्चित्ताः पिशुनाः कलहोत्सुकाः संन्यासिनोपि दृश्यंते दैवसंदूषिताशयाः इति ६ कर्मयोगादिक्रमेण ब्रह्माधिगमे सत्यपि तदुपरितेन कर्मणा बद्धं स्यादेवेत्याशंक्याह योगयुक्त इति योगेन युक्तः अतो विशुद्ध आत्मा चित्तं यस्य अत एव विजित आत्मा शरीरं येन अत एव जि

संन्यासस्तु महाबाहो दुःखमाप्तुमयोगतः योगयुक्तो मुनिर्ब्रह्म न चिरेणाधिगच्छति ६ योगयुक्तो विशुद्धात्मा विजितात्मा जितेंद्रियः सर्वभूतात्मभूतात्मा कुर्वन्नपि न लिप्यते ७ नैव किंचित्करोमीति युक्तो मन्येत तत्त्ववित् पश्यन् शृण्वन् स्पृशन् जिघ्रन् अश्नन् गच्छन् स्वपन् श्वसन् ८ प्रलपन् विसृजन् गृह्णन् उन्मिषन्निमिषन्नपि इंद्रियाणींद्रियार्थेषु वर्त्तंत इति धारयन् ९

तानींद्रियाणि येन ततश्च सर्वेषां भूतानां आत्मभूत आत्मा यस्य स लोकसंग्रहार्थं स्वाभाविकं वा कर्म कुर्वन्नपि न लिप्यते नैव बध्यते ७ कर्म कुर्वन्नपि न लिप्यत इत्येतद्विरुद्धमित्याशंक्य कर्तृत्वाभिमानाभावान्न विरुद्धमित्याह नैवेति द्वाभ्यां कर्मयोगेन युक्तः क्रमेण तत्त्ववित् भूत्वा दर्शनश्रवणादीनि कुर्वन्नपि इंद्रियाणींद्रियार्थेषु प्रवर्त्तंत इति धारयन् बुद्ध्या निश्चिन्वन् किंचिदप्यहं न करोमीति मन्यते तत्र दर्शनश्रवणस्पर्शनाघ्राणाशनानि चक्षुरादीनां ज्ञानेंद्रियव्यापाराः गतिः पादयोः स्वापो बुद्धेः श्वासः प्राणस्य प्रलपनं वागिंद्रियस्य विसर्गः पायूपस्थयोः ग्रहणं हस्तयोः उन्मेषनिमेषणे कूर्माख्यप्राणस्य इति विवेकः एतानि कर्माणि कुर्वन्नपि अभिमानाभावात् ब्रह्मवित् न लिप्यते तथा च पारमर्षं सूत्रं तदधिगम उत्तरपूर्वाघयोः

[illegible]

तर्हि यस्य करोमीत्यभिमानोस्ति तस्य कर्मलेपो दुर्वारः अविशुद्धचित्तत्वाच्च संन्यासोपि नास्तीति महत्संकटमापन्नमित्याशंक्याह ब्रह्मणीति ब्रह्मण्याधाय परमेश्वरे समर्प्य तत्फले संगं त्यक्त्वा यः कर्माणि करोति असौ पापेन बंधहेतुतया पापिष्ठेन पुण्यपापात्मकेन कर्मणा न लिप्यते यथा पद्मपत्रं अंभसि स्थितमप्यंभसा न लिप्यते तद्वदिति १० बंधकत्वाभावमुक्त्वा मोक्षहेतुत्वं सदाचारेण दर्शयति कायेनेति कायेन स्नानादि मनसा ध्यानादि बुद्ध्या तत्त्वनिश्चयादि केवलैः कर्माभिनिवेशरहितैरिंद्रियैः श्रवणकीर्तनादिलक्षणं कर्म फलसंगं त्यक्त्वा चित्तशुद्धये कर्म योगिनः कर्म कुर्वंति ११ ननु तेनैव कर्मणा कश्चिन्मुच्यते कश्चिद्बध्यत इति व्यवस्था कथमत आह युक्त इति युक्तः परमेश्वरैकनिष्ठः सन् कर्मणां फलं त्यक्त्वा कर्माणि

ब्रह्मण्याधाय कर्माणि संगं त्यक्त्वा करोति यः लिप्यते न स पापेन पद्मपत्रमिवांभसा १० कायेन मनसा बुद्ध्या केवलैरिंद्रियैरपि योगिनः कर्म कुर्वंति संगं त्यक्त्वात्मशुद्धये ११ युक्तः कर्मफलं त्यक्त्वा शांतिमाप्नोति नैष्ठिकीं अयुक्तः कामकारेण फले सक्तो निबध्यते १२ सर्वकर्माणि मनसा संन्यस्यास्ते सुखं वशी नवद्वारे पुरे देही नैव कुर्वन्न कारयन् १३

कुर्वन् आत्यंतिकीं शांतिं मोक्षं प्राप्नोति अयुक्तस्तु बहिर्मुखः कामकारेण कामतः प्रवृत्त्या फले आसक्तो नितरां बंधं प्राप्नोति १२ एवं तावच्चित्तशुद्धिशून्यस्य संन्यासात्कर्मयोगो विशिष्यत इत्युक्तं तत्प्रपंचितं इदानीं शुद्धचित्तस्य संन्यासः श्रेष्ठ इत्याह सर्वकर्माणीति वशी जितचित्तः सर्वाणि कर्माणि विक्षेपकाणि मनसा विवेकयुक्तेन संन्यस्य सुखं यथा भवति एवं ज्ञाननिष्ठः सन्नास्ते क्वास्त इत्यत आह नवद्वारे नेत्रे नासिके कर्णौ मुखं चेति सप्त शिरोगतानि अधो द्वे पायूपस्थरूपे इत्येवं नवद्वाराणि यस्मिन् तस्मिन् पुरे गृहवदहंभावशून्ये देहे देहीव तिष्ठति अहंकाराभावादेव स्वयं तेन देहेन नैव कुर्वन् ममकाराभावाच्च न कारयन् इत्यविशुद्धचित्ताद्वृत्तिः कृता अशुद्धचित्तो हि संन्यस्य पुनः करोति कारयति च न त्वयं तथा अतः सुखमास्त इत्यर्थः १३

ननु एष एव साधुकर्माणि कारयति तं यमेभ्यो लोकेभ्य उन्निनीषते एष एवासाधु कर्म कारयति तं यमेभ्यो लोकेभ्योऽधो निनीषत इत्यादिश्रुतेः परमेश्वरेणैव शुभाशुभफलेषु कर्मकर्तृत्वेन प्रयुज्यमानोऽस्वतंत्रः पुरुषः कथं तानि कर्माणि त्यजेत् ईश्वरो वा ज्ञानमार्गे प्रयुज्यमानस्त्यजतीति चेत् एवं सति वैषम्यनैर्घृण्याभ्यां प्रयोजककर्तृत्वादीश्वरस्यापि पुण्यपापसंबंधः स्यादित्याशंक्याह नकर्तृत्वमिति द्वाभ्यां प्रभुर्लोकस्य कर्तृत्वादिकं न सृजति किंतु जीवस्य स्वभावोऽविद्यैव कर्तृत्वादिरूपेण प्रवर्त्तते अनाद्यविद्याकामवशात् इति स्वभावं जीवलोके मीश्वरः कर्मसु नियुंक्ते न तु स्वयमेव कर्तृत्वादिकमुत्पादयतीत्यर्थः १४ यस्मादेवं तस्मात् नादत्त इति प्रयोजकोपि सन् प्रभुः कस्यचित्पापं सुकृतं च नैवादत्ते न भजते

नकर्तृत्वं न कर्माणि लोकस्य सृजति प्रभुः न कर्मफलसंयोगं स्वभावस्तु प्रवर्त्तते १४

नादत्ते कस्यचित्पापं न चैव सुकृतं विभुः अज्ञानेनावृतं ज्ञानं तेन मुह्यंति जंतवः १५

ज्ञानेन तु तदज्ञानं येषां नाशितमात्मनः तेषामादित्यवज्ज्ञानं प्रकाशयति तत्परं १६

तत्र हेतुः विभुः परिपूर्णः आप्तकाम इत्यर्थः यदि हि स्वार्थं कारयेत् तर्हि तथा स्यात् न त्वेतदस्ति आप्तकामस्यैव केवलं कारुण्येन निजमाययाऽनादिपूर्वक कर्मानुसारेण प्रवर्तकत्वात् ननु भक्ताननुगृह्णतोऽभक्तान्निगृह्णतश्च वैषम्योपलंभात् कथमाप्तकामत्वमित्यत आह अज्ञानेनेति अज्ञानेन निग्रहोपि दंडरूपोऽनुग्रह एवेत्येवं अज्ञानेन सर्वत्र समः परमेश्वरः इत्येवंभूतं ज्ञानमावृतं तेन हेतुना जंतवो जीवा मुह्यंति भगवति वैषम्यमन्यंत इत्यर्थः १५ ज्ञानिनस्तु न मुह्यंतीत्याह ज्ञानेनेति आत्मनो भगवतो ज्ञानेन येषां तद्वैषम्योपलंभकमज्ञानं नाशितं तत् ज्ञानं तेषामज्ञानं नाशयित्वा तत्परं परिपूर्णस्वरूपमीश्वरस्वरूपं प्रकाशयति यथा आदित्यस्तमो निरस्य समस्तवस्तुजातं प्रकाशयति तद्वत् १६ श्रीगोपालकृष्णाय नमः

भ०गी०टी०

३९

एवंभूतेश्वरोपासकानां फलमाह तद्बुद्धय इति तस्मिन्नेव बुद्धिर्निश्चयात्मिका येषां तस्मिन्नेवात्मा मनो येषां तस्मिन्नेव निष्ठा तात्पर्यं येषां तदेव परमयनमाश्रयो येषां ततश्च तत्प्रसादलब्धेनात्मज्ञानेन निर्धूतं निरस्तं कल्मषं येषां ते अपुनरावृत्तिं मुक्तिं यान्ति १७ कीदृशास्ते ज्ञानिनो ये अपुनरावृत्तिं गच्छन्तीत्यपेक्षायामाह विद्याविनयेति विषमेष्वपि समं ब्रह्मैव द्रष्टुं शीलं येषां ते पण्डिता ज्ञानिन इत्यर्थः तत्र वि
द्याविनयाभ्यां युक्ते ब्राह्मणे च शुनि यः पचति तस्मिंश्चेति कर्मणो वैषम्यं गवि हस्तिनि शुनि चेति जातितो वैषम्यं दर्शितं १८ ननु विषमेषु
समदर्शनं निषिद्धं कुर्वन्तः कथं ते पण्डिताः यथाह गोतमः समासमाभ्यां विषमसमे पूजात इति अस्यायमर्थः समाय पूजया विषमप्रकारे

तद्बुद्धयस्तदात्मानस्तन्निष्ठास्तत्परायणाः गच्छन्त्यपुनरावृत्तिं ज्ञाननिर्धूतकल्मषाः १७
विद्याविनयसंपन्ने ब्राह्मणे गवि हस्तिनि शुनि चैव श्वपाके च पण्डिताः समदर्शिनः १८
इहैव तैर्जितः सर्गो येषां साम्ये स्थितं मनः निर्दोषं हि समं ब्रह्म तस्माद्ब्रह्मणि ते स्थिताः १९
न प्रहृष्येत्प्रियं प्राप्य नोद्विजेत्प्राप्य चाप्रियम् स्थिरबुद्धिरसंमूढो ब्रह्मविद्ब्रह्मणि स्थितः २०

कृते सति विषमाय च समे प्रकारे कृते सति स पूजकः इह लोकाच्च हीयत इति तत्राह इहैवेति जीवद्भिरेव तैः सृज्यत इति सर्गः संसारो जितः निर
स्तः कैः येषां मनः साम्ये समत्वे स्थितं तत्र हेतुः हि यस्मात् ब्रह्म समं निर्दोषं च तस्मात्ते समदर्शिनो ब्रह्मण्येव स्थिताः ब्रह्मभावं प्राप्ता इत्यर्थः गोतमो
क्तस्तु दोषो ब्रह्मभावमप्राप्तैः पूर्वमेव पूज्यत इति पूजकावस्थायाः श्रवणात् १९ ब्रह्मप्राप्तस्य लक्षणमाह नेति यो ब्रह्मवित् भूत्वा ब्रह्मण्येव स्थि
तः स प्रियं प्राप्य न प्रहृष्यति अप्रियं प्राप्य च नोद्विजेत न विषीदतीत्यर्थः यतः स्थिरबुद्धिः स्थिरा निश्चला बुद्धिर्यस्य तत्कुतः यतोऽसंमूढः निवृत्तमोहः
२०

श्रीः

३९

मोहनिवृत्त्या बुद्धिस्थैर्ये हेतुमाह बाह्यस्पर्शेष्विति इंद्रियैः स्पृश्यंत इति स्पर्शाः बाह्येंद्रियविषयेषु असक्ता तस्मा अनासक्तचित्तः आत्मन्यंतःक
रणे यत्सुखमुपशमात्मकं सात्विकं सुखं तत् विंदति लभते सच उपरमसुखं लब्ध्वा ब्रह्मणि योगेन समाधिना युक्तस्तदैकाग्र्यमाप्त आत्मा यस्य सः अ
क्षयं सुखमश्नुते प्राप्नोतीत्यर्थः २१ ननु प्रियविषयभोगानामपि निवृत्तेः कथं मोक्षः पुरुषार्थः स्यात्तत्राह येहीति संस्पृश्यंत इति संस्पर्शा वि
षयास्तेभ्यो जाता ये भोगाः सुखानि ते हि वर्तमानकालेपि स्पर्द्धासूयादिव्याप्तत्वात् दुःखस्यैव योनयः कारणभूताः आदिमंतोः तत्वं तश्च अतो
विवेकी तेषु न रमते २२ तस्मान्मोक्ष एव परः पुरुषार्थः तस्य च कामक्रोधवेगोऽतिप्रतिपक्षः अतस्तत्सहनसमर्थ एव मोक्षभागित्याह शक्नो

बाह्यस्पर्शेष्वसक्तात्मा विंदत्यात्मनि यत्सुखं सब्रह्मयोगयुक्तात्मा सुखमक्षयमश्नुते २१
ये हि संस्पर्शजा भोगा दुःखयोनय एव ते आद्यंतवंतः कौंतेय न तेषु रमते बुधः २२
शक्नोतीहैव यः सोढुं प्राक्शरीरविमोक्षणात् कामक्रोधोद्भवं वेगं सयुक्तः ससुखी नरः २३

तीति कामात्क्रोधाच्चोद्भवति यो वेगः मनोनेत्रक्षोभादिलक्षणः तं इहैव तदुद्भवसमय एव यो नरः सोढुं प्रतिरोद्धुं शक्नोति न तु पिनक्षणमात्रं
किंतु शरीरविमोक्षणात् प्राक् यावद्देहपातमित्यर्थः य एवंभूतः स एव युक्तः समाहितः सुखी च भवति नान्यः यद्वा मरणादूर्ध्वं विलपंतीभि
र्युवतीभिरालिंग्यमानोपि पुत्रादिभिर्दह्यमानोपि यथा प्राणशून्यः कामक्रोधवेगं सहते तथा मरणात्प्रागपि जीवन्नेव यः सहते स एव युक्तः सु
खी चेत्यर्थः तदुक्तं वसिष्ठेन प्राणे गते यथा देहः सुखंदुःखं न विंदति तथा चेत्प्राणयुक्तोपि स कैवल्याश्रयो भवेदिति २३ श्रीकृष्ण ६

नकेवलं कामक्रोधवेगसहनमात्रेण मोक्षं प्राप्नोति अपितु योन्तरिति अंतः आत्मन्येव सुखं यस्य न विषयेषु अंतरेवारामः क्रीडा यस्य नबहिः अंतरेवज्योतिर्दृष्टिर्यस्य न तु स्वगीतादिषु स एवं ब्रह्मभूतः स्थितः सन् ब्रह्मणि निर्वाणं लयं अधिगच्छति प्राप्नोति २४ किंच

योन्तःसुखोन्तराराम स्तथांतर्ज्योतिरेव यः स योगी ब्रह्मनिर्वाणं ब्रह्मभूतोधिगच्छति २४
लभंते ब्रह्मनिर्वाणमृषयः क्षीणकल्मषाः छिन्नद्वैधा यतात्मानः सर्वभूतहिते रताः २५
कामक्रोधवियुक्तानां यतीनां यतचेतसाम् अभितो ब्रह्मनिर्वाणं वर्त्तते विदितात्मनां २६

लभंत इति ऋषयः सम्यक्दर्शिनः क्षीणं कल्मषं येषां छिन्नं द्वैधं संशयो येषां सर्वेषां भूतानां हिते रताः कृपालवः ते ब्रह्मनिर्वाणं मोक्षं लभंते २५ किंच कामक्रोधवियुक्तानामिति यतीनां संन्यासिनां संयतचित्तानां ज्ञातात्मतत्वानां अभितः उभयतः मृतानां जीवितां च न देहांते एव तेषां ब्रह्मणि लयः अपितु जीवतामपि वर्त्तत इत्यर्थः २६

स योगी ब्रह्मनिर्वाणमित्यादिना योगी मोक्षमवाप्नोतीत्युक्तं तमेव योगं संक्षेपेण दर्शयन्नाह स्पर्शानिति द्वाभ्यां बाह्या एव स्पर्शा रूपरसादयो विषयाश्चिंतिताः संतोऽन्तः प्रविशंति तांस्तच्चिंतात्यागेन बहिरेव कृत्वा चक्षुश्च भ्रुवोरंतरे भ्रूमध्य एव कृत्वा अत्यंतनेत्रनिमीलने निद्रया मनो लीयते उन्मीलने च बहिः प्रसरति तदुभयदोषपरिहारार्थमर्धनिमीलनेन भ्रूमध्ये दृष्टिं निधायेत्यर्थः उच्छ्वासनिश्वासरूपेण नासिकयोरभ्यंतरे चरंतौ प्राणापानावूर्ध्वाधोगतिनिरोधेन कुंभयित्वेत्यर्थः यद्वा प्राणो यथा बहिर्न निर्याति यथा चापानोऽन्तर्न प्रविशति किंतु नासामध्य एव

स्पर्शान्कृत्वा बहिर्बाह्यांश्चक्षुश्चैवांतरे भ्रुवोः प्राणापानौ समौ कृत्वा नासाभ्यंतरचारिणौ २७ यतेंद्रियमनोबुद्धिर्मुनिर्मोक्षपरायणः विगतेच्छाभयक्रोधो यः सदा मुक्त एव सः २८ भोक्तारं यज्ञतपसां सर्वलोकमहेश्वरं सुहृदं सर्वभूतानां ज्ञात्वा मां शांतिमृच्छति २९ ॐ इति श्रीमद्भगवद्गीतासु संन्यासयोगो नाम पंचमोऽध्यायः ५ ॐ श्रीः

द्वावपि यथा चरतः तथा मंदाभ्यामुच्छ्वासनिश्वासाभ्यां समौ कृत्वा इति अनेनोपायेन यताः संयता इंद्रियमनोबुद्धयो यस्य मोक्ष एव परमयनं प्राप्यं यस्य अत एव विगता इच्छाभयक्रोधा यस्य य एवंभूतो मुनिः स सदा जीवन्नपि मुक्त एवेत्यर्थः २८ नन्वेवमिंद्रियादिसंयममात्रेण कथं मुक्तः स्यात् न तावन्मात्रेण किंतु ज्ञानद्वारेणेत्याह भोक्तारमिति यज्ञानां तपसां च स्वभक्तैः समर्पितानां यदृच्छया भोक्तारं पालकमिति वा सर्वेषां लोकानां महांतमीश्वरं सर्वेषां भूतानां सुहृदमंतर्यामिणं मां ज्ञात्वा मत्प्रसादेन शांतिं मोक्षमृच्छति प्राप्नोति २९ विकल्पं तु काण्डयोर्हेनये नैवं योगसांख्ययोः समुच्चयः क्रमेणोक्तः सर्वज्ञं नौमि तं हरिं ५ इति श्रीभगवद्गीताटीकायां सुबोधिन्यां पंचमोऽध्यायः

चित्तेशुद्धेपिनध्यानंविनासंन्याससमात्रतःमुक्तिःस्यादितिषष्ठेस्मिन्ध्यानयोगोवितन्यते पूर्वाध्यायांतेसंक्षेपेणोक्तंयोगंप्रपंचयितुंषष्ठा
ध्यायारंभः तत्रतावत्सर्वकर्माणिमनसासंन्यस्येत्यारभ्यपूर्वोक्ताज्ञाननिष्ठायास्तात्पर्येणाभिधानात्दुःखरूपाच्चकर्मणःसहसासंन्यासा
तिप्रसंगंवारयितुंसंन्यासादपिश्रेष्ठत्वेनकर्मयोगंस्तौति श्रीभगवानुवाच अनाश्रितइतिद्वाभ्यां कर्मफलमनाश्रितोऽनपेक्षमाणःअवश्यं
कर्त्तव्यतयाविहितंकर्मयःकरोतिसएवसंन्यासीयोगीच ननिरग्निः अग्निसाध्येष्टाख्यकर्मत्यागीनचाक्रियःअनग्निसाध्यपूर्त्ताख्यकर्मत्या
गी १ कुतइत्यपेक्षायांकर्मयोगस्यैवसंन्यासत्वंसंपादयन्नाह यमिति यंसंन्यासमितिप्राहुःप्रकृष्टेणश्रेष्ठत्वेनाहुः संन्यासएवास्तेत्यदित्या

श्रीभगवानुवाच अनाश्रितःकर्मफलंकार्यंकर्मकरोतियः ससंन्यासीचयोगीचननिरग्निर्नचा
क्रियः १ यंसंन्यासमितिप्राहुर्योगंतंविद्धिपांडव नह्यसंन्यस्तसंकल्पोयोगीभवतिकश्चन २
आरुरुक्षोर्मुनेर्योगंकर्मकारणमुच्यते योगारूढस्यतस्यैवशमःकारणमुच्यते ३ ५ ५ ५

दिश्रुतेः केवलात्संन्यसनाद्धेतोर्योगमेवतंजानीहि कुतइत्यपेक्षायामितिरूपद्योक्तोहेतुर्योगेप्यस्तीत्याह नहीति नसंन्यस्तःफलसंकल्पो
येनसः कर्मनिष्ठोज्ञाननिष्ठोवा कश्चिदपिनहियोगीभवति अतःफलसंकल्पत्यागसाम्यात्संन्यासीच फलसंकल्पत्यागादेवचित्तवि
क्षेपाभावात्योगीचभवत्येवेत्यर्थः २ तर्हियावज्जीवंकर्मयोगएवप्राप्तइत्याशंक्यतस्यावधिमाह आरुरुक्षोरिति ज्ञानयोगमारोढुं
प्राप्तुमिच्छोःपुंसस्तदारोहेकारणंकर्मोच्यते चित्तशुद्धिकरत्वात् ज्ञानयोगमारूढस्यतुतस्यैवध्याननिष्ठस्यैवशमःसमाधिर्विक्षेपकर्मो
परमोज्ञानपरिपाकेकारणमुच्यते ३

शब्दादिषु

कीदृशोसौ योगारूढः यस्य शमः कारणमुच्यते इत्यत्राह यदा हीति इंद्रियभोग्येष्वर्थेषु तत्साधनेषु च कर्मसु यदा नानुषज्जते आसक्तिं न करोति त
त्र हेतुः आसक्तिमूलभूतान् सर्वान् भोगविषयान् कर्मविषयांश्च संकल्पान् संन्यसितुं त्यक्तुं शीलं यस्य सः तदा योगारूढ उच्यते ४ अतो
विषयासक्तित्यागे मोक्षं तदासक्तौ बंधं पर्यालोच्य रागादिस्वभावं त्यजेदित्याह उद्धरेदिति आत्मना विवेकयुक्तेनात्मानं संसारादुद्धरेत् न
त्ववसादयेत् अधो न नयेत् हि यस्मात् आत्मैव मनः संगाद्युपरत आत्मनः स्वस्य बंधुरुपकारश्च रिपुरपकारश्च ५ कथंभूतस्यात्मैव बंधुः

यदा हि नेंद्रियार्थेषु न कर्मस्वनुषज्जते॥ सर्वसंकल्पसंन्यासी योगारूढस्तदोच्यते ४ उद्ध
रेदात्मनात्मानं नात्मानमवसादयेत् आत्मैव ह्यात्मनो बंधुरात्मैव रिपुरात्मनः ५ बंधुरा
त्मात्मनस्तस्य येनात्मैवात्मना जितः अनात्मनस्तु शत्रुत्वे वर्तेतात्मैव शत्रुवत् ६ जिता
त्मनः प्रशांतस्य परमात्मा समाहितः शीतोष्णसुखदुःखेषु तथा मानापमानयोः ७

कथंभूतस्य चात्मैव रिपुरित्यपेक्षायामाह बंधुरिति येनात्मनैव आत्मकार्यकारणसंघातरूपो जितो वशीकृतः तस्य तथाभूतस्यात्मनः
स आत्मैव बंधुः अनात्मनोऽजितात्मनस्तु आत्मैवात्मनः शत्रुत्वे अपकारित्वे शत्रुवद्वर्तेत ६ जितात्मनः स्वस्मिन् बंधुत्वं स्फुरयति जिता
त्मन इति जितः आत्मा येन तस्य प्रशांतस्य रागद्वेषादिरहितस्य परं केवलमात्मा शीतोष्णादिषु सत्स्वपि समाहितः आत्मनिष्ठो भवति नान्य
स्य यद्वा तस्य हृदि परमात्मा समाहितः स्थितो भवति ७

भ०गी०टी०

३४

योगारूढस्य लक्षणं श्लोकत्रयेणाह ज्ञानेति ज्ञानमौपदेशिकं विज्ञानमपरोक्षानुभवः ताभ्यां तृप्तो निराकांक्षः आत्मा चित्तं यस्य अतः कूटस्थः निर्विकारः अत एव विजितानि इंद्रियाणि येन अतः समानि लोष्टादीनि यस्य मृत्खंडपाषाणसुवर्णेषु हेयोपादेयबुद्धिशून्यः स युक्तो योगारूढ इत्युच्यते ८ सुहृन्मित्रादिषु समबुद्धिर्युक्तस्ततो विशिष्यते इत्याह सुहृदिति सुहृत् स्वभावेनैव हितार्शंसी मित्रं स्नेहवशेनोपकारकं अरिर्घातकः उदासीनो विवदमानयोरुभयोरप्युपेक्षकः मध्यस्थो विवदमानयोरपि हिताशंसी द्वेष्यः द्वेषविषयः बंधुः संबंधी साधवः सदाचाराः पापा दुराचाराः एतेषु समा रागद्वेषशून्या बुद्धिर्यस्य स तु विशिष्टः इत्यर्थः ९ एवं योगारूढ

ज्ञानविज्ञानतृप्तात्मा कूटस्थो विजितेंद्रियः युक्त इत्युच्यते योगी समलोष्टाश्मकांचनः ८
सुहृन्मित्रार्युदासीनमध्यस्थद्वेष्यबंधुषु साधुष्वपि च पापेषु समबुद्धिर्विशिष्यते ९
योगी युंजीत सततमात्मानं रहसि स्थितः एकाकी यतचित्तात्मा निराशीरपरिग्रहः १०

स्य लक्षणमुक्त्वा इदानीं तस्य सांगं योगमभिधत्ते योगीति योगीत्यादिना स योगी परमो मत इत्यंतेन ग्रंथेन योगी योगारूढः आत्मानं मनः युंजीत समाहितं कुर्यात् सततं निरंतरं रहसि एकांते स्थितः सन् एकाकी संगशून्यः यतं संयतं चित्तं आत्मा देहश्च यस्य निराशीः निराकांक्षः निराहारो वा अपरिग्रहः शून्यश्च १० ५ ५ श्रीगोपालकृष्णाय नमः ७ ७ श्रीनर्मदादेव्यै नमः ७ ७ श्रीरामाय नमः
राम नारायणानन्त मुकुंद मधुसूदन कृष्ण केशव कंसारे हरे वैकुंठ वामन १ श्रीराम ७ जैयराम श्रीशारदायै नमः ७ ७

श्रीः

३४

आसननियमं दर्शयन्नाह द्वाभ्यां शुचाविति शुद्धे स्थाने आत्मनः स्वस्यासनं स्थापयित्वा कीदृशं स्थिरमचलं नातीवोन्नतं नचातिनीचं चैलं वस्त्रं अजि
नं व्याघ्रादिचर्म चैलाजिने कुशेभ्य उत्तरे यस्मिन् कुशानामुपरि चर्म तदुपरि वस्त्रमास्तीर्येत्यर्थः ११ तत्रेति तत्र आसने उपविश्य एकाग्रं विक्षेपरहि
तं मनः कृत्वा योगं युंज्यात् अभ्यसेत् यता उपरताश्चित्तस्येन्द्रियाणां च क्रिया यस्य आत्मनो मनसो विशुद्धये उपशान्तये १२ चित्तैकाग्र्योपयोगि
नीं देहादिधारणां दर्शयन्नाह द्वाभ्यां सममिति कायमिति देहमध्यभागो विवक्षितः कायश्च शिरश्च ग्रीवा च कायशिरोग्रीवं मूलाधारादार
भ्य मूर्द्धान्तपर्यंतं समं अवक्रं निश्चलं धारयन् स्थिरः दृढप्रयत्नो भूत्वा इत्यर्थः स्वीयं नासिकाग्रं संप्रेक्ष्येति अर्द्धनिमीलितनेत्र इत्यर्थः इतस्ततो

शुचौ देशे प्रतिष्ठाप्य स्थिरमासनमात्मनः नात्युच्छ्रितं नातिनीचं चैलाजिनकुशोत्तरं ११ तत्रैकाग्रं मनः कृ
त्वा यतचित्तेन्द्रियक्रियः उपविश्यासने युंज्याद्योगमात्मविशुद्धये १२ समं कायशिरोग्रीवं धारयन्नचलं स्थि
रः संप्रेक्ष्य नासिकाग्रं स्वं दिशश्चानवलोकयन् १३ प्रशांतात्मा विगतभीर्ब्रह्मचारिव्रते स्थितः मनः संयम्य
मच्चित्तो युक्त आसीत मत्परः १४ युंजन्नेवं सदात्मानं योगी नियतमानसः शांतिं निर्वाणपरमां मत्संस्थामधिगच्छति

दिशश्चानवलोकयन् आसीतेत्युत्तरेणान्वयः १३ प्रशांतेति प्रशांत आत्मा चित्तं यस्य विगता भीर्भयं यस्य ब्रह्मचारिव्रते ब्रह्मचर्ये स्थितः
सन् मनः संयम्य प्रत्याहृत्य मय्येव चित्तं यस्य अहमेव परः पुरुषार्थो यस्य एवं युक्तो भूत्वा आसीत तिष्ठेत् १४ योगाभ्यासफलमाह युंज
न्नेवमिति एवमुक्तेन प्रकारेण सदा आत्मानं मनः युंजन् समाहितं कुर्वन् नियतं निरुद्धं मानसं चित्तं यस्य सः शांतिं संसारोपरमं प्राप्नोति क
थंभूतां निर्वाणं परमं प्राप्यं यस्यां तां मत्संस्थां मद्रूपेणावस्थितामित्यर्थः १५

योगाभ्यासनिष्ठस्यआहारादिनियममाह द्वाभ्यां नेति अत्यंतमधिकंभुंजानस्यएकांतमत्यंतमभुंजानस्यापियोगः समाधिर्नभव तितथाअतिनिद्राशीलस्यअतिजाग्रतश्चयोगोनैवास्ति १६ तर्हिकथंभूतस्ययोगोभवतीत्यतआह युक्तेति युक्तोनियतआहारो विहारश्चगतिर्यस्य कर्मसुकार्येषुयुक्तानियताचेष्टायस्य युक्तौनियतौस्वप्नावबोधौनिद्राजागरौयस्यतस्यदुःखनिवर्तकोयोगःस्या

नात्यश्नतस्तुयोगोस्ति नचैकांतमनश्नतः नचातिस्वप्नशीलस्यजाग्रतो नैवचार्जुन १६
युक्ताहारविहारस्ययुक्तचेष्टस्यकर्मसु युक्तस्वप्नावबोधस्ययोगोभवतिदुःखहा १७
यदाविनियतंचित्तमात्मन्येवावतिष्ठते निस्पृहः सर्वकामेभ्योयुक्तइत्युच्यतेतदा १८
यथादीपोनिवातस्थोनेंगते सोपमास्मृता योगिनोयतचित्तस्ययुंजतोयोगमात्मनः १९

द्भवति १७ कदानिष्पन्नयोगःपुरुषोभवतीत्यपेक्षायामाह यदेति विनियतंसंयतंचित्तंआत्मन्येवयदानिश्चलंतिष्ठति तदाप्राप्तयोगइ त्युच्यते १८ आत्मैकाकारतयावस्थितस्यचित्तस्योपमानमाह यथेति वातशून्येदेशेस्थितोदीपोयथानेंगतेनविचलति साउपमादृष्टा नः कस्यआत्मविषयंयोगमभ्यस्यतोयोगिनः यतंनियतंचित्तंयस्य निष्कंपतयाप्रकाशकतयाचचित्तंतद्वत्तिष्ठतीत्यर्थः १९ ७००

यं संन्यासमिति प्राहुर्योगं तं विद्धि पांडव इत्यादौ कर्मैव योगशब्देनोक्तं नात्यश्नतस्तु योगोस्तीत्यादौ तु समाधिर्योगशब्देनोक्तः तत्र मुख्यो यो-
गः कइत्यपेक्षायां समाधिमेव स्वरूपतः फलतश्च लक्षयन् स एव मुख्यो योग इत्याह यत्रेति सार्द्धैस्त्रिभिः यत्र यस्मिन्नवस्थाविशेषे योगाभ्या-
सेन निरुद्धं चित्तं उपरतं भवतीति योगस्य स्वरूपलक्षणमुक्तं तथा च पातंजलिसूत्रं योगश्चित्तवृत्तिनिरोध इति इष्टप्राप्तिलक्षणेन फले-
न तमेव लक्षयति यत्र च अवस्थाविशेषे आत्मना शुद्धेन मनसा आत्मानमेव पश्यति न तु देहादि परस्थस्यात्मन्येव तुष्यति न तु विषयेषु यत्रे

यत्रोपरमते चित्तं निरुद्धं योगसेवया यत्र चैवात्मनात्मानं पश्यन्नात्मनि तुष्यति २०
सुखमात्यंतिकं यत्तद्बुद्धिग्राह्यमतींद्रियं वेत्ति यत्र न चैवायं स्थितश्चलति तत्वतः २१
यं लब्ध्वा चापरं लाभं मन्यते नाधिकं ततः यस्मिन्स्थितो न दुःखेन गुरुणापि विचाल्यते २२

त्यादिना ते योगसंज्ञितं विद्यादिति चतुर्थेनान्वयः २० आत्मन्येव तोषे हेतुमाह सुखमिति यत्र यस्मिन्नवस्थाविशेषे यत्सुखं किमपि निर-
तिशयं आत्यंतिकं नित्यं सुखं वेत्ति ननु तदा विषयेंद्रियसंबंधाभावात् कुतः सुखं स्यात्तत्राह अतींद्रियं विषयेंद्रियसंबंधातीतं केवलं बुद्ध्यै-
वात्माकारया ग्राह्यं अत एव च यत्र स्थितः सन् आत्मनतत्वान्नैव चलति २१ अचलत्वमेवोपपादयति यं आत्मसुखरूपं लाभं लब्ध्वा ततोधि-
कं अपरं लाभं न मन्यते तस्यैव निरतिशयसुखत्वात् यस्मिंश्च स्थितो महता शीतोष्णादिदुःखेन न विचाल्यते नाभिभूयते एतेनानिष्टनिवृत्ति-

३२

भ०गी०टी०
३६

एवंभूतस्तस्यावस्थाविशेषमाह तमित्यर्धेन दुःखशब्देन दुःखमिश्रितत्वात् वैषयिकं सुखमपि गृह्यते दुःखस्य संयोगेन संस्पर्शमात्रेणापि वियोगो यस्मिन् तं अवस्थाविशेषं योगसंज्ञितं योगशब्दवाच्यं विद्यात् जानीयात् परमात्मनः क्षेत्रज्ञस्य योजनं योगः यद्वा दुःखसंयोगेन वियोग एव स्थूरे कातरशब्दवत् विपरीतलक्षणया योग उच्यते कर्मणि तु योगशब्दस्तदुपायत्वादौपचारिक एवेति भावः तस्मादेवं महाफलो योगस्तस्मात्स एव यत्नतोऽभ्यसनीय इत्याह स इति सार्धेन स योगो निश्चयेन शास्त्राचार्योपदेशजनितेन योक्तव्यः अभ्यसनीयः यद्यपि शीघ्रं न सिध्यति तथापि अनिर्विण्णेन निर्वेदरहितेन चेतसा योक्तव्यः दुःखबुद्ध्या प्रयत्नशैथिल्यं निर्वेदः २३ किंच संकल्प इति संकल्पा

तं विद्याद्दुःखसंयोगवियोगं योगसंज्ञितं स निश्चयेन योक्तव्यो योगोऽनिर्विण्णचेतसा २३

संकल्पप्रभवान्कामांस्त्यक्त्वा सर्वानशेषतः मनसैवेंद्रियग्रामं विनियम्य समंततः २४

शनैः शनैरुपरमेद्बुद्ध्या धृतिगृहीतया आत्मसंस्थं मनः कृत्वा न किंचिदपि चिंतयेत् २५

त्प्रभवा येषां तान् योगप्रतिकूलान् सर्वान् कामानशेषतः सवासनान् त्यक्त्वा मनसा विषयदोषदर्शिना सर्वतः प्रसरन्तमिंद्रियसमूहं विशेषेण नियम्य योगो योक्तव्य इति पूर्वेणान्वयः २४ यदि तु प्राक्तनकर्मसंस्कारेण मनो विचलेत् तर्हि धारणया स्थिरीकुर्यादित्याह शनैरिति धृतिर्धारणा तया गृहीतया वशीकृतया बुद्ध्या आत्मसंस्थं आत्मन्येव सम्यक्स्थितं निश्चलं मनः कृत्वा उपरमेत् तत्तु शनैः शनैरभ्यासक्रमेण न तु सहसा उपरमस्वरूपमाह न किंचिदपि चिंतयेत् निश्चले मनसि स्वयमेव प्रकाशमानपरमानंदस्वरूपो भूत्वा आत्मध्यानादपि निवर्त्तेतेत्यर्थः २५

श्रीः
३६

एवमपि यदि रजोगुणवशात् मनः प्रचलेत् तर्हि पुनः प्रत्याहारेण वशीकुर्यादित्याह यत इति स्वभावतश्चंचलं धार्यमाणमस्थिरं मनो यं यं विष
यं प्रति निर्गच्छति ततस्ततः प्रत्याहृत्यात्मन्येव स्थिरीकुर्यात् २६ एवं प्रत्याहारादिभिः पुनः पुनर्मनो वशीकुर्वन्तं रजोगुणक्षये सति योगसुखं
प्राप्नोतीत्याह प्रशांतमनसमिति एवमुक्तेन प्रकारेण शांतं रजो यस्य तं अत एव प्रशांतं मनो यस्य तं एनं निष्कल्मषं ब्रह्मत्वं प्राप्तं योगिनं उ
त्तमं समाधिसुखं स्वयमेवोपैति प्राप्नोति २७ ततश्च कृतार्थो भवतीत्याह युंजन्निति एवमनेन प्रकारेण सर्वदा आत्मानं मनः युंजन् वशीकुर्व

यतो यतो निश्चरति मनश्चंचलमस्थिरं ततस्ततो नियम्यैतदात्मन्येव वशं नयेत् २६ प्रशान्तमनसं ह्येनं योगिनं
सुखमुत्तमं उपैति शांतरजसं ब्रह्मभूतमकल्मषं २७ युंजन्नेवं सदात्मानं योगी विगतकल्मषः सुखेन ब्रह्मसंस्प
र्शमत्यन्तं सुखमश्नुते २८ सर्वभूतस्थमात्मानं सर्वभूतानि चात्मनि ईक्षते योगयुक्तात्मा सर्वत्र समदर्शनः २९

न् विशेषेण सर्वात्मना गतं कल्मषं यस्य स योगी सुखेन अनायासेन ब्रह्मणः संस्पर्शः अविद्यानिवर्तकः साक्षात्कारस्तदेव अत्यंतं सर्वोत्तमं
सुखमश्नुते जीवन्मुक्तो भवतीत्यर्थः २८ ब्रह्मसाक्षात्कारमेव दर्शयति सर्वभूतस्थमिति योगेनाभ्यस्यमानेन युक्तात्मा समाहितचि
त्तः सर्वत्र समं ब्रह्मैव पश्यतीति समदर्शनः स्वमात्मानमविद्याकृतदेहादिपरिच्छेदशून्यं सर्वभूतेषु ब्रह्मादिस्थावरांतेषु अवस्थितं प
श्यति तानि च स्वात्मन्यभेदेन पश्यति २९

भ०गी०टी०
३७

एवंभूतात्मज्ञानस्य सर्वभूतात्मतया मदुपासनं मुख्यं कारणमित्याह य इति मां परमेश्वरं सर्वत्र भूतमात्रे यः पश्यति सर्वं च प्राणिमात्रं मयि पश्यति तस्याहं न प्रणश्यामि अदृश्यो न भवामि स च मम अदृश्यो न भवति प्रत्यक्षीभूतोऽहं कृपादृष्ट्या तमवलोक्यानुगृह्णामीत्यर्थः ३० ननु एवंभूतो विधिः किंकरः स्यादित्याह सर्वभूतस्थितमिति सर्वभूतेषु स्थितं मामभेदमाश्रित्य यो भजति स योगी ज्ञानी सन् सर्वथा सर्वकर्मत्यागेनापि वर्तमानो मय्येव वर्तते इति मुच्यते न तु भ्रश्यतीत्यर्थः ३१ एवं च मां भजतां योगिनां मध्ये सर्वभूतानुकंपी श्रेष्ठ इत्याह आत्मौपम्येनेति आत्मौपम्येन स्वसादृश्येन यथा मम सुखं प्रियं दुःखं वा अप्रियं तथान्येषामपि इति सर्वत्र समं पश्यन् सुखमेव सर्वेषां यो वांछति न तु कस्यापि दुःखं स योगी

यो मां पश्यति सर्वत्र सर्वं च मयि पश्यति तस्याहं न प्रणश्यामि स च मे न प्रणश्यति ३० सर्वभूतस्थितं यो मां भजत्येकत्वमास्थितः सर्वथा वर्तमानोऽपि स योगी मयि वर्तते ३१ आत्मौपम्येन सर्वत्र समं पश्यति योऽर्जुन सुखं वा यदि वा दुःखं स योगी परमो मतः ३२ अर्जुन उवाच योऽयं योगस्त्वया प्रोक्तः साम्येन मधुसूदन एतस्याहं न पश्यामि चंचलत्वात्स्थितिं स्थिरां ३३ चंचलं हि मनः कृष्ण प्रमाथि बलवद्दृढं तस्याहं निग्रहं मन्ये वायोरिव सुदुष्करं ३४

श्रेष्ठः ममाभिमत इत्यर्थः ३२ उक्तलक्षणस्य योगस्यासंभवं मत्वा अर्जुन उवाच योऽयमिति साम्येन मनसो लयविक्षेपशून्यतया केवलात्माकारतया अवस्थानेन योऽयं योगस्त्वया प्रोक्तः एतस्य योगस्य स्थिरां दीर्घकालां स्थितिं न पश्यामि मनसश्चंचलत्वात् ३३ एतदेव स्फुटयति चंचलं हीति चंचलं स्वभावेनैव चपलं किंच प्रमाथि प्रमथनशीलं देहेंद्रियक्षोभकमित्यर्थः किंच बलवत् विचारेणापि जेतुमशक्यं किंच दृढं विषयवासनानुबद्धतया दुर्भेदं अतो यथा आकाशे दोधूयमानस्य वायोः कुंभादिषु निरोधनमशक्यं तथा तस्य मनसोऽपि निग्रहं निरोधं सुदुष्करं सर्वथा कर्तुं

श्रीः
३७

तदुक्तं चंचलत्वादिकमंगीकृत्यैव मनोनिग्रहोपायं श्रीभगवानुवाच असंशयमिति चंचलत्वादिना मनो निरोद्धुमशक्यमिति यदुक्तं तं निःसंशयमेव तथापि अभ्यासेन परमात्माकारप्रत्यया वृत्त्या विषयवैतृष्ण्येन च गृह्यते अभ्यासेन च लयप्रतिबंधात् वैराग्येण च विक्षेपप्रतिबंधात् उपरतवृत्तिकं सत् परमात्माकारेण परिणतं तिष्ठतीत्यर्थः तदुक्तं योगशास्त्रे मनसो वृत्तिशून्यस्य ब्रह्माकारतया स्थितिः या संप्रज्ञातनामासौ समाधिरभिधीयते इति ३५ एतावांस्तु विशेष इत्याह असंयतात्मनेति उक्तप्रकारेणाभ्यासवैराग्याभ्यां

श्रीभगवानुवाच असंशयं महाबाहो मनो दुर्निग्रहं चलं अभ्यासेन तु कौंतेय वैराग्येण च गृह्यते ३५ असंयतात्मना योगो दुःप्राप इति मे मतिः वश्यात्मना तु यतता शक्योवाप्तुमुपायतः ३६ अर्जुन उवाच अयतिः श्रद्धयोपेतो योगाच्चलितमानसः अप्राप्य योगसंसिद्धिं कां गतिं कृष्ण गच्छति ३७

असंयत आत्मा चित्तं यस्य तेन पुरुषेणायं योगो दुःप्रापः प्राप्तुमशक्यः अभ्यासवैराग्याभ्यां वश्यो वशवर्ती आत्मा चित्तं यस्य तेन पुनरभ्यासेनैवोपायेन प्रयत्नं कुर्वता योगः प्राप्तुं शक्यः ३६ स्वभ्यासवैराग्याभावेन कथंचिदप्राप्तसम्यक्ज्ञानः किं फलमाप्नोतीत्यर्जुन उवाच अयतिरिति प्रथमं श्रद्धयोपेत एव योगे प्रवृत्तः मिथ्याचारतया ततः परं अयतिः न सम्यक् यतते शिथिलाभ्यास इत्यर्थः तथा योगाच्चलितमानसं विषयप्रवणं चित्तं यस्य मंदवैराग्य इत्यर्थः एवमभ्यासवैराग्यशैथिल्याद्योगस्य संसिद्धिं फलं अप्राप्य कां गतिं प्राप्नोति ३७ ७७

किं न नश्यति २

ग्रहणाभिप्रायं विवृणोति कच्चिदिति कर्मणामीश्वरेऽर्पितत्वाद्नुष्ठानान्नावत् कर्मफलं स्वर्गादिकं प्राप्नोति योगानिष्पत्तेश्च न मोक्षं प्राप्नो
ति एवमुभयस्मात्भ्रष्टः अप्रतिष्ठो निराश्रयः अत एव ब्रह्मणः प्राप्त्युपाये पथि मार्गे विमूढः स तु कच्चित् किं वा न नश्यति इत्यर्थः नाशे दृष्टांतः
यथा छिन्नमभ्रं पूर्वस्मादभ्रात् विश्लिष्टमभ्रांतरं चाप्राप्तं सत् मध्य एव विलीयते तद्वत् ३८ त्वयैव सर्वज्ञेन मम संदेहो निरसनीयः
त्वदन्यस्य संदेहनिवर्त्तको नास्तीत्याह एतन्मे इति एतत् एनं छेत्ता निवर्त्तकः स्पष्टमन्यत् ३९ अत्रोत्तरं श्रीभगवानुवाच पार्थे
ति साद्धैश्चतुर्भिः इह लोके नाशः उभयभ्रंशात्पातित्यं अमुत्र परलोके नाशो नरकप्राप्तिः तदुभयं तस्य नास्त्येव यतः कल्याणकृत् शुभ

कच्चिन्नोभयविभ्रष्टश्छिन्नाभ्रमिव नश्यति अप्रतिष्ठो महाबाहो विमूढो ब्रह्मणः पथि ३८ एतन्मे संशयं कृष्ण
छेत्तुमर्हस्यशेषतः त्वदन्यः संशयस्यास्य छेत्ता न ह्युपपद्यते ३९ श्रीभगवानुवाच पार्थ नैवेह नामुत्र विनाशस्तस्य
विद्यते नहि कल्याणकृत्कश्चिद्दुर्गतिं तात गच्छति ४० प्राप्य पुण्यकृतां लोकानुषित्वा शाश्वतीः समाः शुचीनां श्री
मतां गेहे योगभ्रष्टोऽभिजायते ४१ अथवा योगिनामेव कुले भवति धीमतां एतद्धि दुर्लभतरं लोके जन्म यदीदृशं ४२

कारी कश्चित् दुर्गतिं न गच्छति अयं च शुभकारी श्रद्धया योगे प्रवृत्तत्वात् तातेति लोकरीत्योपलालयन् संबोधयति ४० तर्हि किमसौ प्रा
प्नोतीत्यपेक्षायामाह प्राप्येति पुण्यकारिणामश्वमेधादियाजिनां लोकान् प्राप्य तत्र शाश्वतीः समाः बहून् संवत्सरान् उषित्वा उत्कृष्टमनुष्य
पशुचीनां सदाचाराणां श्रीमतां धनिनां गेहे स योगभ्रष्टो जन्म प्राप्नोति ४१ अल्पकालाभ्यस्तयोगभ्रंशे गतिरियमुक्ता चिराभ्यस्तयोगभ्रंशे तु
पक्षांतरमाह अथवेति योगनिष्ठानां धीमतां ज्ञानिनामेव कुले जायते न तु पूर्वोक्तानामनारूढयोगानां कुले एतत् जन्म स्तौति ईदृशं यत् जन्म

एतद्धि दुर्लभतरं लोके जन्म यदीदृशं ४२

ततः किमत आह तत्रेति सार्द्धेन तत्र हि प्रकारे जन्मनि पूर्वदेहे भवं पौर्वदेहिकं तमेव ब्रह्मविषयबुद्ध्या संयोगं लभते ततश्च भूयोऽधिकं संसिद्धौ मोक्षे प्रयत्नं करोति तत्र हेतुः तेनैव पूर्वदेहकृतेनाभ्यासेन अवशोऽपि कुतश्चिदंतरायात् अनिच्छन्नपि सः ह्रियते विषयेभ्यः परावृत्य ब्रह्मनिष्ठः क्रियते ४३ तदेवं पूर्वाभ्यासवशेन प्रयत्नं कुर्वन् शनैः शनैर्मुच्यत इति इममर्थं कैमुतकन्यायेन स्फुटयति सार्द्धेन जिज्ञासुरिति योगस्य स्वरूपं जिज्ञासुरेव केवलं न तु प्राप्तयोगः एवंभूते योगे प्रविष्टमात्रोऽपि मायावशात् योगभ्रष्टोऽपि शब्दब्रह्म वेदमतिवर्त्तते वेदोक्तकर्मफलान्यतिक्रामति

तत्र तं बुद्धिसंयोगं लभते पौर्वदेहिकं यतते च ततो भूयः संसिद्धौ कुरुनंदन ४३ पूर्वाभ्यासेन तेनैव ह्रियते ह्यवशोऽपि सः जिज्ञासुरपि योगस्य शब्दब्रह्मातिवर्त्तते ४४ प्रयत्नाद्यतमानस्तु योगी संशुद्धकिल्बिषः अनेकजन्मसंसिद्धस्ततो याति परां गतिं ४५ तपस्विभ्योऽधिको योगी ज्ञानिभ्योऽपि मतोऽधिकः कर्मिभ्यश्चाधिको योगी तस्माद्योगी भवार्जुन ४६

तेभ्योऽधिकं फलं प्राप्य मुच्यत इत्यर्थः ४४ यदैवं मंदप्रयत्नोऽपि योगी परां गतिं याति तदा यस्तु योगी प्रयत्नादुत्तरोत्तरमधिकं योगे यतमानो यत्नं कुर्वन् योगेनैव संशुद्धकिल्बिषो विधूतपापः सोऽनेकेषु जन्मसूपचितेन योगेन संसिद्धः सम्यक् ज्ञानी भूत्वा ततः श्रेष्ठां गतिं यातीति किमु वक्तव्यमित्यर्थः ४५ यस्मादेवं तस्मात् तपस्विभ्य इति कृच्छ्रचांद्रायणादितपोनिष्ठेभ्यः ज्ञानिभ्यः शास्त्रज्ञानवद्भ्योऽपि कर्मिभ्य इष्टापूर्त्तकारि

भ०गी०टी०
३८

योगिनामपि यमनियमादिपराणां मध्ये मद्भक्तः श्रेष्ठ इत्याह योगिनामिति मद्गतेन मय्यासक्तेन अंतरात्मना मनसा यो मां परमेश्वरं श्रद्धायुक्तः
सन् भजते स योगयुक्तेषु श्रेष्ठतमः मम संमतः अतो मद्भक्तो भवेति भावः ४७ आत्मयोगमवोचद्यो भक्तियोगशिरोमणिं तं वंदे परमानंदं परमा
नंदमाधवं ॥ इति श्रीभगवद्गीतायां सुबोधिन्यां षष्ठोध्यायः ६ ॥ विक्षेपमात्मनस्तत्त्वं सयोगं सप्तमीरितं भजनीयम
पीदानीमैश्वरं रूपमीर्यते पूर्वाध्यायान्ते मद्गतेनांतरात्मना यो मां भजते स मे युक्ततमो मत इत्युक्तं तत्र कीदृशस्त्वं यस्य भक्तिः कर्त्तव्येत्यपे

योगिनामपि सर्वेषां मद्गतेनान्तरात्मना श्रद्धावान्भजते यो मां स मे युक्ततमो मतः ४७ ॥ इति श्री
मद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे अभ्यासयोगो नाम षष्ठोध्यायः ६
श्रीभगवानुवाच मय्यासक्तमनाः पार्थ योगं युंजन्मदाश्रयः असंशयं समग्रं मां यथा ज्ञास्यसि तच्छृ
णु १ ज्ञानं तेहं सविज्ञानमिदं वक्ष्याम्यशेषतः यज्ज्ञात्वा नेह भूयोन्यज्ज्ञातव्यमवशिष्यते २ ७ ६

क्षायां स्वरूपं निरूपयिष्यन् श्रीभगवानुवाच मय्यासक्तमना इति मयि परमेश्वरे आसक्तमभिनिविष्टं मनो यस्य सः मदाश्रयः अहमेवा
श्रयो यस्य अनन्यशरणः सन् योगं युंजन् अभ्यसन् असंशयं यथा भवत्येवं मां समग्रं विभूतिबलैश्वर्यादिसहितं यथा ज्ञास्यसि तदिदं मया वक्ष्य
माणं शृणु १ वक्ष्यमाणं स्तौति ज्ञानमिति ज्ञानं शास्त्रीयं विज्ञानमनुभवः तत्सहितं इदं महिषयं अशेषतः साकल्येन वक्ष्यामि यत् ज्ञात्वा इह

श्रेयोमार्गे वर्त्तमानस्य पुनरन्यत् ज्ञातव्यं अवशिष्टं न भवति वे
तेनैव कृतार्थो भवतीत्यर्थः २

श्रीः
३८

मद्भक्तिं विना मत्तत्त्वज्ञानं दुर्लभमित्याह मनुष्याणामपि असंख्यातानां जीवानां मध्ये मनुष्यव्यतिरिक्तानां श्रेयसि प्रवृत्तिरेव नास्ति मनुष्याणां च सहस्रेषु मध्ये कश्चिदेव पुण्यवशात् सिद्धये आत्मज्ञानाय यतते प्रयत्नं कुर्वतामपि सहस्रेषु कश्चिदेव प्राक्तनपुण्यवशात् आत्मानं वेत्ति तादृशानां चात्मज्ञानेन सिद्धानां सहस्रेषु कश्चिदपि मां परमात्मानं मत्प्रसादेन तत्त्वतो वेत्ति तदेवमतिदुर्लभमपि मत्तत्त्वज्ञानं तुभ्यमहं वक्ष्यामीत्यर्थः ३ एवं श्रोतारमभिमुखीकृत्येदानीं प्रकृतिद्वारा सृष्ट्यादिकर्तृत्वेनेश्वरतत्त्वं प्रतिज्ञातं निरूपयिष्यन् परापरभेदेन प्रकृतिद्वयमाह भूमिरिति द्वाभ्यां भूम्यादिशब्दैः पंचगंधादितन्मात्राण्युच्यंते मनःशब्देन तत्कारणभूतोऽहंकारः बुद्धिशब्देन तत्कारणं महत्तत्वं

मनुष्याणां सहस्रेषु कश्चिद्यतति सिद्धये यततामपि सिद्धानां कश्चिन्मां वेत्ति तत्वतः ३

भूमिरापोनलो वायुः खं मनो बुद्धिरेव च अहंकार इतीयं मे भिन्ना प्रकृतिरष्टधा ४

अपरेयमितस्त्वन्यां प्रकृतिं विद्धि मे परां जीवभूतां महाबाहो ययेदं धार्यते जगत् ५

अहंकारशब्देन तत्कारणमविद्या इत्येवमष्टधा भिन्ना यद्वा भूम्यादिशब्दैः पंचमहाभूतानि सूक्ष्मैः सहैकीकृत्य गृह्यन्ते अहंकारशब्देनैवाहंकारः तेनैव तत्कार्याणींद्रियाणि गृह्यन्ते बुद्धिरिति महत्तत्वं मनःशब्देन तु मनसैवोन्नेयमव्यक्तरूपं प्रधानमित्यनेन प्रकारेणाष्टधा प्रकृतिर्मायाख्या शक्तिरष्टधा भिन्ना विभागं प्राप्ता चतुर्विंशतिभेदभिन्नत्वेप्यष्टास्वेवांतर्भावविवक्षयाऽष्टधा भिन्नेत्युक्तं तथा वक्ष्यमाणक्षेत्राध्याये इमामेव प्रकृतिं चतुर्विंशतितत्वात्मना प्रपंचयिष्यति महाभूतान्यहंकारो बुद्धिरव्यक्तमेव च इंद्रियाणि दशैकं च पंच चेंद्रियगोचरा इति ४ अपरामिमां प्रकृतिमुपसंहरन् परां प्रकृतिमाह अपरेति अष्टधोक्ता प्रकृतिः इयमपरा निकृष्टा जडत्वात् परार्थत्वाच्च इतः स

काशात् परां प्रकृष्टां अन्यां जीवभूतां मे प्रकृतिं जानीहि परत्वे हेतुः यया चेतनया क्षेत्रज्ञरूपया स्वकर्मद्वारेण इदं जगद्धार्यते ५ अनयोः प्र-
कृतित्वं दर्शयन् स्वस्य तद्द्वारा सृष्ट्यादिकारणत्वमाह एतदिति एते क्षेत्रक्षेत्रज्ञरूपे प्रकृती योनी कारणभूते येषां तान्येतद्योनीनि स्थावर-
जंगमात्मकानि सर्वाणि भूतानि उपधारय बुध्यस्व तत्र जडा प्रकृतिर्देहरूपेण परिणमते चेतना तु मदंशभूता भोक्तृत्वेन देहेषु प्रविश्य
स्वकर्मणा तानि धारयति ते च मदीये प्रकृती मत्तः संभूते अतो हमेव कृत्स्नस्य सप्रकृतिकस्य जगतः प्रभवः प्रकर्षेण भवत्यस्मादिति प्रभवः
परमं कारणमहमित्यर्थः तथा प्रलीयते नेनेति प्रलयः संहर्तापि अहमेवेत्यर्थः ६ यस्मादेवं तस्मान्मत्त इति मत्तः सकाशात् परतरं श्रे-

एतद्योनीनि भूतानि सर्वाणीत्युपधारय अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथा ६
मत्तः परतरं नान्यत्किंचिदस्ति धनंजय मयि सर्वमिदं प्रोतं सूत्रे मणिगणा इव ७
रसोहमप्सु कौंतेय प्रभास्मि शशिसूर्ययोः प्रणवः सर्ववेदेषु शब्दः खे पौरुषं नृषु ८

ष्ठं जगतः सृष्टिसंहारयोः स्वतंत्रं कारणं किंचिदपि नास्ति स्थितिहेतुरप्यहमेवेत्याह मयि सर्वमिदं प्रोतं ग्रथितं आश्रितमित्यर्थः दृष्टांतः
स्पष्टः ७ जगत्स्थितिहेतुत्वं प्रपंचयति रसोहमिति पंचभिः अप्सु रसोहं रसमात्ररूपया विभूत्या आश्रयत्वेन स्थितोहमित्यर्थः तथा श-
शिसूर्ययोः प्रभास्मि चंद्रार्कयोः प्रकाशरूपया विभूत्या तदाश्रयत्वेन स्थितोहमित्यर्थः एवमुत्तरत्रापि द्रष्टव्यं सर्वेषु वेदेषु वैखरीरूपेषु
तन्मूलभूतः प्रणव ॐकारोस्मि खे आकाशे शब्दः तन्मात्ररूपोस्मि नृषु पुरुषेषु पौरुषं उद्यमोस्मि उद्यमे हि पुरुषास्तिष्ठंति ८ ५६

किंच पुण्योऽविकृतो गंधः गंधतन्मात्रं पृथिव्याश्रयभूतोऽहमित्यर्थः विभूतिरूपेणाश्रयत्वस्य विवक्षितत्वात् सुरभिगंधस्यैवोत्कृष्टतया विभू-
तित्वात् पुण्यो गंध इत्युक्तं तथा विभावसौ वह्नौ यत्तेजः सहजा दीप्तिस्तदहं सर्वभूतेषु जीवनं प्राणधारणं आयुरहमित्यर्थः तपस्विषु वाल-
मरुद्वादिषु द्वंद्वसहनं तपोस्मि ९ किंच बीजमिति सर्वेषां भूतानां बीजं सजातीयकार्योत्पादनसामर्थ्यं सनातनं नित्यं उत्तरोत्तरसर्वकार्येषु
अनुस्यूतं तदेव बीजं मा हि भूतानि विद्धि न तु प्रतिव्यक्ति विनश्यत् तथा बुद्धिमतां बुद्धिः प्रज्ञाहमस्मि तेजस्विनां प्रगल्भजनानां तेजः प्रागल्भ्यमहं १०
संकृतं

पुण्यो गंधः पृथिव्यां च तेजश्चास्मि विभावसौ जीवनं सर्वभूतेषु तपश्चास्मि तपस्विषु ९
बीजं मां सर्वभूतानां विद्धि पार्थ सनातनम् बुद्धिर्बुद्धिमतामस्मि तेजस्तेजस्विनामहं १०
बलं बलवतां चाहं कामरागविवर्जितम् धर्माविरुद्धो भूतेषु कामोस्मि भरतर्षभ ११
ये चैव सात्विका भावा राजसास्तामसाश्च ये मत्त एवेति तान्विद्धि न त्वहं तेषु ते मयि १२

प्राप्तेपि पुनरधिकेऽर्थे
किंच बलमिति कामोऽप्राप्ते वस्तुन्यभिलाषः राजसः रागः पुनरभिलषितेर्थे चित्तरंजनात्मकस्तृष्णापरपर्यायस्तामसः ताभ्यां विवर्जितं ब-
लवतां बलं अहमस्मि सात्विकं स्वधर्मानुष्ठानसामर्थ्यमहमित्यर्थः धर्मेणाविरुद्धः स्वदारेषु उत्पत्तिमात्रोपयोगी कामोहं ११ किंच ये चेति
ये चान्येपि सात्विका भावाः शमदमादयः राजसाश्च हर्षदर्पादयः तामसाश्च शोकमोहादयः प्राणिनां स्वकर्मवशाज्जायंते तान्सर्वान्मत्त
एव जाता इति विद्धि मदीयप्रकृतिगुणकारणत्वात् एवमपि तेष्वहं न वर्ते जीववत्तदधीनोहं न भवामीत्यर्थः ते तु मदधीनाः संतो मयि वर्तन्त इत्यर्थः
१२

भ०गी०टी०

४२

एवंभूतं त्वां परमेश्वरमव्ययं जनः किमिति न जानातीत्यत आह त्रिभिरिति त्रिभिस्त्रिविधैरेभिः सर्वैः कामलोभादिभिर्गुणविकारैः भावैः स्वभावैर्मोहितमिदं जगत् अतो मां नाभिजानाति कथंभूतं एभ्यो भावेभ्यः परं एभिरसंस्पृष्टमेतेषां नियन्तारं अत एव अव्ययं निर्विकारमित्यर्थः १३ केन हि त्वां जानंतीत्यत आह दैवी ह्येति दैवी अलौकिकी अत्यद्भुतेत्यर्थः गुणमयी सत्वादिगुणविकारात्मिका मम परमेश्वरस्य शक्तिर्माया दुरत्यया दुस्तरा हि प्रसिद्धमेतत् तथापि ये मामेवाव्यभिचारिण्या भक्त्या प्रपद्यंते भजंति ते मायामेतां दुस्तरामपि तरंति ततो मां जानंतीति भावः १४ किमिति तर्हि सर्वे त्वामेव न भजंतीत्यत आह न मामिति नरेषु येऽधमास्ते मां न भजंति अधमे हेतुः मूढाः विवेकशून्याः तत्कुतः दुष्कृतिनः पापशीलाः अतो

त्रिभिर्गुणमयैर्भावैरेभिः सर्वमिदं जगत् मोहितं नाभिजानाति मामेभ्यः परमव्ययं १३ दैवी ह्येषा गुणमयी मम माया दुरत्यया मामेव ये प्रपद्यन्ते मायामेतां तरंति ते १४ न मां दुष्कृतिनो मूढाः प्रपद्यन्ते नराधमाः माययापहृतज्ञाना आसुरं भावमाश्रिताः १५ चतुर्विधा भजन्ते मां जनाः सुकृतिनोऽर्जुन आर्त्तो जिज्ञासुरर्थार्थी ज्ञानी च भरतर्षभ १८ ८८

माययाऽपहृतं निरस्तं शास्त्राचार्योपदेशाभ्यां जातमपि ज्ञानं येषां ते अत एव दंभो दर्पोऽभिमानश्च क्रोधः पारुष्यमेव चेत्यादिना वक्ष्यमाणमासुरं भावं प्राप्ताः संतो न भजंति १५ सुकृतिनस्तु मां भजंति ते च सुकृततारतम्येन चतुर्विधा इत्याह चतुर्विधा इति पूर्वजन्मसु ये कृतपुण्या जनास्ते मां भजंति ते चतुर्विधाः आर्त्तो रोगाद्यभिभूतः स यदि पूर्वं कृतपुण्यस्तर्हि मां भजन्ति अन्यथा क्षुद्रदेवताभजनेन संसरति एवमुत्तरत्रापि द्रष्टव्यम् जिज्ञासुः आत्मज्ञानेच्छुः अर्थार्थी अत्र चापरत्र वा भोगसाधनभूतार्थलिप्सुः ज्ञानी चात्मवित् १८ श्रीगोपालकृष्णाय नमः ८८

जिज्ञासवः पृ[illegible]क्षिताद्यः

अर्थार्थिनो ध्रुवाद्यः

ज्ञानिनः शुकसनकाद्यः

श्रीः

४२

एतेषां मध्ये ज्ञानी श्रेष्ठ इत्याह तेषामिति तेषां मध्ये ज्ञानी विशिष्टः तत्र हेतवः नित्ययुक्तः सदा मन्निष्ठः एकस्मिन्नु मय्येव भक्तिर्यस्य सः ज्ञानिनो देहाभिमानाभावेन विक्षेपाभावात् नित्ययुक्तत्वमेकांतभक्तिश्च संभवति नान्यस्य अत एव हि तस्याहमत्यंतं प्रियः स च मम तस्मादेतैर्नित्य युक्तत्वादिभिश्चतुर्भिर्हेतुभिः स उक्तो मद्भक्त इत्यर्थः १७ तर्हि किमितरे त्रयस्त्वद्भक्ताः संसरंतीत्यत आह उदारा इति सर्वेप्येते उदाराः महांतः मोक्ष भाज एवेत्यर्थः ज्ञानी पुनरात्मैवेति मे मतं निश्चयः हि यस्मात्स ज्ञानी युक्तात्मा मदेकचित्तः सन् न विद्यते उत्तमा यस्याः तामनुत्तमां गतिं मामेवा स्थितः आश्रितवान् मद्व्यतिरिक्तमन्यत्फलं न मन्यत इत्यर्थः १८ एवंभूतो भक्तो दुर्लभ इत्याह बहूनामिति बहूनां जन्मनां किंचित्पुण्योपचयेन

तेषां ज्ञानी नित्ययुक्त एकभक्तिर्विशिष्यते प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः १७ उदाराः सर्व एवैते ज्ञानी त्वात्मैव मे मतं आस्थितः स हि युक्तात्मा मामेवानुत्तमां गतिम् १८ बहूनां जन्मनामंते ज्ञानवान्मां प्रपद्यते वासुदेवः सर्वमिति स महात्मा सुदुर्लभः १९ कामैस्तैस्तैर्हृतज्ञानाः प्रपद्यन्तेऽन्यदेवताः तं तं नियममास्थाय प्रकृत्या नियताः स्वया २०

अंते चरमे जन्मनि ज्ञानवान्सन् सर्वमिदं चराचरं वासुदेव एवेति सर्वात्मदृष्ट्या मां प्रपद्य ते भजति अतः स महात्मा अपरिच्छिन्नदृष्टिः सुदुर्लभः १९ तदेवं कामिनोऽपि संतः कामप्राप्तये परं मामेव ये भजंति ते कामान्प्राप्य शनैर्मुच्यंत इत्युक्तं ये त्वत्यंतं राजसास्तामसाश्च कामाभिभूताः क्षुद्रदेवताः सेवन्ते ते न तरंतीत्याह कामैरिति चतुर्भिः ये तु तैस्तैः पुत्रकीर्तिशत्रुजयादिविषयैः कामैरपहृतविवेकाः संतः अन्याः क्षुद्राः भूतप्रेतयक्षादिदेवता भजंति किं कृत्वा तत्तद्देवताराधने यो यो नियम उपवासादिलक्षणस्तं तं नियमं स्वीकृत्य तत्रापि स्वकीयया प्रकृत्या पूर्वाभ्यासवासनया नियता वशीकृताः संतो देवताविशेषं ये भजंति तेषां मध्ये

२०

भ०गी०टी०
४२

योयो यामिति यो यो भक्तः यां यां तु देवतारूपां मदीयामेव मूर्तिं श्रद्धयार्चितुं प्रवर्तते तस्य भक्तस्य तत्तन्मूर्तिविषयां तामेव श्रद्धां अचलां दृढां अहं अं
तर्यामी विदधामि करोमि २१ ततश्च स तयेति स भक्तः तया दृढश्रद्धया तस्यास्तन्वा आराधनमाराधनं ईहते करोति ततश्च ये संकल्पितास्तान् कामान्
ततो देवताविशेषान् लभते किंतु मयैव तद्देवतान्तर्यामिणा विहितान् निर्मितान् हि स्फुटमेतत् देवतानामपि मदधीनत्वात् मन्मूर्तित्वाच्चेत्यर्थः २२
तद्देवताः सर्वा अपि देवता ममैव तनवः अतस्तदाराधनमपि वस्तुतो मदाराधनमेव अहमेव च तत्फलदाता अपि तथापि तु साक्षान्मद्भक्तानां च तेषां च फल
वैषम्यं भवतीत्याह अन्तवत्त्विति अल्पमेधसां परिछिन्नदर्शिनां मया दत्तमपि तत्फलं अंतवत् विनाशि भवति तदेवाह देवान्यजंतीति देवयजः

योयो यां यां तनुं भक्तः श्रद्धयार्चितुमिच्छति तस्य तस्याचलां श्रद्धां तामेव विदधाम्यहं २१ स तया श्रद्धया युक्तस्तस्यारा
धनमीहते लभते च ततः कामान्मयैव विहितान्हितान् २२ अंतवत्तु फलं तेषां तद्भवत्यल्पमेधसां देवान्देवयजो यांति मद्भ
क्ता यांति मामपि २३ अव्यक्तं व्यक्तिमापन्नं मन्यंते मामबुद्धयः परं भावमजानन्तो ममाव्ययमनुत्तमम् २४ ६ ६ ६

ते देवान् अंतवत्तो यांति मद्भक्तास्तु मामनाद्यनंतपरमानंदं प्राप्नुवंति २३ ननु च समाने प्रयासे महति च फलविशेषे सति सर्वेपि किमिति देवतांतरं
हित्वा त्वामेव भजंति तत्राह अव्यक्तमिति अव्यक्तं प्रपंचातीतं मां व्यक्तिं मनुष्यमत्स्यकूर्मादिभावं प्राप्तमल्पबुद्धयो मन्यंते तत्र हेतुः मम परं भावं स्व
रूपमजानन्तः कथंभूतं अव्ययं नित्यं न विद्यते उत्तमो यस्मात्तं भावं अतो जगद्रक्षार्थं लीलया विष्कृतनानाविशुद्धोर्जितसत्वमूर्तिं मां परमेश्वरं स्वकर्मनि
मितभौतिकदेहं च देवतान्तरं समं पश्यंतो मंदमतयो मां नाद्रियंते प्रत्युत क्षिप्रफलदं देवतान्तरमेव भजंति ते चोक्तप्रकारेण अंतवत्फलं प्राप्नुवंतीत्यर्थः २४

श्रीः
४२

तेषां चाज्ञाने हेतुमाह नाहमिति सर्वस्य लोकस्य नाहं प्रकाशः प्रकटो भवामि किंतु मद्भक्तानामेव यतो योगमायया समावृतः योगो युक्तिर्मदीयः
कोऽप्यचिंत्यः प्रज्ञाविलासः स एव माया अघटमानघटनपटीयस्त्वात् तया संछन्नः अत एव मत्स्वरूपज्ञाने मूढः सन्नयं लोकोऽजमव्ययं च मां न जाना
ति २५ सर्वेति मम तत्स्वरूपमजानन्नित्युक्तं तदेव स्वस्य सर्वज्ञत्वमलमनावृतज्ञानशक्तित्वेन दर्शयन् अन्येषामज्ञानमाह वेदेति समतीतानि विन
ष्टानि वर्तमानानि भावीनि च त्रिकालवर्तीनि भूतानि स्थावरजंगमानि सर्वाण्यहं वेद जानामि मायाश्रयत्वान्मम तस्याः स्वाश्रयव्यामोहकत्वाभावा
त् प्रसिद्धं मां न कोऽपि वेत्ति मन्मायया मोहितत्वात् प्रसिद्धं हि लोके मायायाः स्वाश्रयाधीनत्वं अन्यमोहकत्वं च २६ तदेवं मायाविषयत्वेन जीवानां

नाहं प्रकाशः सर्वस्य योगमायासमावृतः मूढोऽयं नाभिजानाति लोको मामजमव्ययम् २५ वेदाहं समतीतानि वर्तमा
नानि चार्जुन भविष्याणि च भूतानि मां तु वेद न कश्चन २६ इच्छाद्वेषसमुत्थेन द्वंद्वमोहेन भारत सर्वभूतानि संमोहं सर्गे यांति
परंतप २७ येषां त्वंतगतं पापं जनानां पुण्यकर्मणां ते द्वंद्वमोहनिर्मुक्ता भजन्ते मां दृढव्रताः २८ ७ ७ ७ ७ श्रीः

परमेश्वराज्ञानमुक्तं तस्य चाज्ञानस्य दृढत्वे कारणमाह इच्छाद्वेषसमुत्थेनेति सृज्यत इति सर्गः सर्गे स्थूलदेहोत्पत्तौ सत्यां तदनुकूले इच्छा तत्प्रतिकूले
च द्वेषः ताभ्यां समुत्थः समुद्भूतो यः शीतोष्णसुखदुःखादिद्वंद्वनिमित्तो मोहो विवेकभ्रंशः तेन सर्वभूतानि संमोहं अहमेव सुखी दुःखी चेति गाढतरं
मभिनिवेशं प्राप्नुवंति अतस्तानि भूतानि मज्ज्ञानाभावान्न मां भजंतीति भावः २७ कुतस्तर्हि केचन त्वां भजन्तो दृश्यन्ते तत्राह येषामिति येषां
तु पुण्याचरणशीलानां सर्वप्रतिबंधकं पापमंतगतं नष्टं ते द्वंद्वनिमित्तेन मोहेन निर्मुक्ता दृढव्रता एकांतिनः संतो मां भजन्ते २८ ७ ७ ७

४३

एवं च मां भजतः सर्वं विज्ञेयं विज्ञाय कृतार्थो भवतीत्याह जरामरणेति जरामरणयोर्निरासार्थं मामाश्रित्य ये प्रयतन्ते ते तत्परं ब्रह्म विदुः कृत्स्नमध्यात्मं च विदुः येन तत्प्राप्तव्यं तद्देहादिव्यतिरिक्तं शुद्धमात्मानं च जानन्तीत्यर्थः तत्साधनभूतमखिलं सरहस्यं कर्म च जानन्ति २९ न चैवंभूतानां योगभ्रंशः कापीत्याह साधीति अधिभूतादिशब्दानामर्थं भगवानेवानन्तराध्याये व्याख्यास्यति अधिभूतेनाधिदैवेन च सह अधियज्ञेन च सहितं ये मां जानन्ति ते युक्तचेतसः मय्यासक्तमनसः प्रयाणकालेऽपि मरणसमयेऽपि मां विदुः न तु तदापि व्याकुलीभूय मां विस्मरन्ति अतो मद्भक्तानां न यो

जरामरणमोक्षाय मामाश्रित्य यतन्ति ये ते ब्रह्म तद्विदुः कृत्स्नमध्यात्मं कर्म चाखिलं २९ साधिभूताधिदैवं मां साधियज्ञं च ये विदुः प्रयाणकालेऽपि च मां ते विदुर्युक्तचेतसः ३० ॥ ॥ इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविं ज्ञानविज्ञानयोगो नाम सप्तमोऽध्यायः ७ ॥ अर्जुन उवाच किं तद्ब्रह्म किमध्यात्मं किं कर्म पुरुषोत्तम अधिभूतं च किं प्रोक्तमधिदैवं किमुच्यते १ अधियज्ञः कथं कोऽत्र देहेऽस्मिन्मधुसूदन प्रयाणकाले च कथं ज्ञेयोऽसि नियतात्मभिः २

गभ्रंशशंकेत्यर्थः कृत्स्नमभक्तेरयत्नेन ब्रह्मज्ञानमवाप्यते इति विज्ञानयोगाख्ये सप्तमे संप्रकाशितं ३० ॥ इति श्रीभगवद्गीताटीकायां सुबोधिन्यां सप्तमोऽध्यायः ७ ब्रह्म कर्मादि भूतादि विदुः कृष्णैकचेतसः इत्युक्तं ब्रह्मकर्मादि स्पष्टमष्टम उच्यते पूर्वाध्यायान्ते भगवतोपक्षिप्तानां ब्रह्माध्यात्मादिसप्तानां पदार्थानां तत्त्वं जिज्ञासुरर्जुन उवाच किं तद्ब्रह्मेति द्वाभ्यां स्पष्टार्थः १ किं च अधियज्ञ इति अत्र देहे यो यज्ञो निवर्त्यते तस्मिन्कोऽधियज्ञः अधिष्ठाता प्रयोजकः फलदाता च कर्त्यर्थः स्वरूपं पृष्ट्वा अधिष्ठानप्रकारं पृच्छति कथं केन प्रकारेण सोऽस्मिन् देहे स्थितो यज्ञमधितिष्ठतीत्यर्थः प्रयाणं

श्रीः

४३

स्वभावाद्यस्य

प्रश्नक्रमेणोत्तरं श्रीभगवानुवाच अक्षरमिति त्रिभिः न क्षरति न चलतीत्यक्षरं परमं यदक्षरं जगतो मूलकारणं तद्ब्रह्म एतद्वै तदक्षरं गार्गि ब्राह्म
णा अभिवदंतीति श्रुतेः स्वस्यैव ब्रह्मण एवांशतो जीवरूपेण भवनं स्वभावः स एवात्मानं देहमधिकृत्य भोक्तृत्वेन वर्तमानोऽध्यात्मशब्देनोच्य
त इत्यर्थः भूतानां जरायुजादीनां भावउत्पत्तिः उद्भवश्च आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः इत्युक्तक्रमेण विवृद्धिस्तौ भावोद्भवौ करोति
यो विसर्गः देवतोद्देशेन द्रव्यत्यागरूपो यज्ञः स एव कर्माणामुपलक्षणमेतत् सर्वकर्मशब्दवाच्यः ३ किंच अधिभूतमिति क्षरो भावो विनश्वरो
देहादिपदार्थो भूतं प्राणिमात्रं अधिकृत्य भवतीति अधिभूतमुच्यते पुरुषो वैराजः सूर्यमंडलवर्ती स्वांशभूतसर्वदेवतानामधिपतिरधिदैव

श्रीभगवानुवाच अक्षरं ब्रह्म परमं स्वभावोऽध्यात्ममुच्यते भूतभावोद्भवकरो विसर्गः कर्म
संज्ञितः ३ अधिभूतं क्षरो भावः पुरुषश्चाधिदैवतं अधियज्ञोऽहमेवात्र देहे देहभृतां वर ४

तमुच्यते स वै शरीरी प्रथमः स वै पुरुष उच्यते आदिकर्ता स भूतानां ब्रह्माग्रे समवर्तत इति श्रुतेः अत्रास्मिन्देहे अंतर्यामित्वेन स्थितोऽहमेव अधि
यज्ञः यज्ञादिप्रवर्तकस्तत्फलदाता च कथं चेदस्योत्तरमनेनैवोक्तं द्रष्टव्यं अंतर्यामिनोऽसंगत्वादिभिर्गुणैर्जीववैलक्षण्येन देहांतर्वर्तित्वस्य प्र
सिद्धत्वात् तथा च श्रुतिः द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीतीति देह
भृतां मध्ये श्रेष्ठेति संबोधयन् तमप्येवंभूतमंतर्यामिणं पराधीनस्वप्रवृत्तिनिवृत्त्यन्वयव्यतिरेकाभ्यां बोद्धुमर्हसीति सूचयति ४ ५ ५

प्रयाणकाले च कथं ज्ञेयोऽसीत्यनेन पृष्टमंतकाले ज्ञानोपायं तत्फलं च दर्शयति अंतकाल इति मामेवोक्तलक्षणमंतर्यामिरूपं परमेश्वरं स्मरन् देहं त्यक्त्वा यः प्रकर्षेण अर्चिरादिमार्गेण याति स मद्रूपतां याति अत्र च संशयो नास्ति स्मरणं ज्ञानोपायः मद्भावप्राप्तिश्च फलमित्यर्थः ५ न केवलं मां स्मरन् मद्भावं प्राप्नोतीति नियमः किं तर्हि यं यमिति यं यं भावं देवतांतरं वा अन्यमपि अंतकाले स्मरन् देहं त्यजति तं तमेव स्मर्यमाणं भावं प्राप्नोति अंतकाले भावविशेषस्मरणे हेतुः सर्वदा तस्य भावोऽनुचिंतनं तेन भावितो वासितचित्तः ६ यस्मात्पूर्ववासनैवान्तकाले स्म

अंतकाले च मामेव स्मरन्मुक्त्वा कलेवरं यः प्रयाति स मद्भावं याति नास्त्यत्र संशयः ५ यं यं वापि स्मरन्भावं त्यजत्यन्ते कलेवरं तं तमेवैति कौंतेय सदा तद्भावभावितः ६ तस्मात्सर्वेषु कालेषु मामनुस्मर युध्य च मय्यर्पितमनोबुद्धिर्मामेवैष्यस्यसंशयः ७ अभ्यासयोगयुक्तेन चेतसा नान्यगामिना परमं पुरुषं दिव्यं याति पार्थानुचिंतयन् ८

ति हेतुः न तु तदा विवशस्य स्मरणोद्यमः संभवति तस्मादिति तस्मात्सर्वदा मामनुस्मर चिंतय सततं स्मरणं च चित्तशुद्धिं विना न भवति अतो युध्यस्व चित्तशुद्ध्यर्थं युद्धादिकं स्वधर्मं चानुतिष्ठेत्यर्थः एवं मय्यर्पितं मनः संकल्पात्मकं बुद्धिश्च व्यवसायात्मिका येन स त्वं मामेव प्राप्स्यसि असंशयः संशयोऽत्र नास्ति ७ सततं स्मरणस्य चाभ्यासोऽन्तरंगसाधनमिति दर्शयन्नाह अभ्यासेति अभ्यासः सजातीयप्रत्ययप्रवाहः स एव योग उपायः तेन युक्तेन एकाग्रेण अत एव नान्यविषयं गंतुं शीलं यस्य तेन चेतसा दिव्यं द्योतनात्मकं परमेश्वरमनुचिंतयन् हे पार्थ तमेव याति ८

पुनश्च चिंतनीयं पुरुषं विशिनष्टि द्वाभ्यां कविमिति कविं सर्वज्ञं पुराणमनादिसिद्धं अनुशासितारं नियंतारं अणोरप्यणीयांसं सूक्ष्मादप्यतिसूक्ष्मं सर्वस्य धातारं पोषकं अपरिमितमहिमत्वादचिंत्यरूपं आदित्यवत् स्वपरप्रकाशात्मको वर्णः स्वरूपं यस्य तं तमसः प्रकृतेः परस्तात् वर्त्तमानं एवंभूतं पुरुषं अंतकाले भक्तियुक्तो निश्चलेन मनसा योऽनुस्मरेत् मनोनैश्चल्ये हेतुः योगबलेन सम्यक् सुषुम्नामार्गेण भ्रुवोर्मध्ये प्राणमावेश्य इति स तं परं पुरुषं द्योतनात्मकं प्राप्नोति ८।९ केवलादभ्याससयोगादपि प्रणवधारणाभ्यासमंतरंगं विशिनष्टि प्रतिजानीते यदक्ष

वा धि

कविं पुराणमनुशासितारमणोरणीयांसमनुस्मरेद्यः सर्वस्य धातारमचिंत्यरूपमादित्यवर्णं तमसः परस्तात् ९ प्रयाणकाले मनसाऽचलेन भक्त्या युक्तो योगबलेन चैव भ्रुवोर्मध्ये प्राणमावेश्य सम्यक् स तं परं पुरुषमुपैति दिव्यं १० यदक्षरं वेदविदो वदन्ति विशंति यद्यतयो वीतरागाः यदिच्छंतो ब्रह्मचर्यं चरंति तत्ते पदं संग्रहेण प्रवक्ष्ये ११ सर्वद्वाराणि संयम्य मनो हृदि निरुध्य च मूर्ध्न्याधायात्मनः प्राणमास्थितो योगधारणाम् १२

रमिति यदक्षरं वेदार्थज्ञा वदंति एतस्य वा अक्षरस्य प्रशासने गार्गि सूर्याचंद्रमसौ विधृतौ तिष्ठत इति श्रुतेः वीतो रागो येभ्यस्ते यतयः प्रयत्नवंतो यद्विशंति यत् ज्ञातुमिच्छंतो गुरुकुले ब्रह्मचर्यं चरंति तत्ते तुभ्यं पद्यते गम्यत इति पदं प्राप्यं संक्षेपेण प्रवक्ष्ये तत्प्राप्त्युपायं कथयिष्यामीत्यर्थः ११ प्रतिज्ञातमुपायं सांगमाह द्वाभ्यां सर्वेति सर्वाणींद्रियद्वाराणि संयम्य प्रत्याहृत्य चक्षुरादिभिर्बाह्यविषयग्रहणमकुर्वन्नित्यर्थः मनश्च हृदि [illegible] निरुध्य बाह्यस्मरणमकुर्वन्नित्यर्थः मूर्ध्नि भ्रुवोर्मध्ये प्राणमाधाय योगस्य धारणां स्थैर्यमास्थित आश्रितवान् १२

भ०गी०टी०

४५

ओमित्येकंयदक्षरं तदेव ब्रह्मवाचकत्वात्प्रतिमादिवत् ब्रह्मप्रतीकत्वाद्वा ब्रह्म तद्व्याहरन् उच्चारयन् तदर्थभूतं च मामनुस्मरन् एवं देहं त्यजन् यः
प्रयाति अर्चिरादिमार्गेण स परमां श्रेष्ठां महर्गतिं प्राप्नोति १३ एवं चांतकाले धारणया मत्प्राप्तिर्नित्याभ्यासवत एव भवति नान्यस्य इति पूर्वो
क्तमेवानुस्मारयति अनन्येति नान्यस्मिन्चेतो यस्य तथाभूतः सन् यो मां सततं निरंतरं नित्यशः प्रतिदिनं स्मरति तस्य नित्ययुक्तस्य
समाहितस्याहं सुखेन लभ्योस्मि नान्यस्य १४ यद्येवं त्वं सुलभोसि ततः किमत आह मामिति उक्तलक्षणा महात्मानो मद्भक्ताः मां प्रा

ओमित्येकाक्षरं ब्रह्म व्याहरन्मामनुस्मरन् यः प्रयाति त्यजन्देहं स याति परमां गतिम् १३

अनन्यचेताः सततं यो मां स्मरति नित्यशः तस्याहं सुलभः पार्थ नित्ययुक्तस्य योगिनः १४

मामुपेत्य पुनर्जन्म दुःखालयमशाश्वतं नाप्नुवंति महात्मानः संसिद्धिं परमां गताः १५

आब्रह्मभुवनान्लोकाः पुनरावर्तिनोऽर्जुन मामुपेत्य तु कौंतेय पुनर्जन्म न विद्यते १६

प्य पुनर्दुःखाश्रयमनित्यं च जन्म न प्राप्नुवंति यतस्ते परमां सम्यक् सिद्धिं मोक्षमेव प्राप्ताः पुनर्जन्मनां दुःखानां चालयं स्थानं ते मामुपेत्य ना
प्नुवंति १५ एतदेव सर्वेष्वपि लोकेषु पुनरावृत्तिं दर्शयन् निर्द्धारयति आब्रह्मेति ब्रह्मणो भवनं वासस्थानं ब्रह्मलोकमभिव्याप्य सर्वे लोकाः
पुनरावर्त्तनशीलाः ब्रह्मलोकस्यापि विनाशित्वात् तत्रस्थानामनुत्पन्नज्ञानानामवश्यंभावि पुनर्जन्म यएवं क्रममुक्तिफलाभिरुपासनाभि
र्ब्रह्मलोकं प्राप्तास्तेषामेव तत्रोत्पन्नज्ञानानां ब्रह्मणा सह मोक्षो नान्येषां मामुपेत्य वर्त्तमानानां तु पुनर्जन्म नास्त्येवेत्यर्थः १६ ७ श्रीकृष्णः

श्रीः

४५

नत्वन्नतपस्विनो दानशीला वीतरागास्तितिक्षवः त्रिलोक्या उपरिस्थानं शुभं ते शोकवर्जितं इत्यादिपुराणवाक्यैस्त्रैलोक्याः सकाशान्महर्लोकादीनामुत्कृष्टत्वं गम्यते विनाशित्वे च सर्वेषामविशिष्टे कथमसौ विशेषः स्यादित्याशंक्य बह्वल्पकालावस्थायित्वनिमित्तो विशेष इत्याशयेन स्वमानेन शतवर्षायुषो ब्रह्मणो अहन्यहनि त्रिलोक्या उत्पत्तिर्निशि निशि च प्रलयो भवतीति दर्शयिष्यन् ब्रह्मणोऽहोरात्रयोः प्रमाणमाह सहस्रेति सहस्रं युगानि पर्यन्तोऽवसानं यस्य तत् ब्रह्मणो यदहस्तत् ये विदुः युगसहस्रं अंतो यस्याः तां रात्रिं च योगबलेन ये विदुः तत्र एव सर्वज्ञा जना अहोरात्रविदः येषां तु केवलं चंद्रार्कगत्यैव ज्ञानं ते तथाऽहोरात्रविदो न भवंति अल्पदर्शित्वात् युगशब्देनात्र चतुर्युगमभिप्रेतं चतुर्युगसहस्रं तु ब्रह्मणो दि-

सहस्रयुगपर्यन्तमहर्यद्ब्रह्मणो विदुः रात्रिं युगसहस्रान्तां तेऽहोरात्रविदो जनाः १७
अव्यक्ताद्व्यक्तयः सर्वाः प्रभवन्त्यहरागमे रात्र्यागमे प्रलीयन्ते तत्रैवाव्यक्तसंज्ञके १८

नमुच्यते इत्यादिपुराणोक्तेः ब्रह्मण इति च महर्लोकादिवासिनामप्युपलक्षणार्थं तत्रायं कालगणनाप्रकारः मनुष्याणां यद्वर्षं तद्देवानामहोरात्रं ताद्दशैरहोरात्रैः पक्षमासादिकल्पनया द्वादशभिर्वर्षसहस्रैश्चतुर्युगं भवति चतुर्युगसहस्रं ब्रह्मणो दिनं तावत्परिमाणैव रात्रिः ताद्दशैश्चाहोरात्रैः पक्षमासादिक्रमेण वर्षशतं ब्रह्मणः परमायुरिति १७ ततः किमत आह अव्यक्तादिति कार्यस्याव्यक्तरूपं कारणात्मकं तस्मादव्यक्तात्कारणरूपात् व्यज्यंत इति व्यक्तयश्चराचराणि भूतानि प्रादुर्भवंति कदा अहरागमे ब्रह्मणो दिनस्योपक्रमे तथा रात्र्यागमे तस्मिन्नेवाव्यक्तसंज्ञके कारणरूपे प्रलयं यांति यद्वा नेऽहोरात्रविद इत्येतन्न विधीयते किंतु प्रतेि सिद्धाहोरात्रविदो जना यद्ब्रह्मणो ह्वर्विदुः तस्मात्स्व आगमे अव्यक्ताद्व्यक्त-

भ०गी०टी०
४८

तत्र कृतनाशाकृताभ्यागमशंकां वारयन्नेव वैराग्यार्थं सृष्टिप्रलयप्रवाहस्याविच्छेदं दर्शयति भूतेति भूतानां चरस्थिरप्राणिनां ग्रामः समूहो यः प्राग
सीत् स एवायं अहरागमे भूत्वा रात्र्यागमे प्रलीयते पुनरप्यहरागमे ऽवशः कर्मादिपरतंत्रः प्रभवति नान्य इत्यर्थः १९ लोकानामनित्यत्वं प्रपंच्य
परमेश्वरस्वरूपस्य नित्यत्वं प्रपंचयति परइति द्वाभ्यां तस्मात्तु चराचरकारणभूतादव्यक्तात्परः तस्यापि कारणभूतो यो ऽन्यस्तद्विलक्षणो ऽव्यक्तश्च
क्षुराद्यगोचरो भावः सनातनो ऽनादिः स तु सर्वेषु कार्यकारणलक्षणेषु भूतेषु नश्यत्स्वपि न विनश्यति २० अविनाशे प्रमाणं दर्शयन्नाह अव्य

भूतग्रामः स एवायं भूत्वा भूत्वा प्रलीयते रात्र्यागमे ऽवशः पार्थ प्रभवत्यहरागमे १९ परस्तस्मात्तु भावो ऽन्यो ऽव्य
क्तो ऽव्यक्तात्सनातनः यः स सर्वेषु भूतेषु नश्यत्सु न विनश्यति २० अव्यक्तो ऽक्षर इत्युक्तस्तमाहुः परमां गतिं यं प्राप्य न
निवर्त्तंते तद्धाम परमं मम २१ पुरुषः स परः पार्थ भक्त्या लभ्यस्त्वनन्यया यस्यान्तःस्थानि भूतानि येन सर्वमिदं ततं २२

क्त इति यो भावः अतींद्रियो ऽक्षरप्रदेशनाशाभ्यां रहित इति तथा ऽक्षरात्संभवतीह विश्वमित्यादिश्रुतिष्वक्षर इत्युक्तः तं परमां गतिं गम्यं पुरुषमाहुः पु
रुषान्न परं किंचित्सा काष्ठा सा परा गतिः इत्यादिश्रुतेः परमगतित्वमेवाह यं प्राप्य पुनर्न निवर्त्तंत इति तच्च ममैव धाम स्वरूपं अतो ऽहमेव परमा
गतिरित्यर्थः २१ तत्प्राप्तौ च भक्तिरंतरंगोपाय इत्युक्तमेवेत्याह पुरुष इति स चाहं परः पुरुषः अनन्यया एकांतभक्त्यैव लभ्यो नान्यथा पर
त्वमेवाह यस्य कारणभूतस्यांतर्मध्ये भूतानि स्थितानि येन च कारणभूतेन सर्वमिदं जगत् व्याप्तम् [तं] २२ श्रीगोपालकृष्णाय नमः ५६

श्रीः
४८

तदेवं परमेश्वरोपासकाः तत्पदं प्राप्य न निवर्त्तन्ते अन्ये त्वावर्त्तन्त इत्युक्तं तत्र च केन मार्गेण गता नावर्त्तन्ते [केन वा गता आवर्त्तन्त] इत्यपेक्षायामाह यत्रेति यत्र यस्मि
न्काले प्रयाता योगिनो अनावृत्तिं यांति यस्मिंश्च काले प्रयाता आवृत्तिं यांति तं कालं वक्ष्यामीत्यन्वयः अत्र च रश्म्यनुसारी अतश्चायनेपि
दक्षिणे इति सूत्रन्यायेनोत्तरायणादिकालविशेषमरणस्याविवक्षितत्वात् कालशब्देन कालाभिमानिनीभिरातिवाहिकाभिर्देवताभिः प्रा
प्यो मार्ग उपलक्ष्यते अतोयमर्थः यस्मिन्कालाभिमानि[नी]देवतोपलक्षिते मार्गे प्रयाता योगिन उपासकाः कर्मिणश्च यथाक्रममनावृत्तिमावृ
त्तिं च यांति तं कालाभिमानि[नी]देवतोपलक्षितमार्गं कथयिष्यामीति अग्निर्ज्योतिषोः कालाभिमानित्वाभावेपि भूयसामहरादिशब्दोक्तानां

यत्र काले त्वनावृत्तिमावृत्तिं चैव योगिनः प्रयाता यांति तं कालं वक्ष्यामि भरतर्षभ २३
अग्निर्ज्योतिरहः शुक्लः षण्मासा उत्तरायणं तत्र प्रयाता गच्छंति ब्रह्म ब्रह्मविदो जनाः २४

कालाभिमानित्वात्तत्साहचर्यादाम्रवणमित्यादिवत् कालशब्देनोपलक्षणमविरुद्धं २३ तत्रानावृत्तिमार्गमाह अग्निरिति अग्निर्
ज्योतिः शब्दाभ्यां तेर्चिषमभिसंभवंतीति श्रुत्युक्तार्चिरभिमानिनी देवतोपलक्ष्यते अहरिति दिवसाभिमानिनी शुक्ल इति शुक्लपक्षाभिमानि
नी उत्तरायणरूपाः षण्मासा इत्युत्तरायणाभिमानिनी एतच्चान्यासामपि श्रुत्युक्तानां संवत्सरदेवलोकादिदेवतानामुपलक्षणार्थं एवंभू
तो यो मार्गस्तत्र प्रयाता गता भगवदुपासका जनाः ब्रह्म प्राप्नुवंति तथा च श्रुतिः तेर्चिषमभिसंभवन्त्यर्चिषोहरह्न आपूर्यमाणपक्षमापूर्यमाणपक्षा

४८ न्षडुदङ्ङेति मासांस्तान् मासेभ्यो देवलोकं देवलोकादादित्यं

आवृत्तिमार्गमाह धूम इति धूमाभिमानिनी देवता रात्र्यादिशब्दैश्च पूर्ववदेव रात्रिकृष्णपक्षदक्षिणायनरूपषण्मासाभिमानिन्यस्तिस्रो देवता लक्ष्यंते एताभिर्देवताभिरुपलक्षितो यो मार्गस्तत्र प्रयातः कर्मयोगी चान्द्रमसं ज्योतिस्तदुपलक्षितं स्वर्गलोकं प्राप्य तत्रेष्टापूर्तकर्मफलं भुक्त्वा पुनरावर्त्तते अत्रापि श्रुतिश्च ते धूममभिसंभवन्तीत्यादिः तदेवं निवृत्तकर्मसहितोपासनया क्रममुक्तिः काम्यकर्मभिः स्वर्गभोगानंतरमावृत्तिः निषिद्धकर्मभिस्तु नरकभोगानंतरमावृत्तिः क्षुद्रकर्मणां तु जंतूनामत्रैव पुनःपुनर्जन्मेति द्रष्टव्यं २५ उक्तौ मार्गावुपसंहरति शुक्लेति शुक्लार्चिरादिगतिः प्रकाशमयत्वात् कृष्णा धूमादिगतिः तमोमयत्वात् एते गती मार्गौ ज्ञानकर्माधिकारिणो जगतः शा

धूमो रात्रिस्तथा कृष्णः षण्मासा दक्षिणायनं तत्र चांद्रमसं ज्योतिर्योगी प्राप्य निवर्त्तते २५ शुक्लकृष्णे गती ह्येते जगतः शाश्वते मते एकया यात्यनावृत्तिमन्ययावर्त्तते पुनः २६ नैते सृती पार्थ जानन्योगी मुह्यति कश्चन तस्मात्सर्वेषु कालेषु योगयुक्तो भवार्जुन २७ वेदेषु यज्ञेषु तपःसु चैव दानेषु यत्पुण्यफलं प्रदिष्टं अत्येति तत्सर्वमिदं विदित्वा योगी परं स्थानमुपैति चाद्यं २८ ॐ इति श्री० अष्टम[illegible]निर्णये स्व[illegible]सिद्धियोगो नामाष्टमोऽध्यायः ८

श्वते अनादी संमते संसारस्याऽनादित्वात् तयोरेकया शुक्लयाऽनावृत्तिं मोक्षं याति अन्यया कृष्णया तु पुनरावर्त्तते २६ मार्गज्ञानफलं दर्शयन् भक्तियोगमुपसंहरति नैते इति एते सृती मार्गौ हे पार्थ मोक्षसंसारप्रापकौ जानन् कश्चिदपि योगी न मुह्यति सुखबुद्ध्या स्वर्गादिफलं न कामयते किंतु परमेश्वरनिष्ठ एव भवतीत्यर्थः स्पष्टमन्यत् २७ २८ श्रीगोपालकृष्णाय नमः श्रीनर्मदायै नमः

अध्यायार्थमष्टप्रश्नार्थनिर्णयस्य फलमुपसंहरति वेदेति वेदेष्वध्ययनादिभिः यज्ञेष्वनुष्ठानादिभिः तपःसु कायशोषणादिभिः दानेषु स
त्पात्रार्पणादिभिः यत्पुण्यफलं चोपदिष्टं शास्त्रेषु तत्सर्वमत्येति ततोप्यधिकं योगैश्वर्यं प्राप्नोति किं कृत्वा इदं प्रश्नार्थनिर्णयेनोक्तं तत्त्वं विदि
त्वा ततश्च योगी ज्ञानी भूत्वा परममुत्कृष्टमाद्यं जगन्मूलभूतं स्थानं विष्णोः परं पदं प्राप्नोति २८ अष्टमेष्टविशिष्टेष्टसंप्रश्नार्थोष्टनिर्णयः अ
क्लिष्टमिष्टधामाप्तिः स्पष्टिताष्टमवर्त्मना ॥ ॥ इतिश्रीभगवद्गीताटीकायां सुबोधिन्यां अष्टमोध्यायः ॥ ८ ॥ परेशः प्राप्यते शुद्धभक्त्येति निश्चिते
ष्टमे नवमे तु तदैश्वर्यमत्याश्चर्यं प्रपञ्च्यते एवं तावत्सप्तमाष्टमयोः स्वीयपरमेश्वरतत्त्वं भक्त्यैव सुलभं नान्यथेत्युक्तं इदानीं स्वकीयमैश्वर्यं भ

श्रीभगवानुवाच इदं तु ते गुह्यतमं प्रवक्ष्याम्यनसूयवे ज्ञानं विज्ञानसहितं यज्ज्ञात्वा मोक्ष्यसेशु
भात् १ राजविद्या राजगुह्यं पवित्रमिदमुत्तमं प्रत्यक्षावगमं धर्म्यं सुसुखं कर्तुमव्ययम् २

क्तेश्चासाधारणप्रभावं प्रपञ्चयिष्यन् श्रीभगवानुवाच इदं त्विति विशेषेण ज्ञायतेनेनेति विज्ञानं उपासनं तत्सहितं ज्ञानमीश्वरविषय
मिदं अनसूयवे पुनः पुनश्च माहात्म्यमेवोपदिशतीत्येवं परमकारुणिके मय्यसूयादोषरहिताय तुभ्यं वक्ष्यामि तुशब्दो वैशिष्ट्ये त
देवाह गुह्यतममित्यादिना गुह्यं देहादिज्ञानं ततो देहादिव्यतिरिक्तमात्मज्ञानं गुह्यतरं ततोपि परमात्मज्ञानमतिरहस्यत्वात् गुह्यतमं यत्
ज्ञात्वा अशुभात्संसारात् सद्य एव मुक्तो भविष्यसि १ किंच राजविद्येति इदं ज्ञानं राजविद्या विद्यानां राजा गुह्यानां च राजा विद्यासु गोप्येषु च
अतिश्रेष्ठमित्यर्थः राजदन्तादित्वादुपसर्जनस्य परत्वं उत्तमं पवित्रमिदं अत्यंतं पावनमिदं प्रत्यक्षावगमं च दृष्टफलं धर्म्यं धर्मादनपेतं सर्वधर्मफल

त्वात् कर्तुं सुसुखं सुखेन कर्तुं शक्यं अव्ययं च अक्षयफलत्वात्

गी०टी०

७८

नत्वेवमस्याति स्वकरत्वे केनाम संसारिणः स्युः तत्राह अश्रद्दधानाः इति अस्य भक्तिसहितज्ञानलक्षणस्य धर्मस्य इति कर्मणि षष्ठी इमं धर्मम् अश्रद्दधाना आस्तिक्येनास्वीकुर्वंतः उपायांतरेण मत्प्राप्तये कृतप्रयत्ना अपि मामप्राप्य मृत्युयुक्ते संसारवर्त्मनि निवर्त्तंते मृत्युव्याप्ते संसारमार्गे परिभ्रमंतीत्यर्थः ३ तदेवं वक्तव्यतया प्रस्तुतस्य ज्ञानस्य स्तुत्या श्रोतारमभिमुखं कृत्वा तदेव ज्ञानं कथयति मयेति द्वाभ्यां अव्यक्ता ऽतींद्रिया मूर्तिः स्वरूपं यस्य तादृशेन मया कारणभूतेन सर्वमिदं जगत् ततं व्याप्तं अत एव कारणभूतं मयि तिष्ठंतीति मत्स्थानि सर्वाणि चराच

अश्रद्दधानाः पुरुषा धर्मस्यास्य परंतप अप्राप्य मां निवर्त्तन्ते मृत्युसंसारवर्त्मनि ३
मया ततमिदं सर्वं जगदव्यक्तमूर्त्तिना मत्स्थानि सर्वभूतानि न चाहं तेष्ववस्थितः ४
न च मत्स्थानि भूतानि पश्य मे योगमैश्वरं भूतभृन्न च भूतस्थो ममात्मा भूतभावनः ५

राणि भूतानि एवमपि घटपटादिषु सर्वकार्येषु मृत्तिकेव तेषु भूतेषु नाहमवस्थितः असंगत्वात् ४ किंच न चेति न च मयि स्थितानि भूतानि असंगत्वादेव मम ननु तर्हि व्यापकत्वमाश्रयत्वं च पूर्वोक्तं विरुद्धमित्याशंक्याह पश्य मे ऐश्वरमसाधारणं योगं युक्तिं अघटितघटनाचातुर्यमिदं पश्य मदीययोगमायावैभवस्याविततर्क्यत्वान्न किंचिद्विरुद्धमित्यर्थः अन्यदप्याश्चर्यं पश्येत्याह भूतानि बिभर्त्ति धारयतीति भूतभृत् भूतानि भावयति पालयतीति भूतभावनः एवंभूतोपि ममात्मा परं स्वरूपं भूतस्थो न भवति अयंभावः यथा जीवो देहं बिभ्रत् पालयंश्चाहंकारेण तत्संश्लिष्टस्तिष्ठति एवं मदं [illegible]

श्रीः

७८

असंश्लिष्टयोरप्याधाराधेयभावं दृष्टान्तेनाह यथेति अवकाशं विनाऽवस्थानानुपपत्तेर्नित्यमाकाशस्थितो वायुः सर्वत्रगतोपि महानपि नाकाशेन संश्लिष्यते निरवयवेन संश्लेषायोगात् तथा सर्वाणि भूतानि मयि स्थितानीति जानीहि ६ तदेवमसंगस्यैव योगमायया स्थितिहेतुत्वमुक्तं तथैव सृष्टिप्रळयावाह सर्वेति कल्पक्षये प्रळयकाले सर्वाणि भूतानि मदीयां प्रकृतिं यांति त्रिगुणात्मिकायां मायायां लीयन्ते पुनः कल्पादौ सृष्टिकाले तानि विशेषेण सृजामि ७ नन्वसंगो निर्विकारश्च त्वं कथं सृजसीत्यपेक्षायामाह प्रकृतिमिति स्वीयां स्वाधीनां

यथाकाशस्थितो नित्यं वायुः सर्वत्रगो महान् तथा सर्वाणि भूतानि मत्स्थानीत्युपधारय ६ सर्वभूतानि कौंतेय प्रकृतिं यांति मामिकां कल्पक्षये पुनस्तानि कल्पादौ विसृजाम्यहं ७ प्रकृतिं स्वामवष्टभ्य विसृजामि पुनः पुनः भूतग्राममिमं कृत्स्नमवशं प्रकृतेर्वशात् ८ न च मां तानि कर्माणि निबध्नंति धनंजय उदासीनवदासीनमसक्तं तेषु कर्मसु ९

प्रकृतिमवष्टभ्याधिष्ठाय प्रळये लीनं सन्तं चतुर्विधमिमं सर्वं भूतग्रामं कर्मादिपरवशं पुनः पुनर्विविधं सृजामि कथं प्रकृतेर्वशात् प्राचीनकर्मनिमित्त तत्तत्स्वभाववशात् ८ नन्वेवं नानाविधानि कर्माणि कुर्वतस्तव जीववद्बंधः कथं न स्यादित्याशंक्याह न चेति कर्माणि मां न निबध्नंति कर्मासक्तिर्हि बंधहेतुः सा चाप्तकामत्वान्मम नास्ति अत उदासीनवद्वर्तमानस्य मे बंधं नापादयंति उदासीनत्वे कर्तृत्वानुपपत्तेः कर्तृत्वे चोदासीनत्वानुपपत्तेः उदासीनवदासीनमित्युक्तं ९

तदेवोपपादयति मयेति मयाधिष्ठात्रा निमित्तभूतेन प्रकृतिः सचराचरं विश्वं सूयते जनयति अनेन मदधिष्ठानेन हेतुनादिदं जगत् विपरिवर्त्त
ते पुनः पुनर्जायते संनिधिमात्रेणाधिष्ठातृत्वात् कर्तृत्वमुदासीनत्वं चाविरुद्धमिति भावः १० नन्वेवंभूतं परमेश्वरं त्वां किमिति केचिन्नाद्रियन्ते
तत्राह द्वाभ्यां अवजानंतीति सर्वभूतमहेश्वरं मदीयं रूपं परं तत्वमजानंतो मूर्खा मामवमन्यंते १० अज्ञाने हेतुः शुद्धसत्वमयीमपि तनुं
भक्तेच्छावशान्मनुष्याकारामाश्रितवंतं ११ किंच मोघाशा इति मत्तोऽन्यद्देवतांतरं क्षिप्रं फलं दास्यतीत्येवंभूता मोघा निष्फलैव आशा ये

मयाध्यक्षेण प्रकृतिः सूयते सचराचरं हेतुनानेन कौंतेय जगद्विपरिवर्त्तते १० अवजानंति मां मूढा मानुषीं
तनुमाश्रितं परं भावमजानंतो मम भूतमहेश्वरं ११ मोघाशा मोघकर्माणो मोघज्ञाना विचेतसः राक्षसीमा
सुरीं चैव प्रकृतिं मोहिनीं श्रिताः महात्मानस्तु मां पार्थ दैवीं प्रकृतिमाश्रिताः भजंत्यनन्यमनसो ज्ञात्वा भूतादिमव्ययं १३

षां ते अत एव मद्विमुखत्वात् मोघानि व्यर्थानि कर्माणि येषां ते मोघमेव नानाकुतर्काश्रितं ज्ञानं येषां ते अत एव विचेतसो विक्षिप्तचित्ताः
सर्वत्र हेतुः राक्षसीं तामसीं हिंसादिप्रचुरां आसुरीं कामदर्पादिविह्वलां मोहिनीं बुद्धिभ्रंशकरीं प्रकृतिं स्वभावमाश्रिताः संतो मामवजानंती
ति पूर्वेणान्वयः १२ के तर्हि त्वामाराधयंतीत्यत आह महात्मान इति महात्मानः कामाद्यनभिभूतचित्ताः यतः अभयं सत्वसंशुद्धिरित्या
दिना वक्ष्यमाणां दैवीं प्रकृतिमाश्रिताः अत एव मद्व्यतिरेकेण नान्यस्मिन् मनो येषां ते भूतादिं जगत्कारणं अव्ययं नित्यं च मां ज्ञात्वा भजंति १३

तेषांभजनप्रकारानाह द्वाभ्यां सततमिति सर्वदा स्तोत्रमंत्रादिभिः कीर्त्तयंतः केचिन्मामुपासते सेवन्ते दृढव्रता नियमा येषां तादृशाः संतः यतंतश्चे
श्वरपूजादिषु प्रयत्नं कुर्वन्तः केचिद्भक्त्या नमस्यंतः प्रणमंतः चान्ये युक्ताः अवहिताः सेवन्ते भक्त्येति नित्ययुक्ता इति च कीर्त्तनादिष्वपि द्रष्टव्यं १४
किंच ज्ञानेति वासुदेवः सर्वमित्येवं सर्वात्मत्वदर्शनं ज्ञानं तदेव यज्ञस्तेन यज्ञेन मां यजंतः पूजयंतोऽन्ये उपासते तत्रापि केचिदेकत्वेन अभेदभावनया
केचित्पृथक्त्वेन दासोहमिति केचित्तु विश्वतोमुखं सर्वात्मकं मां बहुधा ब्रह्मरुद्रादिरूपेण उपासते १५ सर्वात्मतां प्रपंचयति अहमिति चतुर्भिः क्र

सततं कीर्त्तयन्तो मां यतन्तश्च दृढव्रताः नमस्यंतश्च मां भक्त्या नित्ययुक्ता उपासते १४ ज्ञानयज्ञेन चाप्यन्ये य
जन्तो मामुपासते एकत्वेन पृथक्त्वेन बहुधा विश्वतोमुखं १५ अहं क्रतुरहं यज्ञः स्वधाहमहमौषधम् मं
त्रोहमहमेवाज्यमहमग्निरहं हुतं १६ पिताहमस्य जगतो माता धाता पितामहः वेद्यं पवित्रमोंकार ऋक्
साम यजुरेव च १७ गतिर्भर्त्ता प्रभुः साक्षी निवासः शरणं सुहृत् प्रभवः प्रलयः स्थानं निधानं बीजमव्ययं १८

तुः श्रौतोऽग्निष्टोमादिः यज्ञस्तु स्मार्त्तः पंचयज्ञादिः स्वधा पित्र्यर्थं श्राद्धादिः औषधं ओषधिप्रभवमन्नं भेजषं वा मंत्रो याज्यापुरोनुवाक्यादिः आज्यं हो
मादिसाधनं अग्निराहवनीयादिः हुतं होमः एतत्सर्वमहमेव १६ किंच पितेति धाता कर्मफलविधाता वेद्यं ज्ञेयं वस्तु पवित्रं शोधकं ऋग्वेदाद्या वे
दाः अहमेव स्पष्टमन्यत् १७ किंच गतिरिति गम्यत इति गतिः फलं भर्त्ता पोषणकर्त्ता प्रभुः नियंता साक्षी शुभाशुभद्रष्टा निवासः भोगस्थानं श
रणं रक्षकः सुहृत् हितकर्त्ता प्रकर्षेण भवत्यनेनेति प्रभवः स्रष्टा प्रलीयतेऽनेनेति प्रलयः संहर्त्ता तिष्ठत्यस्मिन्निति स्थानमाधारः निधीयतेऽस्मिन्नि
ति निधानं लयस्थानं बीजं कारणं तथाप्यव्ययं अविनाशि न तु व्रीह्यादिबीजवन्नश्वरमित्यर्थः १८

भ०गी०टी०
४६

किंच तपामीति आदित्यात्मना स्थित्वा निदाघसमये तपामि जगत्संतापं करोमि वर्षासमये च वर्षमुत्सृजामि कदाचिच्च वर्षं निगृह्णामि आकर्षामि अमृतं च जीवनं मृत्युश्च नाशः सत् स्थूलं दृश्यं असत् सूक्ष्ममदृश्यं एतत्सर्वमहमेवेति मत्वा मामेव बहुधा उपासते एतेषु पूर्वेणान्वयः १९ तदेवमवजानन्ति मां मूढा इति श्लोकद्वयेन क्षिप्रफलाशया देवतांतरं भजंते मां नाद्रियंत इत्यभक्ता दर्शिताः महात्मानस्तु मां पार्थेत्यादिना च भक्ता उक्ताः तत्रैकत्वेन पृथक्त्वेन वा परमेश्वरं वासुदेवं ये न भजंति तेषां जन्ममृत्युप्रवाहो दुर्वार इत्याह द्वाभ्यां त्रैविद्या मामिति ऋग्यजुःसामलक्षणास्तिस्रः विद्या येषां ते त्रिविद्याः एव त्रैविद्याः स्वार्थे तद्धितः तिस्रो विद्या अधीयंते जानंति इति वा त्रैविद्याः वेदत्रयोक्तक

तपाम्यहमहं वर्षं निगृह्णाम्युत्सृजामि च अमृतं चैव मृत्युश्च सदसच्चाहमर्जुन १९ त्रैविद्या मां सोमपाः पूतपापा यज्ञैरिष्ट्वा स्वर्गतिं प्रार्थयंते ते पुण्यमासाद्य सुरेन्द्रलोकमश्नंति दिव्यान्दिवि देवभोगान् २० ते तं भुक्त्वा स्वर्गलोकं विशालं क्षीणे पुण्ये मर्त्यलोकं विशंति एवं त्रयीधर्ममनुप्रपन्ना गतागतं कामकामा लभंते २१

र्मपराः इत्यर्थः वेदत्रयविहितैर्यज्ञैर्मामिष्ट्वा मामेव रूपं देवतांतरं इत्यजानंतोपि वस्तुतः इंद्रादिरूपेण मामेवेष्ट्वा संपूज्य यज्ञशिष्टं सोमं पिबंतीति सोमपाः तेनैव पूतपापाः शोधितकल्मषाः संतः स्वर्गतिं स्वर्गं प्रति गतिं ये प्रार्थयंते ते पुण्यफलरूपं सुरेंद्रस्य लोकं स्वर्गमासाद्य प्राप्य दिवि स्वर्गे दिव्यानुत्तमान् देवभोगान् अश्नंति भुंजते २० ततश्च ते तं भुक्त्वेति स्वर्गकामास्तैः प्रार्थितं विपुलं स्वर्गलोकं तत्सुखं भुक्त्वा भोगप्रापके पुण्ये क्षीणे सति मर्त्यलोकं विशंति पुनरप्येवं वेदत्रयविहितं धर्ममनुसृताः कामकामाः भोगान् कामयमानाः यातायातं लभन्ते २१ ७ श्रीकृष्णः ७

मद्भक्तास्तु मत्प्रसादेन कृतार्था भवंतीत्याह अनन्या इति अनन्याः नास्ति मद्व्यतिरेकेणान्यत्काम्यं येषां तथाभूता ये जना मां चिंतयंतः सेवन्ते तेषां नित्याभियुक्तानां सदा मदेकनिष्ठानां योगं धनादिलाभं क्षेमं च तत्पालनं मोक्षाख्यं वा तदप्रार्थितमप्यहमेव वहामि प्रापयामि २२ ननु च त्वद्व्यतिरेकेण वस्तुतो देवतांतरस्याभावात् इंद्रादिसेविनोपि त्वद्भक्ता एवेति कथं ते गतागतं लभेरन् तत्राह येपीति श्रद्धयोपेताः भक्ताः संतो ये जना यज्ञेनान्यदेवता इंद्रादिरूपा अनुयजंते तेपि मामेव यजंतीति सत्यं किंतु अविधिपूर्वकं मोक्षप्रापकं विधिं विना यजंतीति अतस्ते पुन

अनन्याश्चिंतयंतो मां ये जनाः पर्युपासते तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहं २२
येप्यन्यदेवताभक्ता यजंते श्रद्धयान्विताः तेपि मामेव कौंतेय यजंत्यविधिपूर्वकम् २३
अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव च न तु मामभिजानंति तत्त्वेनातश्च्यवंति ते २४
यांति देवव्रता देवान् पितॄन् यांति पितृव्रताः भूतानि यांति भूतेज्या यांति मद्याजिनोपि मां २५

रावर्त्तंते २३ एतदेव विवृणोति अहमिति सर्वेषां यज्ञानां तत्तद्देवतारूपेणाहमेव भोक्ता प्रभुश्च स्वामी फलदाता च अहमेवेत्यर्थः एवंभूतं मां तत्त्वेन यथावन्नाभिजानंति अतश्च्यवंति प्रच्यवंते पुनरावर्त्तन्ते ये तु सर्वदेवतासु मामेवान्तर्यामिणं पश्यंतो यजंति ते तु नावर्त्तंते २४ एतदेवोपपादयति यांतीति देवेष्विंद्रादिषु व्रतं नियमो येषां ते अंतवतो देवान् यांति पितृषु व्रतं येषां श्राद्धादिक्रियापराणां ते पितॄन् यांति भूतेषु विनायकमातृकादिषु इज्या पूजा येषां ते भूतानि यांति मां यष्टुं शीलं येषां ते मद्याजिनः ते तु मामक्षयं परमानंदरूपं नारायणं यांतीत्यर्थः २५

भ०गी०टी०
५१

अक्षयफलं त्वउक्ता

तदेवं स्वभक्तानाममलं त्वसुकरं अनायासतश्च स्वभक्तोर्दर्शयति पत्रमिति पत्रपुष्पादिमात्रमपि मह्यं भक्त्या प्रीत्या यः प्रयच्छति तस्य प्रयतात्मनः
शुद्धचित्तस्य निष्कामभक्तस्य तत्पत्रपुष्पादिकं तेन भक्त्योपहृतं समर्पितं अहमश्नामि प्रीत्या गृह्णामि न हि महाविभूतिपतेः परमेश्वरस्य मम क्षुद्रदेव
तानामिव बहुवित्तसाध्ययागादिभिः परितोषः स्यात् किंतु भक्तिमात्रेण अतो भक्तेन समर्पितं यत्किंचित्पत्रादिमात्रमपि तदनुग्रहार्थमेवाश्ना
मीति भावः २६ न च पुष्पादिकमपि पत्यार्थं प्रभुसेवादिद्रव्यं न दर्शने वोचमे रपायसमर्पणीयं किं तर्हि यदिति स्वभावतो वा शास्त्रतो वा यत्किं
चित्कर्म करोषि तथा यदश्नासि यद्ददासि यत्तपस्यसि तपः करोषि तत्सर्वं मय्यर्पितं यथा भवति एवं कुरुष्व २७ एवं च यत्फलं प्राप्स्यसि तच्छृ

पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति तदहं भक्त्युपहृतमश्नामि प्रयतात्मनः २६ यत्करोषि यदश्नासि यज्जुहो
षि ददासि यत् यत्तपस्यसि कौंतेय तत्कुरुष्व मदर्पणम् २७ शुभाशुभफलैरेवं मोक्ष्यसे कर्मबंधनैः संन्यासयोग
युक्तात्मा विमुक्तो मामुपैष्यसि २८ समोऽहं सर्वभूतेषु न मे द्वेष्योऽस्ति न प्रियः ये भजंति तु मां भक्त्या मयि ते तेषु चाप्यहं २९

णु शुभेति एवं कुर्वन् कर्मबंधनैः कर्मनिमित्तैरिष्टानिष्टैः फलैर्मुक्तो भविष्यसि कर्मणामपि समर्पितत्वेन न तत्फलसंबंधानुपपत्तेः तैश्च मुक्तः सन् सं
न्यासयोगयुक्तात्मा संन्यासः कर्मणां मदर्पणं स एव योगस्तेन युक्त आत्मा चित्तं यस्य तथाभूतस्त्वं मां प्राप्स्यसि २८ यदि भक्तेभ्य एव मोक्षं ददासि ना
भक्तेभ्यस्तर्हि तथापि किं रागद्वेषादिकृतं वैषम्यमस्ति नेत्याह समइति सर्वेष्वपि भूतेषु समोऽहं अतो मम प्रियश्च द्वेष्यश्च नास्त्येव एवं सत्यपि ये मां
भजंति ते भक्त्या मयि वर्तंते अहमपि तेषु अनुग्राहकतया वर्ते इत्ययं भावः यथाग्नेः स्वसेवकेष्वेव तमः शीतादि दुःखमपाकुर्वतोपि न वैषम्यं यथा वा क
ल्पवृक्षस्य न भेव भक्तपक्षपातिनो मम नास्त्येव वैषम्यं किंतु मद्भक्तेरेवायं महिमा इति २९

श्रीः
५२

अपि च मद्भक्तेरेवितर्क्यः प्रभाव इत्याह अपिचेति अत्यंतं दुराचारोपि नरः यदि पृथक्त्वेन देवांतरभक्तिमकुर्वन्मामेव परमेश्वरं भजते तर्हि साधुः श्रेष्ठ एव स मंतव्यः यतोसौ सम्यग्व्यवसितः शोभनमध्यवसायं कृतवान् ३० ननु कथं समीचीनाध्यवसायमात्रेण साधुर्मन्तव्यस्तत्राह क्षिप्रमिति दुराचारोपि मां भजन् शीघ्रं धर्मचित्तो भवति ततश्च शश्वत् शांतिं परमेश्वरनिष्ठां नितरां गच्छति प्राप्नोति कुतर्ककर्कशवादिनो नैतन्मन्येरन्निति शंकाव्याकुलमर्जुनं प्रोत्साहयति हे कौंतेय पटहकोलाहलादिमहाघोषपूर्वकं विवदमानानां सभां गत्वा बाहुमुत्क्षिप्य निःशंकं प्रतिजानीहि प्रतिज्ञां कुरु कथं मे परमेश्वरस्य भक्तो दुराचारोपि न प्रणश्यति अपितु कृतार्थ एव भवतीति ततश्च ते त्वत्प्रौढिविजृंभितविध्वंसितकुतर्काः निःसंशयं त्वामेव गुरु

अपि चेत्सुदुराचारो भजते मामनन्यभाक् साधुरेव स मन्तव्यः सम्यग्व्यवसितो हि सः ३० क्षिप्रं भवति धर्मात्मा शाश्वच्छांतिं निगच्छति कौंतेय प्रतिजानीहि न मे भक्तः प्रणश्यति ३१ मां हि पार्थ व्यपाश्रित्य येपि स्युः पापयोनयः स्त्रियो वैश्यास्तथा शूद्रास्तेपि यांति परां गतिं ३२ किं पुनर्ब्राह्मणाः पुण्या भक्ता राजर्षयस्तथा अनित्यमसुखं लोकमिमं प्राप्य भजस्व मां

त्वेनाश्रयेरन् ३१ आचारभ्रष्टानपि भक्तिः पवित्रीकरोतीति किमत्र चित्रं अतो मद्भक्तिर्दुष्कुलानपि अनाधिकारिणोपि संसारान्मोचयतीत्याह मामिति येपि पापयोनयः स्युः निकृष्टजन्मानोऽन्त्यजादयो भवेयुः येपि वैश्याः केवलं कृष्यादिनिरताः स्त्रियः शूद्रादयश्चाध्ययनादिरहिताः तेपि मां व्यपाश्रित्य संसेव्य परां गतिं यांति हि निश्चितं ३२ यदेवं तदा सत्कुलाः सदाचाराश्च मद्भक्ताः परां गतिं यांतीति किं वक्तव्यमित्याह किमिति पुण्याः सुकृतिनो ब्राह्मणाः तथा राजानश्च ये ऋषयश्च क्षत्रियाः एवंभूताः परां गतिं यांतीति किमु वक्तव्यं अतस्त्वमिमं राजर्षिरूपं लोकं देहं प्राप्य लब्ध्वा मां भजस्व किंच अनित्यमध्रुवं सुखरहितं च लोकं देहं प्राप्य अनित्यत्वाद्विलंबमकुर्वन् असुखत्वाच्च सुखार्थं सर्वधर्मान्हित्वा मामेव भजेः सुखार्थोद्यमं हित्वा

भ०गी०टी०

५२

भजनप्रकारं दर्शयन्नुपसंहरति मन्मनाइति मय्येवमनो यस्य स त्वं मन्मनास्त्वं भव तथा ममैव भक्तः सेवको भव मद्याजी मत्पूजनशीलो भव मामेव च
नमस्कुरु एवमेभिः प्रकारैर्मत्परायणः सन् आत्मानं मनो मयि युक्त्वा समाधाय मामेव परमानंदरूपमेष्यसि प्राप्स्यसि निजमैश्वर्यमाश्चर्यं भक्तेश्चाद्भुत
वैभवं नवमे राजगुह्याध्ये रूपयावोचदच्युतः ३४ ॥ इति श्रीभगवद्गीताटीकायां क्रबोधिन्यां नवमोध्यायः ९ ॥ उक्ताः संक्षेपतः पूर्वं सप्तमादौ
विभूतयः दशमे ता विस्तर्यंते सर्वत्रेश्वरदृष्टये एवं तावत्सप्तमादिभिस्त्रिभिरध्यायैर्भजनीयं परमेश्वरस्वरूपं निरूपितं तद्विभूतयश्च सप्तमे रसोहम
प्सु कौंतेयेत्यादिना संक्षेपतो दर्शिताः नवमे चाहं क्रतुरहं यज्ञ इत्यादिना अथेदानीं ता एव विभूतीः प्रपंचयिष्यन् स्वभक्तेश्चावश्यकरणीयत्वं वर्णयि

मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु मामेवैष्यसि युक्त्वैवमात्मानं मत्परायणः ३४ ॥ इति श्रीमद्भग०
राजगुह्ययोगो नाम नवमोध्यायः ९ ॥ श्रीभगवानुवाच भूय एव महाबाहो शृणु मे परमं वचः यत्तेहं प्रीयमा
णाय वक्ष्यामि हितकाम्यया १ न मे विदुः सुरगणाः प्रभवं न महर्षयः अहमादिर्हि देवानां महर्षीणां च सर्वशः २

ष्यन् श्रीभगवानुवाच भूय एवेति महाबाहो युद्धादिस्वधर्मानुष्ठाने महत्सामर्थ्यं यस्य कुरुत्वो बाहू यस्य हे महाबाहो पुनरपि मे वचः शृणु कथंभूतं प
रमं परमार्थनिष्ठं मद्वचसा अमृतेनेव प्रीतिं प्राप्नुवते तुभ्यं हितकाम्यया हितेच्छया यदहं वक्ष्यामि तत् १ उक्तस्य पुनः कथने दुर्विज्ञेयत्वे हेतुमाह नमइ
ति मम प्रकृष्टं भवं जन्मरहितस्यापि नानाविभूतिभिराविर्भावं सुरगणा अपि महर्षयोपि भृग्वादयः न जानंति तत्र हेतुः अहं हि देवानां महर्षीणां
चादिकारणं सर्वशः सर्वैः प्रकारैः उत्पादकत्वेन बुद्ध्यादिप्रवर्तकत्वेन च अतो मदनुग्रहं विना मां केपि न जानंतीत्यर्थः २ श्रीनर्मदादेव्यै नमः ५६

श्रीः

५२

एवंभूतात्मज्ञाने फलमाह योमामिति सर्वकारणत्वेन न विद्यते आदिः कारणं यस्य तं अनादिं अत एवाजं जन्मशून्यं लोकानां च महेश्वरं मां यो वेत्ति स मनुष्येषु असंमूढः संमोहरहितः सन् सर्वपापैः प्रमुच्यते ३ लोकमहेश्वरतामेव प्रपंचयति बुद्धिरिति त्रिभिः बुद्धिः सारासारविवेकनैपुण्यं ज्ञानमात्मविषयं असंमोहो व्याकुलत्वाभावश्च क्षमा सहिष्णुत्वं सत्यं यथार्थभाषणं दमो बाह्येंद्रियसंयमः शमोऽन्तःकरणसंयमः सुखमनुकूलसंवेदनीयं दुःखं तद्विपरीतं भव उद्भवः अभावस्तद्विपरीतः भयं त्रासः अभयं तद्विपरीतं अस्य श्लोकस्योत्तरेण मत्त एव भवंतीत्यन्वयः ४ किं च अहिंसेति ॥

यो मामजमनादिं च वेत्ति लोकमहेश्वरं असंमूढः स मर्त्येषु सर्वपापैः प्रमुच्यते ३
बुद्धिर्ज्ञानमसंमोहः क्षमा सत्यं दमः शमः सुखं दुःखं भवोऽभावो भयं चाभयमेव च ४
अहिंसा समता तुष्टिस्तपो दानं यशोऽयशः भवंति भावा भूतानां मत्त एव पृथग्विधाः ५
महर्षयः सप्त पूर्वे चत्वारो मनवस्तथा मद्भावा मानसा जाता येषां लोक इमाः प्रजाः ६

अहिंसा परपीडानिवृत्तिः समता रागद्वेषादिराहित्यं तुष्टिः यदेव लब्धं तेन संतोषः तपः शारीरादि वक्ष्यमाणं दानं न्यायार्जितस्य धनादेः पात्रेऽर्पणं यशः सत्कीर्त्तिः अयशो दुष्कीर्त्तिः एते बुद्धिर्ज्ञानमित्यादयः तद्विपरीताश्चाबुद्ध्यादयो नानाविधास्ताः प्राणिनां मत्तः सकाशादेव भवंति ५ किं च महर्षय इति सप्त महर्षयो भृग्वादयः सप्त ब्रह्मणाद्युत्स्ये ते पुराणे निश्चयं गता भृग्वादिपुराणप्रसिद्धाः तेभ्योऽपि पूर्वे चत्वारो महर्षयः सनकादयः तथा मनवः स्वायंभुवादयः मदीयो भावः प्रभावो येषु ते हिरण्यगर्भादयः ममैव मनसः संकल्पमात्राज्जाताः प्रभावमेवाह येषामिति येषां भृग्वादीनां सनकादीनां च मनूनां च इमा ब्राह्मणाद्या लोके वर्तमाना यथायथं पुत्रपौत्रादिरूपाः शिष्यप्रशिष्यरूपाश्च प्रजा जाता वर्त्तन्ते ६

यथोक्तविभूत्यादितत्त्वज्ञानस्य फलमाह एतामिति एतां भृग्वादिलक्षणां मम विभूतिं योगं चैश्वर्यलक्षणं तत्त्वतो यो वेत्ति स निःसंशयेन योगेन सम्यग्दर्शनेन युक्तो भवति नास्त्यत्र संशयः ७ तथाविभूतियोगयोर्ज्ञानं विना सम्यक्ज्ञानानावाप्तिस्तामाह इति अहमिति चतुर्भिः अहं सर्वस्य जगतः प्रभवः भृग्वादिमन्वादिरूपविभूतिद्वारेणोत्पत्तिहेतुः मत्तः एवास्य बुद्धिर्ज्ञानमसंमोह इत्यादि सर्वं प्रवर्त्तत इति एवं मत्वा बुध्य बुधा विवेकिनो भावसमन्विताः प्रीतियुक्ता भजन्ते ८ प्रीतिपूर्वकं भजनमेवाह मच्चित्ता इति मय्येव चित्तं येषां ते मच्चित्ताः मामेव गताः प्राप्ताः प्रा

एतां विभूतिं योगं च मम यो वेत्ति तत्त्वतः सोऽविकंपेन योगेन युज्यते नात्र संशयः ७ अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्त्तते इति मत्वा भजंते मां बुधा भावसमन्विताः ८ मच्चित्ता मद्गतप्राणा बोधयंतः परस्परं कथयंतश्च मां नित्यं तुष्यंति च रमंति च ९ तेषां सततयुक्तानां भजतां प्रीतिपूर्वकं ददामि बुद्धियोगं तं येन मामुपयांति ते १० तेषामेवानुकंपार्थमहमज्ञानजं तमः नाशयाम्यात्मभावस्थो ज्ञानदीपेन भास्वता ११

णा इंद्रियाणि येषां ते मद्गतप्राणाः मदर्पितजीवना इति वा एवंभूताः सन्तो बुधाः अन्योन्यं मां न्यायोपेतैः श्रुत्यादिप्रमाणैः बोधयंतः बुध्या च मां कथयंतः संकीर्त्तयंतः तुष्यंति अनुमोदनेन तुष्टिं यांति ९ एवंभूतानां च सम्यक्ज्ञानमहं ददामीत्याह तेषामिति एवं सततयुक्तानां मय्यासक्तानां प्रीतिपूर्वकं भजतां तेषां तं बुद्धिरूपं योगं उपायं ददामि तमिति कं येन ते भक्ता मां प्राप्नुवंति १० बुद्धियोगं दत्वा च तस्यानुभवपर्यंतः तामापत्याविद्याकृतं संसारं नाशयामीत्याह तेषामिति तेषामनुकंपार्थमेवाज्ञानाज्जातं तमः संसारदुःखं नाशयामि कुत्र स्थितः सन् केन वा साधनेन तमो नाशयसीत्यत आह आत्मभाव

संक्षेपेणोक्तां विभूतिं विस्तरेण जिज्ञासुर्भगवंतं स्तुवन्नर्जुन उवाच परं ब्रह्मेति सप्तभिः परं ब्रह्म च परं धाम च आश्रयः परमं पवित्रं भवानेव कुत इत्यत आह
यतः शाश्वतं नित्यं पुरुषं तथा दिव्यं द्योतनात्मकं स्वप्रकाशं च आदिश्चासौ देवश्च तं देवानामादिभूतमित्यर्थः तथा अजं अजन्मानं विभुं च व्यापकं १२
आहुरिति त्वामेवाहुः के ऋषयः भृग्वादयः सर्वे देवर्षिश्च नारदः असितश्च देवलश्च व्यासश्च स्वयं त्वमेव च साक्षान्मह्यं ब्रवीषि १३ अतो ममेदानीं
त्वदैश्वर्ये असंभावना निवृत्तेत्याह सर्वमिति एतत्तु भवानेव परं ब्रह्म इत्यादि सर्वमपि ऋतं सत्यं मन्ये यन्मां प्रति त्वं कथयसि न मे विदुः सुरगणा इत्यादि

अर्जुन उवाच परं ब्रह्म परं धाम पवित्रं परमं भवान् पुरुषं शाश्वतं दिव्यमादिदेवमजं विभुं १२ आहुस्त्वामृषयः स
र्वे देवर्षिर्नारदस्तथा असितो देवलो व्यासः स्वयं चैव ब्रवीषि मे १३ सर्वमेतदृतं मन्ये यन्मां वदसि केशव नहि ते
भगवन्व्यक्तिं विदुर्देवा न दानवाः १४ स्वयमेवात्मनात्मानं वेत्थ त्वं पुरुषोत्तम भूतभावन भूतेश देवदेव जग
त्पते १५ वक्तुमर्हस्यशेषेण दिव्या ह्यात्मविभूतयः याभिर्विभूतिभिर्लोकानिमांस्त्वं व्याप्य तिष्ठसि १६

तदपि सत्यमेव मन्य इत्याह न हीति हे भगवन् ते व्यक्तिं देवा न विदुः अस्मदनुग्रहार्थमियमभिव्यक्तिरिति न जानंति दानवाश्चास्मन्निग्रहार्थमिति
न विदुरेव १४ किं तर्हि स्वयमिति स्वयमेव त्वं मेवात्मानं वेत्थ जानासि नान्यः तदप्यात्मना स्वेनैवानन्यसाधनांतरेण अत्यादरेण बहुधा संबोधयति
हे पुरुषोत्तम पुरुषोत्तमत्वे हेतुगर्भाणि संबोधनानि हे भूतभावन भूतोत्पादक भूतानामीश नियंतः देवानामादित्यादीनां देव प्रकाशक जगत्प
ते विश्वपालक १५ यस्मात्तवाभिव्यक्तिं त्वमेव वेत्सि न देवादयः तस्मात्त्वं वक्तुमर्हसीति या आत्मनः तव दिव्या अत्यद्भुता विभूतयः ताः सर्वा वक्तुं

कथनप्रयोजनं दर्शयन् प्रार्थते कथमिति द्वाभ्यां हे योगिन् कथं केन विभूतिभेदेः सदा परिचिंतयन् अहं त्वां विद्यां जानीयां विभूतिभेदेन चिंत्योसि त्वं के
षु केषु पदार्थेषु मया चिंतनीयोसि १७ न देवं बहिर्मुखैः परिचिंत्ये न तत्र तत्र विभूतिभेदेन त्वच्चिंतने च यथाभवेत्तथा विस्तरेण कथयेत्याह विस्तरेणेति आत्म
नस्तव योगं सर्वज्ञत्वसर्वशक्तित्वादिलक्षणं विभूतिमैश्वर्यं च विस्तरेण पुनः कथय हि यतः त्वद्वाक्यामृतं शृण्वतो मम तृप्तिरलंबुद्धिर्नास्ति १८ एवं

कथं विद्यामहं योगिंस्त्वां सदा परिचिंतयन् केषु केषु च भावेषु चिंत्योसि भगवन्मया १७ विस्तरेणात्मनो योगं विभूतिं च ज
नार्दन भूयः कथय तृप्तिर्हि शृण्वतो नास्ति मेऽमृतं १८ श्रीभगवानुवाच हंत ते कथयिष्यामि दिव्या ह्यात्मविभूतयः प्राधा
न्यतः कुरुश्रेष्ठ नास्त्यंतो विस्तरस्य मे १९ अहमात्मा गुडाकेश सर्वभूताशयस्थितः अहमादिश्च मध्यं च भूतानामंत एव च २०

प्रार्थितः श्रीभगवानुवाच हंतेति हंतेत्यनुकंपासंबोधने दिव्या मम या विभूतयस्ताः प्राधान्येन तुभ्यं कथयिष्यामि यतोऽवांतरविभूतिविस्तरस्य मदी
यस्यांऽतो नास्ति अतः प्रधानभूताः कतिचिद्वर्णयिष्यामि १९ तत्र प्रथमं मुख्यं रूपं कथयति अहमिति हे गुडाकेश सर्वेषां भूतानां आशयेषु अंतःकरणे
षु सर्वज्ञत्वादिगुणैर्नियंतृत्वेनावस्थितः परमात्माहं आदिर्जन्म मध्यं स्थितिः अंतः संहारः सर्वभूतानां जन्मादिहेतुश्चाहमित्यर्थः २० ॥ ॥

इदानीं विभूतीः कथयति आदित्यानामित्यादिनाध्यायसमाप्तिः आदित्यानां द्वादशानां मध्ये विष्णुर्वामनोहं ज्योतिषां प्रकाशकानां मध्ये अंशुमा
न् विश्वव्यापिरश्मियुक्तो रविः सूर्योऽहं मरुतां नाम्नां मध्ये मरीचिर्नामाहमस्मि यद्यपि मरुद्रूपादेव विशेषास्तेषां मध्ये नक्षत्राणां मध्ये चंद्रोहं अ
त्रादित्यानामहं विष्णुरित्यादिषु प्रायशो निर्धारणे षष्ठी क्वचित् भूतानामस्मि चेतनेत्यादिषु संबंधे षष्ठी तच्च तत्र तत्रैव दर्शयिष्यामि विष्णुरित्या
दिष्ववतारेष्वपि प्रभावातिशयमात्रविवक्षया विभूतित्वेन निर्दिश्यते अतः पंचाध्यायस्पष्टार्थत्वेपि कुत्र क्वचिदाख्यास्यामः २१ वेदानामिति

म
आदित्यानामहं विष्णुर्ज्योतिषां रविरंशुमान् मरीचिर्मरुतामस्मि नक्षत्राणामहं शशी २१ वेदानां सामवेदोऽस्मि
देवानामस्मि वासवः इंद्रियाणां मनश्चास्मि भूतानामस्मि चेतना २२ रुद्राणां शंकरश्चास्मि वित्तेशो यक्षरक्षसां
वसूनां पावकश्चास्मि मेरुः शिखरिणामहं २३ पुरोधसां च मुख्यं मां विद्धि पार्थ बृहस्पतिं सेनानीनामहं स्कंदः सरसा
मस्मि सागरः २४ महर्षीणां भृगुरहं गिरामस्म्येकमक्षरं यज्ञानां जपयज्ञोऽस्मि स्थावराणां हिमालयः २५

वासवः इंद्रः भूतानां संबंधिनी चेतना ज्ञानशक्तिरहमस्मि २२ रुद्राणामिति राक्षसानामपि क्रूरत्वादिसाम्याद्यक्षैः सहैकीकृत्य निर्देशः तेषां
मध्ये वित्तेशः कुबेरोऽस्मि पावकोऽग्निः शिखरिणां शिखरवतां उच्छ्रितानां मेरुः २३ पुरोधसां मध्ये देवपुरोहितत्वान्मुख्यं बृहस्पतिं मां विद्धि से
नानीनां मध्ये देवसेनापतिः स्कंदोहमस्मि सरसां स्थिरजलाशयानां मध्ये समुद्रोऽस्मि २४ महर्षीणामिति गिरां वाचां पदात्मिकानां मध्ये एकम
क्षरमोंकाराख्यं पदमस्मि २५ ५ श्रीगोपालकृष्णाय नमः रामनारायणानंतमुकुंदमधुसूदन कृष्णकेशवकंसारे हरे वैकुंठवामन ५ ५

भ०गी०टी०

५५

अश्वत्थइति देवाएवसंतेदेवर्षयः नैनत्रऋषित्वंप्राप्तास्तेषांमध्येनारदोस्मिसिद्धानामुत्पत्तितएवाधिगतपरमार्थानांकपिलाख्योमुनिरस्मि २६ उच्चैःश्रवसमिति अमृतार्थंक्षीराब्धिमंथनेउद्भूतमुच्चैःश्रवसमश्वंमाविद्धि अमृतोद्भवमित्यैतदैरावतेऽपिसंबध्यते नराधीपंराजानंमांविद्धि २७ आयुधानामिति कामान्दोग्धीतिकामधुक् प्रजनः प्रजोत्पत्तिहेतुःकंदर्पः नकेवलसंभोगप्रधानःकामोमद्विभूतिः अप्राशस्त्यत्वात् सर्पा

अश्वत्थः सर्ववृक्षाणांदेवर्षीणांचनारदः गंधर्वाणांचित्ररथः सिद्धानांकपिलोमुनिः २६ उच्चैःश्रवसमश्वानांविद्धिमाममृतोद्भवं ऐरावतंगजेंद्राणांनराणांचनराधिपं २७ आयुधानामहंवज्रंधेनूनामस्मिकामधुक् प्रजनश्चास्मिकंदर्पः सर्पाणामस्मिवासुकिः २८ अनंतश्चास्मिनागानांवरुणोयादसामहं पितृणामर्यमाचास्मियमःसंयमतामहं २९ प्रल्हादश्चास्मिदैत्यानांकालःकलयतामहं मृगाणांचमृगेंद्रोहंवैनतेयश्चपक्षिणां ३० पवनःपवतामस्मिरामःशस्त्रभृतामहं झषाणांमकरश्चास्मिस्रोतसामस्मिजाह्नवी

णांसविषाणांराजावासुकिरस्मि २८ अनंतइति नागानांनिर्विषाणांराजाअनंतःशेषोस्मि यादसांजलचराणांराजावरुणोस्मि पितृणांराजाअर्यमास्मि संयमतांनियमंकुर्वतांमध्येयमोऽस्मि २९ प्रल्हादइति कलयतांवशीकुर्वतांगणयतांवाकालोहं मृगेंद्रःसिंहः ३० पवनइति पवतांपावयितॄणांवेगवतांवावायुःअस्मि रामोदाशरथिः झषाणांमत्स्यानांमध्येमकरोमत्स्यविशेषोहं स्रोतसांप्रवाहोदकानांमध्ये

श्रीः

५५

सर्गाणामिति सृज्यन्त इति सर्गा आकाशादयः तेषामादिरन्तश्च मध्यं चैवाहं अहमादिश्च मध्यं च तुल्यन्त स्रष्ट्रादिकर्तृत्वं पारमैश्वर्ययुक्तं अत्र उत्पत्ती निर्विशेषः अध्यात्मविद्या आत्मविद्या प्रवदतां वादिनां संबंधिन्यो वादजल्पवितंडाख्यास्तिस्रः कथाः प्रसिद्धाः तासां मध्ये वादोऽहं यत्र द्वाभ्यामपि प्रमाणतस्तर्कतश्च स्वपक्षः स्थाप्यते परपक्षस्तु छलजातिनिग्रहस्थानैर्दूष्यते स जल्पो नाम यत्र त्वेकः स्वपक्षं स्थापयति अन्यस्तु छलजातिनिग्रहस्थानैस्तत्पक्षं दूषयति न तु स्वपक्षं साधयति सा वितंडा नाम कथा तत्र जल्पवितंडे विजिगीषमाणयोर्वादिनोः शक्तिपरीक्षामात्रफले वादस्तु वीतरागयोः शिष्याचार्ययोस्तत्त्वनिर्णयफलं अतोऽसौ मद्विभूतिः श्रेष्ठत्वात् ३२ अक्षराणां वर्णानां मध्ये अकारोऽस्मि तस्य सर्ववाङ्मयत्वेन श्रेष्ठत्वात् तथाच

वश्यभ

सर्गाणामादिरंतश्च मध्यं चैवाहमर्जुन अध्यात्मविद्या विद्यानां वादः प्रवदतामहं ३२ अक्षराणामकारोऽस्मि द्वंद्वः सामासिकस्य च अहमेवाक्षयः कालो धाताहं विश्वतोमुखः ३३ मृत्युः सर्वहरश्चाहमुद्भवश्च भविष्यतां कीर्तिः श्रीर्वाक्च नारीणां स्मृतिर्मेधा धृतिः

श्रुतिः अकारो वै सर्वा वाक् सैषा स्पर्शोष्मभिर्व्यज्यमाना बह्वी नानारूपा भवतीति सामासिकस्य समाससमूहस्य मध्ये द्वंद्वः रामकृष्णावित्यादिः समासोऽस्मि उभयपदप्रधानत्वेन श्रेष्ठत्वात् अक्षयः प्रवाहरूपः कालोऽहमेव कालः कलयतामित्यत्राउगणनात्मकः संवत्सरशतायुष्यरूपः काल उक्तः स च तस्मिन्नायुषि क्षीणे सति क्षीयते अयमक्षयः प्रवाहात्मकश्च काल उच्यत इति विशेषः कर्मफलविधातॄणां मध्ये विश्वतोमुखो धाता सर्वकर्मफलविधाताहमित्यर्थः ३३ मृत्युरिति संहारकाणां मध्ये सर्वसंहर्ता मृत्युरहं भविष्यतां भाविकल्याणानां प्राणिनामुद्भवः अभ्युदयोऽहं नारीणां मध्ये कीर्त्याद्याः सप्त देवतारूपाः स्त्रियोऽहं यासामाभासमात्रयोगेन प्राणिनः श्लाघ्या भवंति ताः कीर्त्याद्याः

गी०टी०

५६

बृहत्सामेति त्वार्गसंहिहुह्वा मद्रत्यस्यां मध्ये गीयमानं बृहत्साम तेनचेंद्रः सर्वेश्वरः त्वेन स्तूयत इति श्रेष्ठं छंदोविशिष्टानां मंत्राणां मध्ये गायत्री मं
त्रोहं द्विजत्वापादकत्वेन सोमाहरणेनच श्रेष्ठत्वात् कुसुमाकरो वसंतः ३५ द्यूतमिति छलयतामन्योन्यं वंचनपराणां संबंधि द्यूतमस्मि तेज
स्विनां प्रभाववतां तेजः प्रभावोऽस्मि जेतॄणां जयोस्मि व्यवसायिनां उद्यमवतां व्यवसायोस्मि सत्ववतां सात्विकानां सत्वमहं ३६ वृष्णीनामिति
वासुदेवो यो हं त्वामुपदिशामि धनंजयस्त्वमेव मद्विभूतिः मुनीनां वेदार्थमननशीलानां वेदव्यासोहमस्मि कवीनां क्रांतदर्शिनां मध्ये उशनानाम

बृहत्साम तथा साम्नां गायत्री छंदसामहं मासानां मार्गशीर्षोहमृतूनां कुसुमाकरः ३५ द्यूतं छलयतामस्मि
तेजस्तेजस्विनामहं जयोस्मि व्यवसायोस्मि सत्वं सत्ववतामहं ३६ वृष्णीनां वासुदेवोस्मि पांडवानां धनंज
यः मुनीनामप्यहं व्यासः कवीनामुशना कविः ३७ दंडो दमयतामस्मि नीतिरस्मि जिगीषतां मौनं चैवास्मि गु
ह्यानां ज्ञानं ज्ञानवतामहं ३८ यच्चापि सर्वभूतानां बीजं तदहमर्जुन न तदस्ति विना यत्स्यान्मया भूतं चराचरं ३९
नांतोस्ति मम दिव्यानां विभूतीनां परंतप एष तूद्देशतः प्रोक्तो विभूतेर्विस्तरो मया ४० ६ श्रीकृष्णायनमः

कविः ३७ दंड इति दमयतां दमकर्तॄणां संबंधी दंडोस्मि येनासंयता अपि संयता भवंति स दंडो मद्विभूतिः जेतुमिच्छतां संबंधिनी सामाद्युपायरू
पा नीतिरस्मि गुह्यानां गोप्यानां गोपनहेतुर्मौनं अवचनमहमस्मि नहि तूष्णींस्थितस्याभिप्रायो ज्ञायते ज्ञानवतां तत्वज्ञानिनां यत् ज्ञानं तदहमस्मि ३८
यदिति यदपि च सर्वभूतानां बीजं प्ररोहकारणं तत्रहेतुः मया विना यत्स्यात् भवेत् तच्चरमचरं वा भूतं नास्त्येव ३९ प्रकरणार्थमुपसंहरति नांत
इति अनंतत्वाद्विभूतीनां तोः साकल्येन वक्तुं न शक्यते एषतु विभूतेर्विस्तर उद्देशतः संक्षेपतः प्रोक्तः ४० ६ ७ श्रीनर्मदादेव्यैनमः ६ ६

श्रीः

५६

उनन्यस्य साकांक्षं प्रति कथं विस्तारकस्येन कथयति यद्यदिति विभूतिमत् ऐश्वर्ययुक्तं ऊर्जितं केनचित्प्रभावबलादिना गुणेनातिशयितं यद्यत्सत्त्वं वस्तु मा-
त्रं तत्तदेव मम तेजसः प्रभावस्यांशेन संभूतं जानीहि ४१ अथवा किमनेन परिच्छिन्नदर्शनेन सर्वत्र मद्दृष्टिमेव कुर्वित्याह अथवेति बहुना पृथक्पृथक्
ज्ञानेन किं कार्यं यदिदं सर्वं जगत् एकांशेन एकदेशमात्रेण विष्टभ्य धृत्वा व्याप्येति वा अहमेव स्थितः न मद्व्यतिरिक्तं किंचिदस्ति पादोस्य विश्वा भूतानी-
ति श्रुतेः ४२ इंद्रियद्वारतश्चित्ते बहिर्द्धावति सत्यपि ईशदृष्टिविधानाय विभूतीर्दशमेऽब्रवीत् ॥ इति श्रीभगवद्गीताटीकायां सुबोधिन्यां दशमोऽध्यायः १०

यद्यद्विभूतिमत्सत्त्वं श्रीमदूर्जितमेव वा तत्तदेवावगच्छ त्वं मम तेजोंऽशसंभवम् ४१ अथवा
बहुनैतेन किं ज्ञातेन तवार्जुन विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत् ४२ ॥ इति श्रीमद्भ-
गवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे विभूतियोगो नाम दशमोऽध्यायः १०
अर्जुन उवाच मदनुग्रहाय परमं गुह्यमध्यात्मसंज्ञितं यत्त्वयोक्तं वचस्तेन मोहोऽयं विगतो मम १ ५७

विभूतिवैभवं प्रोच्य मायया परया हरिः दिदृक्षोरर्जुनस्याथ विश्वरूपमदर्शयत् पूर्वाध्यायांते विष्टभ्याहमिदमित्यादिना विश्वात्मकं परमेश्वररूपमुपक्षि-
प्तं तद्दिदृक्षुः पूर्वमभिनंदन् अर्जुन उवाच मदनुग्रहायेति ममानुग्रहाय शोकनिवृत्तये परं परमं परमार्थनिष्ठं गुह्यं गोप्यमपि अध्यात्ममिति संज्ञितं आ-
त्मानात्मविषयं यत्त्वयोक्तं वचः अशोच्यानन्वशोचस्त्वमित्यादि षडध्यायीवाक्यं तेन ममायं मोहो ऽहं हंता एते हन्यंत इत्यादिलक्षणो भ्रमः विगतः नष्टः आत्मनः कर्तृता-

मु॰गी॰टी॰

५७

किंच भवाप्ययाविति भूतानां भवाप्ययौ सृष्टिप्रलयौ त्वत्तः सकाशाद्देव भवतः इति श्रुतौ मया अहं सर्वस्य जगतः प्रभवः प्रलयस्तथा इत्यादौ विस्तरशः पुनः पुनः कमलस्य पत्रे इव सुश्लक्ष्णे विशाले अक्षिणी यस्य हे कमलपत्राक्ष माहात्म्यमपि चाव्ययं अक्षयं श्रुतं विश्वसृष्ट्यादिकर्तृत्वेपि सर्वनियंतृत्वेपि शुभाशुभकर्मकारयितृत्वेपि मोक्षबंधादिविचित्रफलदातृत्वेपि अविकारो वैषम्यासंगोदासीन्यादिलक्षणमपरिमितं महत्त्वं श्रुतं अव्यक्तं व्यक्तिमापन्नं मया ततमिदं सर्वं न च मां तानि कर्माणि निबध्नंति समोहं सर्वभूतेष्वित्यादिना अतस्त्वत्परं तत्त्वादपि जीवानां अहं कर्त्तेत्यादिर्मदीयो मोहो विगत इति भावः २ किंच एवमिति भवाप्ययौ हि भूतानामित्यादि मया श्रुतं यथा त्वं इदानीमात्मानं त्वमात्थ विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगदित्येवं कथयसि हे परमेश्वर एवमेतत् अत्रावि

भवाप्ययौ हि भूतानां श्रुतौ विस्तरशो मया त्वत्तः कमलपत्राक्ष माहात्म्यमपि चाव्ययं २ एवमेतद्यथात्थ त्व
मात्मानं परमेश्वर द्रष्टुमिच्छामि ते रूपमैश्वरं पुरुषोत्तम ३ मन्यसे यदि तच्छक्यं मया द्रष्टुमिति प्रभो योगेश्वर ततो मे त्वं दर्शया
त्मानमव्ययं ४ श्रीभगवानुवाच पश्य मे पार्थ रूपाणि शतशोथ सहस्रशः नानाविधानि दिव्यानि नानावर्णाकृतीनि च ५

श्वासो मम नास्तीत्यर्थः तथापि हे पुरुषोत्तम ते ऐश्वरं ज्ञानैश्वर्यशक्तिबलवीर्यतेजोभिः संपन्नं त्वद्रूपं कौतूहलादहं द्रष्टुमिच्छामि ३ नन्वाहं द्रष्टुमिच्छामीत्येताव तैव त्वया तद्रूपं दर्शयितव्यं किं तर्हि मन्यस इति योगिन एव योगास्तेषामीश्वर मयार्जुनेन द्रष्टुं शक्यं यदि मन्यसे ततस्तर्हि तद्रूपवंतमात्मानमव्ययं नित्यं दर्शय मम ४ एवं प्रार्थितः सन्नत्यद्भुतं रूपं दर्शयिष्यन् सावधानो भवेत्यर्जुनमभिमुखीकरोति पश्येति चतुर्भिः रूपस्यैकत्वेपि नानाविधत्वाद्रूपा [illegible] अ परिमितान्यनेकप्रकाराणि अलौकिकानि मम रूपाणि पश्य वर्णाः शुक्लकृष्णादयः आकृतयोऽवयवसंनिवेशविशेषाः नानाअनेके वर्णाः आकृतयश्च येषां तानि नाना [illegible]
वहु २

श्रीः

तान्येवाह पश्येति आदित्यादीन् मम देहे पश्य मरुतः ४९ कोनपंचाशद्देवविशेषाः अदृष्टपूर्वाणि त्वया चान्येनापि पूर्वमदृष्टानि रूपाणि आश्चर्याणि अद्भुतानि
किंच इहेति तत्र तत्र परिभ्रमता वर्षकोटिभिरपि द्रष्टुमशक्यं कृत्स्नमपि चराचरसहितं जगत् इहास्मिन् देहे अवयवरूपेणैकत्रैव स्थितं अद्याधुनैव पश्य यच्चा
न्यज्जगदाश्रयभूतं कारणस्वरूपं जगतश्चावस्थाविशेषादिकं जयपराजयादिकं च यदन्यद्द्रष्टुमिच्छसि तत्सर्वं पश्य ७ यदुक्तमर्जुनेन मन्यसे यदि तच्छक्यं
इति तत्राह न त्विति अनेनैव स्वीयेन चर्मचक्षुषा मां द्रष्टुं न शक्यसे शक्तो न भविष्यसि अतो हि दिव्यमलौकिकं ज्ञानात्मकं चक्षुस्तुभ्यं ददामि मम ऐश्वरमसाधारणं

पश्यादित्यान्वसून्रुद्रानश्विनौ मरुतस्तथा बहून्यदृष्टपूर्वाणि पश्याश्चर्याणि भारत ६ इहैकस्थं जगत्कृत्स्नं
पश्याद्य सचराचरं मम देहे गुडाकेश यच्चान्यद्द्रष्टुमिच्छसि ७ न तु मां शक्यसे द्रष्टुमनेनैव स्वचक्षुषा दिव्यं ददा
मि ते चक्षुः पश्य मे योगमैश्वरं ८ संजय उवाच एवमुक्त्वा ततो राजन्महायोगेश्वरो हरिः दर्शयामास पार्था
य परमं रूपमैश्वरं ९ अनेकवक्त्रनयनमनेकाद्भुतदर्शनं अनेकदिव्याभरणं दिव्यानेकोद्यतायुधम् १०
दिव्यमाल्याम्बरधरं दिव्यगंधानुलेपनं सर्वाश्चर्यमयं देवमनन्तं विश्वतोमुखम् ११ श्रीगोपालकृष्णाय नमः ६

योगं युक्तिं अघटितघटनासामर्थ्यं पश्य ८ एवमुक्त्वा स भगवानर्जुनाय रूपं दर्शितवान् तच्च रूपं दृष्ट्वार्जुनः श्रीकृष्णं विज्ञापितवानितीममर्थं एवमुक्त्वे
त्यादिषड्भिः श्लोकैः धृतराष्ट्रं प्रति संजय उवाच एवमिति राजन् धृतराष्ट्र महांश्चासौ योगेश्वरः हरिः परममैश्वरं रूपं दर्शितवान् ९ कथंभूतं तदित्यत आ
ह अनेकेति अनेकानि वक्त्राणि नयनानि च यस्मिन् तत् अनेकानामद्भुतानां दर्शनं यस्मिन् तत् अनेकानि दिव्याभरणानि यस्मिन् तत् दिव्यान्यनेकान्युद्यता
न्यायुधानि यस्मिन् तत् १० किंच दिव्येति दिव्यानि माल्यानि अंबराणि च धारयंतीति तथा दिव्यो गंधो यस्य तादृशमनुलेपनं यस्य तत् सर्वाश्चर्यमयं अनेका

भ०गी०टी०

विश्वरूपदीप्तेरूपमहत्त्वमाह दिवीति दिवि आकाशे सूर्यसहस्रस्य युगपदुत्थितस्य यदि युगपदुत्थिता भाः प्रभा भवेत् तर्हि सा तदा तस्य महात्मनो विश्वरूपस्य भासः प्रभायाः कथंचित्तु सदृशी स्यात् नान्योपमास्तीत्यर्थः तथारूपं दर्शयामासेति पूर्वेणैवान्वयः १२ ततः किं वृत्तमित्यपेक्षायामाह संजयः तत्रेति अनेकधा प्रविभक्तं नानाविभागेनावस्थितं कृत्स्नं जगत् देवदेवस्य शरीरे तद्वपुष्त्वेन एकत्र स्थितं तदा पांडवोऽर्जुनोऽपश्यत् १३ एवं दृष्ट्वा किं कृतवानित्यत आह तत इति ततो दर्शनानंतरं विस्मयेनाविष्ट आविष्टः सन् हृष्टानि उत्पुलकितानि रोमाणि यस्य सः धनंजयो देवं तमेव शिरसा प्रणम्य कृतांजलिः संपुटीकृतहस्तो

दिवि सूर्यसहस्रस्य भवेद्युगपदुत्थिता यदि भाः सदृशी सा स्याद्भासस्तस्य महात्मनः १२ तत्रैकस्थं जगत्कृत्स्नं प्रविभक्तमनेकधा अपश्यद्देवदेवस्य शरीरे पांडवस्तदा १३ ततः स विस्मयाविष्टो हृष्टरोमा धनंजयः प्रणम्य शिरसा देवं कृतांजलिरभाषत १४
अर्जुन उवाच पश्यामि देवांस्तव देव देहे सर्वांस्तथा भूतविशेषसंघान् ब्रह्माणमीशं कमलासनस्थमृषींश्च सर्वानुरगांश्च दिव्यान् १५
अनेकबाहूदरवक्त्रनेत्रं पश्यामि त्वां सर्वतोऽनंतरूपं नांतं न मध्यं न पुनस्तवादिं पश्यामि विश्वेश्वर विश्वरूपम् १६

भूत्वा अभाषत उक्तवान् १४ भाषणमेवाह पश्यामीति सप्तदशभिः हे देव तव देहे देवानादित्यादीन् पश्यामि तथा सर्वान् भूतविशेषाणां जरायुजांडजादीनां संघांश्च तथा दिव्यान् ऋषीन् वसिष्ठादीन् उरगांश्च तक्षकादीन् तथा तेषां देवादीनामीशं स्वामिनं ब्रह्माणं च कथंभूतं कमलासनस्थं पृथिवीपद्मकर्णिकायां मेरौ स्थितं पद्मनाभिपद्मासनस्थं १५ किंच अनेकानि बाहूदरादीनि यस्य तादृशं त्वां पश्यामि अनंतानि रूपाणि यस्य तं त्वां सर्वतः पश्यामि तव तु अंतं मध्यं आदिं च न पश्यामि सर्वगतत्वात् १६

श्रीः

परं

किं च किरीटिनमिति किरीटिनं मुकुटवंतं गदिनं गदावंतं चक्रवंतं च सर्वतो दीप्तिमंतं तेजःपुंजरूपं तथा दुर्निरीक्ष्यं द्रष्टुमशक्यं तत्र हेतुः दीप्तयोरनलार्कयोर्द्यु
तिस्तेजो यस्य तं अत एवाप्रमेयं एवंभूतं त्वां समंततः पश्यामि १७ यस्मादेवं तवातर्क्यमैश्वर्यं तस्मात्त्वमिति त्वमेवाक्षरं परमं ब्रह्म
कथंभूतं वेदितव्यं मुमुक्षुभिर्ज्ञातव्यं त्वमेवास्य परं निधानं निधीयतेऽस्मिन्निति निधानं प्रलयस्थानमाश्रयः अत एव त्वमव्ययः नित्यः शाश्वतस्य नित्यस्य धर्मस्य
गोप्ता पालकः सनातनश्चिरंतनः पुरुषो मम संमतोऽसि १८ किंच अनादीति अनादिमध्यांतं उत्पत्तिस्थितिप्रलयरहितं अनंतं वीर्यं प्रभावो यस्य तं अनं

किरीटिनं गदिनं चक्रिणं च तेजोराशिं सर्वतो दीप्तिमन्तं पश्यामि त्वां दुर्निरीक्ष्यं समंताद्दीप्तानलार्कद्युतिमप्रमेयं १७
त्वमक्षरं परमं वेदितव्यं त्वमस्य विश्वस्य परं निधानं त्वमव्ययः शाश्वतधर्मगोप्ता सनातनस्त्वं पुरुषो मतो मे १८
अनादिमध्यान्तमनंतवीर्यमनंतबाहुं शशिसूर्यनेत्रं पश्यामि त्वां दीप्तहुताशवक्त्रं स्वतेजसा विश्वमिदं तपंतं १९
द्यावापृथिव्योरिदमंतरं हि व्याप्तं त्वयैकेन दिशश्च सर्वाः दृष्ट्वाद्भुतं रूपमुग्रं तवेदं लोकत्रयं प्रव्यथितं महात्मन् २०
अमी हि त्वां सुरसंघा विशंति केचिद्भीताः प्रांजलयो गृणंति स्वस्तीत्युक्त्वा महर्षिसिद्धसंघाः स्तुवंति त्वां स्तुतिभिः पुष्कलाभिः

ताः वीर्यवंतो बाहवो यस्य तं शशिसूर्यौ नेत्रे यस्य तं त्वां पश्यामि तथा दीप्तो हुताशोऽग्निर्वक्त्रे यस्य तं स्वतेजसा इदं विश्वं तपंतं पश्यामि १९ किंच द्यावापृ
थिव्योरिति द्यावापृथिव्योरिदमंतरं अंतरिक्षं त्वयैकेन व्याप्तं दिशश्च सर्वा व्याप्ताः अद्भुतं अदृष्टपूर्वं तवेदं यामिदमुग्रं घोरं रूपं दृष्ट्वा लोकत्रयं प्रव्यथितं
अतिभीतं पश्यामीति पूर्वस्यैवानुषंगः २० किंच अमी हीति अमी सुरसंघाः भीताः संतः त्वां विशंति शरणं प्रविशंति तेषां मध्ये केचिद्भीताः पुरत एव स्थि
त्वा कृतसंपुटकराः गृणंति जय जय रक्ष रक्षेति प्रार्थयंति स्पष्टमन्यत् २१

०टी०

किंच रुद्रा इति रुद्राश्च आदित्याश्च वसवश्च ये च साध्या नाम देवाः विश्वेदेवाः अश्विनौ देवौ मरुद्गणाः ऊष्माणं पिबंतीत्यूष्मपाः पितरः ऊष्मभागा हि पितर इति श्रुतेः स्मृतिश्च यावदुष्णं भवेदन्नं यावदश्नंति वाग्यताः पितरस्तावदश्नंति यावन्नोक्ता हविर्गुणा इति गंधर्वाश्च यक्षाश्च असुराश्च विरोचनादयः सिद्धानां संघाश्च सर्वेऽपि वयं विस्मिताः संतः त्वां वीक्षंत इत्यन्वयः २२ किंच हे महाबाहो महत्तु अत्यूर्जितं तव रूपं दृष्ट्वा लोकाः सर्वे प्रव्यथिताः अतिभीताः तथा हं च प्रव्यथितोस्मि कीदृशं रूपं बहूनि वक्त्राणि नेत्राणि च यस्मिन् तत् बहवो बाहव ऊरवः पादाश्च यस्मिन् तत्

रुद्रादित्या वसवो ये च साध्या विश्वेऽश्विनौ मरुतश्चोष्मपाश्च गंधर्वयक्षासुरसिद्धसंघा वीक्षंते त्वां विस्मिताश्चैव सर्वे २२
रूपं महत्ते बहुवक्त्रनेत्रं महाबाहो बहुबाहूरुपादं बहूदरं बहुदंष्ट्राकरालं दृष्ट्वा लोकाः प्रव्यथितास्तथाहं २३
नभस्पृशं दीप्तमनेकवर्णं व्यात्ताननं दीप्तविशालनेत्रं दृष्ट्वा हि त्वां प्रव्यथितांतरात्मा धृतिं न विंदामि शमं च विष्णो २४
दंष्ट्राकरालानि च ते मुखानि दृष्ट्वैव कालानलसन्निभानि दिशो न जाने न लभे च शर्म प्रसीद देवेश जगन्निवास २५

नभस्पृशमिति

बहून्युदराणि यस्मिन् तत् बह्वीभिर्दंष्ट्राभिः करालं विकृतं रौद्रमित्यर्थः २३ न केवलं भीतोहमित्येतावदेव अपि तु नभस्पृशमिति तं नभस्पृक् तमंतरिक्षव्यापिनमित्यर्थः दीप्तं तेजोयुक्तं अनेके वर्णा यस्य तं व्यात्तानि विवृतानि आननानि यस्य तं दीप्तानि विशालानि नेत्राणि यस्य तं एवंभूतं हि त्वां दृष्ट्वा प्रव्यथितं अंतरात्मा मनो यस्य सोहं धृतिं धैर्यमुपशमं च न लभे २४ किंच दंष्ट्रेति भो देवेश तव मुखानि दृष्ट्वा भयाविशेन दिशो न जाने शर्म च न लभे भो जगन्निवास प्रसन्नो भव कीदृशानि मुखानि दंष्ट्राभिः करालानि कालानलः प्रलयाग्निः तत्सदृशानि २५ ७ श्रीनर्मदादेव्यै नमः ७ ७

श्रीः
५८

यच्चान्यद्द्रष्टुमिच्छसि इत्यनेनास्मिन् संग्रामे भाविजयपराजयादिकं च मम देहे पश्येति यद्भगवतोक्तं तदिदानीं पश्यन्नाह अमी चेति पंचभिः अमी धृ
तराष्ट्रस्य पुत्रा दुर्योधनादयः सर्वे अवनिपालानां जयद्रथादीनां राज्ञां संघैः सहैव तव वक्त्राणि विशंति इत्युत्तरेणान्वयः तथा भीष्मश्च द्रोणश्चासौ सू
तपुत्रः कर्णश्च न केवलं तत्रैव विशंति अपि तु प्रतियोद्धारोऽस्मदीया योधमुख्याः शिखंडिधृष्टद्युम्नादयस्तैः सह २६ वक्त्राणीति ते सर्वे त्वरमाणा धा
वंतः दंष्ट्राभिः विकृतानि भयंकराणि तव वक्त्राणि विशंति तेषां मध्ये केचित् चूर्णितैः शिरोभिरुपलक्षिताः दंतसंधिषु संश्लिष्टा दृश्यंते २७ प्रवेशमेव

अमी च त्वां धृतराष्ट्रस्य पुत्राः सर्वे सहैवावनिपालसंघैः भीष्मो द्रोणः सूतपुत्रस्तथासौ सहास्मदीयैरपि योधमुख्यैः २६
वक्त्राणि ते त्वरमाणा विशंति दंष्ट्राकरालानि भयानकानि केचिद्विलग्ना दशनांतरेषु संदृश्यन्ते चूर्णितैरुत्तमांगैः २७
यथा नदीनां बहवोंबुवेगाः समुद्रमेवाभिमुखा द्रवंति तथा तवामी नरलोकवीरा विशंति वक्त्राण्यभिविज्वलंति २८
यथा प्रदीप्तं ज्वलनं पतंगा विशंति नाशाय समृद्धवेगाः तथैव नाशाय विशंति लोकास्तवापि वक्त्राणि समृद्धवेगाः २९

दृष्टांतेनाह यथेति नदीनामनेकमार्गप्रवृत्तानां बहवः अंबूनां वारीणां वेगाः प्रवाहाः समुद्राभिमुखाः संतो यथा समुद्रमेव द्रवंति प्रविशंति तथा अमी
मे नरलोकवीरास्ते अभिविज्वलंति सर्वतः प्रदीप्यमानानि तव वक्त्राणि प्रविशंति २८ अवशत्वेन प्रवेशे नदीवेगदृष्टांत उक्तः बुद्धिपूर्वकप्रवेशे दृष्टां
तमाह यथेति प्रदीप्तं ज्वलनमग्निं पतंगाः शलभाः बुद्धिपूर्वकं समृद्धवेगा येषां ते यथा नाशाय मरणाय विशंति तथैव लोका एते जना अपि तव मुखानि प्रविशंति २९

ततः किमतआह लेलिह्यसइति ग्रसमानो गिलन्समग्रान्लोकान्सर्वानितान्वीरान् समंतान्सर्वतो लेलिह्यसे अतिशयेन भक्षयसि कैर्ज्वलद्भिर्व
दनैः किंच हे विष्णो तव भासो दीप्तयः तेजोभिः विस्फुरणैः समस्तं जगद्व्याप्य प्रतपंति संतापयंति ३० यतएवं तस्मात् आख्याहीति भवानुग्ररूपः कइत्या
ख्याहि कथय तुभ्यं नमोस्तु हे देववर प्रसन्नो भव भवंतमाद्यं पुरुषं विशेषेण ज्ञातुमिच्छामि यतः तव प्रवृत्तिं चेष्टां किमर्थमेवं प्रवृत्तोसीति न जानामि एवं
प्रनतस्य तव प्रवृत्तिं वार्त्तामपि न जानामीति वा ३१ एवं प्रार्थितः सन् श्रीभगवानुवाच कालोस्मीति लोकान्प्राणिनः संहर्तुं इह लोके प्रवृत्तोस्मि अतः

लेलिह्यसे ग्रसमानः समंताल्लोकान्समग्रान्वदनैर्ज्वलद्भिः तेजोभिरापूर्य जगत्समग्रं भासस्तवोग्राः प्रतपंति विष्णो ३०
आख्याहि मे को भवानुग्ररूपो नमोस्तु ते देववर प्रसीद विज्ञातुमिच्छामि भवंतमाद्यं न हि प्रजानामि तव प्रवृत्तिं ३१ श्रीभग
वानुवाच कालोस्मि लोकक्षयकृत्प्रवृद्धो लोकान्समाहर्तुमिह प्रवृत्तः ऋतेपि त्वां न भविष्यंति सर्वे येवस्थिताः प्रत्यनीकेषु यो
धाः ३२ तस्मात्त्वमुत्तिष्ठ यशो लभस्व जित्वा शत्रून्भुंक्ष्व राज्यं समृद्धं मयैवैते निहताः पूर्वमेव निमित्तमात्रं भव सव्यसाचिन् ३३

ऋतेपि त्वां इति त्वां हंतारं विनापि न भविष्यंति न जीविष्यंति केते प्रत्यनीकेषु अनीकानि प्रति भीष्मद्रोणादीनां ये योद्धारो वस्थितास्ते सर्वेपि ३२ यस्मादेवं त
स्मादिति तस्मात्त्वमुत्तिष्ठ युद्धायोत्तिष्ठ देवैरपि दुर्जेया भीष्मद्रोणादयोर्जुनेन निर्जिताः इत्येवंभूतं यशो लभस्व प्राप्नुहि अयत्नेन शत्रून्जित्वा संपन्नं राज्यं भुंक्ष्व
एते च तव शत्रवः त्वदीययुद्धात्पूर्वमेव मयैव कालात्मना निहतप्रायाः तथापि त्वं निमित्तमात्रं भव हे सव्यसाचिन् सव्येन वामेन हस्तेन सन्धितुं संधातुं शीलमस्येति [illegible] ३३

नंचैनद्विद्मः कतरन्नो गरीयो यद्वा जयेम यदि वा नो जयेयुः इति पार्थाशंकां तां निरसन कार्यैत्याह द्रोणं चेति येभ्यस्त्वं शंकसे तान् द्रोणादीन् मयैव हतान् त्वं जहि घा
तय मा व्यथिष्ठाः मा भयं कार्षीः सपत्नान् शत्रून् रणे युद्धे जेतासि जेष्यसि ३४ ततो यदुक्तं तत् धृतराष्ट्रं प्रति संजय उवाच एतदिति एतत् पूर्वश्लोकत्र
यात्मकं केशवस्य वचनं श्रुत्वा वेपमानः कंपमानः किरीट्यर्जुनः प्रांजलिः संपुटीकृतहस्तः कृष्णं नमस्कृत्य पुनरप्याह उक्तवान् कथमाह भयहर्षाभ्या
वेशात् गद्गदेन कंठकंपेन सह वर्त्तत इति सगद्गदं यथा भवति तथा किंच भीतादपि भीतः सन् प्रणम्यावनतो भूत्वा ३५ स्थाने हृषीकेश इत्येकादशभिः

द्रोणं च भीष्मं च जयद्रथं च कर्णं तथान्यानपि योधवीरान् मया हतांस्त्वं जहि मा व्यथिष्ठा युद्ध्यस्व जेतासि रणे सपत्नान् ३४ संजय
उवाच एतच्छ्रुत्वा वचनं केशवस्य कृतांजलिर्वेपमानः किरीटी नमस्कृत्वा भूय एवाह कृष्णं सगद्गदं भीतभीतः प्रणम्य ३५ अर्जु
न उवाच स्थाने हृषीकेश तव प्रकीर्त्या जगत्प्रहृष्यत्यनुरज्यते च रक्षांसि भीतानि दिशो द्रवंति सर्वे नमस्यंति च सिद्धसंघाः ३६

अर्जुनस्योक्तिः स्थाने इत्यव्ययं युक्तमस्मिन्नर्थे हे हृषीकेश यत एवं त्वमद्भुतप्रभावो भक्तवत्सलश्च अतस्तव प्रकीर्त्या माहात्म्यसंकीर्तनेन केवल
महमेव प्रहृष्यामि किंतु जगत्सर्वं प्रहृष्यति प्रकर्षेण हर्षं प्राप्नोति एतत्तु स्थाने युक्तमित्यर्थः तथा जगदनुरज्यते च अनुरागमुपैति इति यत् तथा रक्षांसि
भीतानि दिशः प्रति द्रवंति पलायंत इति यत् सर्वे योगतपो [illegible] मंत्रादिसिद्धानां संघाः नमस्यंति प्रणमंतीति यत् एतच्च युक्तमेव न विचित्रमित्यर्थः ३६

स्थाने

असरयकैव

तत्र हेतुः कस्मादिति हे महात्मन् हे देवेश हे जगन्निवास कस्माद्धेतोस्ते तुभ्यं न नमेरन् नमस्कारं न कुर्युः कथंभूताय ब्रह्मणोऽपि गरीयसे गुरुतराय आदिकर्त्रे च ब्रह्मणोऽपि जनकाय किंच सत् व्यक्तं नाम्यांपरं मूलकारणाल्लतं यदक्षरं ब्रह्म तद्धत्वमेव एतैर्न्नवभिर्हेतुभिः लोकैः सर्वैर्नमस्यं तीति न चित्रमित्यर्थः ३७ किंच त्वमिति त्वमादिदेवः देवानामादिः यतः पुराणः अनादिः पुरुषस्त्वं अत एव त्वमस्य विश्वस्य परं निधानं लयस्थानं तथा विश्वस्य वेत्ता ज्ञाता त्वं वेद्यं च ज्ञेयं यद्वस्तुजातं परं च धाम वैष्णवं पदं तदपि त्वमेवासि अत एव हे अनंतरूप त्वयैवेदं विश्वं ततं व्याप्तं एतैश्च सप्तभिर्हेतुभिस्त्वमेव नमस्का

कस्माच्च ते न नमेरन्महात्मन् गरीयसे ब्रह्मणोऽप्यादिकर्त्रे अनंत देवेश जगन्निवास त्वमक्षरं सदसत्तत्परं यत् ३७
त्वमादिदेवः पुरुषः पुराणस्त्वमस्य विश्वस्य परं निधानं वेत्तासि वेद्यं च परं च धाम त्वया ततं विश्वमनंतरूप ३८
वायुर्यमोऽग्निर्वरुणः शशांकः प्रजापतिस्त्वं प्रपितामहश्च नमो नमस्तेऽस्तु सहस्रकृत्वः पुनश्च भूयोऽपि नमो नमस्ते ३९
नमः पुरस्तादथ पृष्ठतस्ते नमोऽस्तु ते सर्वत एव सर्व अनंतवीर्यामितविक्रमस्त्वं सर्वं समाप्नोषि ततोऽसि सर्वः ४०

र्य इत्यर्थः ३८ ततश्च त्वमेव सर्वैर्नमस्कार्यः सर्वदेवात्मकत्वात् इति स्तुवन् स्वयमपि नमस्करोति वायुरिति वाय्वादिरूपस्त्वमिति सर्वदेवतात्मकत्वोपलक्षणार्थमुक्तं प्रजापतिः पितामहः तस्यापि जनकत्वात् प्रपितामहस्त्वं अतस्ते तुभ्यं सहस्रकृत्वः [illegible] सहस्रशः नमोऽस्तु भूयोऽपि पुनरपि सहस्रकृत्वो नम इति भक्तिश्रद्धाभ्यामतिरेकेण नमस्कारेस्तृप्तिमनधिगच्छन् बहुशः प्रणमति ३९ किंच नम इति हे सर्व सर्वात्मन् सर्वास्वपि दिक्षु तुभ्यं नमोऽस्तु सर्वात्मकत्वमुपपादयन्नाह अनंतवीर्यं सामर्थ्यं यस्य अमितो विक्रमः पराक्रमो यस्य सः एवंभूतस्त्वं सर्वं विश्वं सम्यगंतर्बहिश्च व्याप्नोषि सकलं सर्वो

[illegible]

श्रीः

इदानीं भगवन्तं क्षमापयति सखेति द्वाभ्यां त्वं मम सखेत्येवं मत्वा प्रसभं हठेन तिरस्कारेण यदुक्तं तत्क्षामये त्वामित्युत्तरेणान्वयः किं तत् हे कृ
ष्ण हे यादव हे सखेति संधिरार्षः प्रसभोक्तौ हेतुः तव महिमानमिदं विश्वरूपमजानता मया प्रमादात् प्रणयेन स्नेहेनापि वा यदुक्तमिति ४१ किंच
यच्चेति हे अच्युत त्वं मया परिहासार्थं क्रीडादिषु तिरस्कृतोसि एकः एकलः सखीन् विना रहसि स्थित इत्यर्थः अथवा तत्समक्षं तेषां परिहसतां सखी
नां समक्षं पुरतोपि तत्सर्वमपराधजातं त्वामप्रमेयमचिंत्यप्रभावं क्षामये क्षमां कारयामि ४२ अचिंत्यप्रभावमेवाह पितेति न विद्यते प्रतिमाउ

सखेति मत्वा प्रसभं यदुक्तं हे कृष्ण हे यादव हे सखेति अजानता महिमानं तवेदं मया प्रमादात् प्रणयेन वापि ४१
यच्चावहासार्थमसत्कृतोसि विहारशय्यासनभोजनेषु एकोथवाप्यच्युत तत्समक्षं तत्क्षामये त्वामहमप्रमेयं ४२
पितासि लोकस्य चराचरस्य त्वमस्य पूज्यश्च गुरुर्गरीयान् न त्वत्समोस्त्यभ्यधिकः कुतोन्यो लोकत्रयेप्यप्रतिमप्रभाव ४३
तस्मात्प्रणम्य प्रणिधाय कायं प्रसादये त्वामहमीशमीड्यं पितेव पुत्रस्य सखेव सख्युः प्रियः प्रियायार्हसि देव सोढुं ४४

पमा यस्य सोऽप्रतिमः तथाविधः प्रभावो यस्य तव हे अप्रतिमप्रभाव त्वमस्य चराचरस्य पिता जनकोसि अत एव पूज्यश्च गुरुश्च गुरोरपि गरीया
न् गुरुतरः अतः लोकत्रयेपि त्वत्सम एव तावदन्यो नास्ति परमेश्वरस्यान्यस्याभावात् त्वत्तोऽभ्यधिकः पुनः कुतः स्यात् ४३ यस्मादेवं तस्मात्त्वामीशं
जगतः स्वामिनं ईड्यं स्तुत्यं प्रसादये प्रसादयामि कथं प्रणिधाय दंडवन्निपात्य प्रणम्य नत्वा अतस्त्वं मम अपराधं सोढुं क्षंतुमर्हसि कस्य क इव पुत्रस्यापराधं
कृपया पिता यथा सहते सख्युर्मित्रस्यापराधं सखा निरुपाधिबंधुर्यथा प्रियश्च प्रियायापराधं तत्प्रियार्थं यथा सहते ४४

काय

भ०गी०टी०
८२

एवं क्षमापयित्वा प्रार्थयति अदृष्टपूर्वमिति द्वाभ्यां हे देव पूर्वमदृष्टं तव रूपं दृष्ट्वा हृषितोऽस्मि हृष्टोऽस्मि तथा भयेन च मे मनः प्रव्यथितं प्रचलितं तस्मान्म
मव्यथानिवृत्तये तदेव रूपं दर्शय हे देवेश हे जगन्निवास प्रसन्नो भव ४५ तदेव रूपं विशेषयन्नाह किरीटिनमिति किरीटवन्तं चक्रहस्तं च त्वां द्र
ष्टुमिच्छामि पूर्वं यथा दृष्टोऽसि तथैव अतो हे सहस्रबाहो हे विश्वमूर्ते इदं रूपं संहृत्य तेनैव किरीटादियुक्तेन चतुर्भुजेन रूपेण भव आविर्भव तद्दर्शनेन
श्रीकृष्णमर्जुनः पूर्वमपि किरीटादियुक्तमेव पश्यतीति गम्यते यत्तु पूर्वमुक्तं विश्वरूपदर्शने किरीटिनं चक्रिणं पश्यामीति तच्च बहुकिरीटाद्यभि
प्रायेण यद्वा एतावन्तं कालं यं त्वां किरीटिनं चक्रिणं च स्वप्रसन्नमपश्यं नमे वेदानीं तेजोराशिं दुर्निरीक्ष्यं पश्यामीत्येवं तत्र वचनव्यक्तिरित्यविरोधः ४६

अदृष्टपूर्वं हृषितोऽस्मि दृष्ट्वा भयेन च प्रव्यथितं मनो मे तदेव मे दर्शय देव रूपं प्रसीद देवेश जगन्निवास ४५ किरीटि
नं गदिनं चक्रहस्तमिच्छामि त्वां द्रष्टुमहं तथैव तेनैव रूपेण चतुर्भुजेन सहस्रबाहो भव विश्वमूर्ते ४६ श्रीभगवा
नुवाच मया प्रसन्नेन तवार्जुनेदं रूपं परं दर्शितमात्मयोगात् तेजोमयं विश्वमनन्तमाद्यं यन्मे त्वदन्येन न दृष्टपूर्वं ४७
न वेदयज्ञाध्ययनैर्न दानैर्न च क्रियाभिर्न तपोभिरुग्रैः एवंरूपः शक्य अहं नृलोके द्रष्टुं त्वदन्येन कुरुप्रवीर ४८ ७

एवं प्रार्थितः सन्नुत्सन्नमाश्वासयन् श्रीभगवानुवाच मयेति त्रिभिः हे अर्जुन किमिति त्वं बिभेषि यतः प्रसन्नेन कृपया तवेदं परं उत्तमं रूपं दर्शितं आत्मनो मम यो
गात् योगमायासामर्थ्यात् परत्वमेवाह तेजोमयं विश्वात्मकं अनन्तं आद्यं च यन्मम रूपं त्वादृशाद्भक्तादन्येन न पूर्वं दृष्टं ततः ४७ एतद्दर्शनमतिदुर्लभं त्व
याल्लब्धं कृतार्थोऽसीत्याह नेति न वेदाध्ययनातिरेकेण यज्ञाध्ययनस्याभावाय तत्र वेदनयज्ञविद्याः कल्पसूत्राद्या लक्ष्यन्ते वेदानां यज्ञविद्यानां चाध्ययनैरित्यर्थः
न च दानैः न च क्रियाभिः अग्निहोत्रादिभिः न चोग्रैस्तपोभिश्चान्द्रायणादिभिः एवंरूपोऽहं त्वत्तोऽन्येन मनुष्यलोके द्रष्टुं शक्यः अपि तु त्वमेव केवलं मत्प्रसादेन

श्रीः
८२

एवमपिचेन्ममेदं घोरंरूपंदृष्ट्वा तवव्यथाभवतितर्हि तदेवरूपंदर्शयामीत्याह मातइति ईदृक्‌ ईदृशं मदीयंघोरंरूपंदृष्ट्वातेव्यथामास्तु व्यपगतभयः प्रीतमानश्चसन्पुनस्त्वंतदेवेदंममरूपंप्रकर्षेणपश्य ४९ एवमुक्त्वाप्राकृतमेवरूपंदर्शितवानितिसंजयउवाच इतीति श्रीवासुदेवोऽर्जुनमेवमुक्त्वातथापूर्वमासीत्‌ तथैवकिरीटादियुक्तंचतुर्भुजंस्वीयंरूपंपुनर्दर्शयामास एनमर्जुनंभीतं एवंप्रसन्नवपुर्भूत्वापुनरप्याश्वासितवान्‌

मातेव्यथामाचविमूढभावो दृष्ट्वारूपंघोरमीदृङ्ममेदं व्यपेतभीःप्रीतमनाःपुनस्त्वंतदेवमेरूपमिदंप्रपश्य ४९ संजयउवाच इत्यर्जुनंवासुदेवस्तथोक्त्वास्वकंरूपंदर्शयामासभूयः आश्वासयामासचभीतमेनंभूत्वापुनःसौम्यवपुर्महात्मा ५० अर्जुनउवाच दृष्ट्वेदंमानुषंरूपंतवसौम्यंजनार्दन इदानीमस्मिसंवृत्तःसचेताःप्रकृतिंगतः ५१ श्रीभगवानुवाच सुदुर्दर्शमिदंरूपंदृष्टवानसियन्मम देवाअप्यस्यरूपस्यनित्यंदर्शनकांक्षिणः ५२ नाहंवेदैर्नतपसानदानेननचेज्यया शक्यएवंविधोद्रष्टुंदृष्टवानसिमांयथा ५३ ५७ श्रीगोपालकृष्णायनमः

महात्माविश्वरूपःकृपालुरितिवा ५० ततोनिर्भयःसन्नर्जुनउवाच दृष्ट्वेति सचेताःप्रसन्नचित्त इदानींसंवृत्तः जातोऽस्मि प्रकृतिंस्वास्थ्यंचप्राप्तोऽस्मिप्रहृष्टःस्पष्टं ५१ स्वकृतस्यानुग्रहस्यातिदुर्लभत्वंदर्शयन्‌श्रीभगवानुवाच सुदुर्दर्शमिति यन्ममविश्वरूपंत्वंदृष्टवानसि इदंसुदुर्दर्शमत्यंतंद्रष्टुमशक्यं यतोदेवाअस्यरूपस्यसर्वदादर्शनमिच्छंति केवलंनपुनरिदंपश्यंति ५२ तत्रहेतुः नाहमिति स्पष्टार्थः ५३ ६७

केनोपायेन तर्हि द्रष्टुं शक्यं इति तत्राह भक्त्या इति अनन्यया मदेकनिष्ठया भक्त्या तु एवंभूतो विश्वरूपो हं तत्त्वेन परमार्थतो ज्ञातुं शक्यः शास्त्रतः द्रष्टुं
च प्रत्यक्षतः प्रवेष्टुं च तादात्म्येन शक्यः नान्यैरुपायैः ५४ अतः सर्वशास्त्रसारं परमं रहस्यं संक्षिप्याह मत्कर्मकृदिति मदर्थं कर्म करोतीति मत्क-
र्मकृत् अहमेव परमः पुरुषार्थो यस्य सः ममैव भक्तः संश्रितः पुत्रादिषु संगवर्जितः निर्वैरः सर्वभूतेषु यः स मां प्राप्नोति नान्य इति देवैरपि सु-
दुर्दर्शं तपोज्ञानादिकोटिभिः भक्ताय भगवानेव विश्वरूपमदर्शयत् ॥ ५५ इति श्रीभगवद्गीताटीकायां सुबोधिन्यां एकादशोध्यायः ११

भक्त्या त्वनन्यया शक्य अहमेवंविधोर्जुन ज्ञातुं द्रष्टुं च तत्त्वेन प्रवेष्टुं च परंतप ५४ मत्कर्मकृन्मत्परमो मद्भक्तः
संगवर्जितः निर्वैरः सर्वभूतेषु यः स मामेति पांडव ५५ ॥ इति श्रीमद्भगवद्गीता० विश्वरूपदर्शनो नाम एका-
दशोध्यायः ११ ॥ अर्जुन उवाच एवं सततयुक्ता ये भक्तास्त्वां पर्युपासते ये चाप्यक्षरमव्यक्तं तेषां के योगवित्तमाः १

निर्गुणोपासनस्यैव सगुणोपासनस्य च श्रेयः कतरदित्येतन्निर्णेतुं द्वादशोधुना । पूर्वाध्यायांते मत्कर्मकृन्मत्परम इति एवं भक्तिनिष्ठस्य श्रेष्ठत्वमुक्तं न
कौंतेय प्रतिजानीहि इत्यादिना तत्र तस्यैव श्रेष्ठत्वं वर्णितं तेषां ज्ञानी नित्ययुक्त एकभक्तिर्विशिष्यत इत्यादिना च सर्वं ज्ञानप्लवेनैव वृजिनं संतरिष्यसि इ-
त्यादिना च ज्ञाननिष्ठस्य श्रेष्ठत्वं कथितं एवमुभयोः श्रैष्ठ्ये ऽपि विशेषजिज्ञासया भगवंतमर्जुन उवाच एवमिति एवं सर्वकर्मार्पणादिना सततं युक्ताः
सत्वनिष्ठाः संतो ये भक्ताः त्वां विश्वरूपं सर्वज्ञं सर्वशक्तिं पर्युपासते ध्यायंति ये चाप्यक्षरं ब्रह्म अव्यक्तं निर्विशेषं उपासते तेषां उभयेषां मध्ये के योगविदः श्रेष्ठा
केऽतिशय

तत्र प्रथमाः श्रेष्ठा इत्युत्तरं श्रीभगवानुवाच मयीति मयि परमेश्वरे सर्वज्ञत्वादिगुणविशिष्टे मन आवेश्य एकाग्रं कृत्वा नित्ययुक्ता मदर्थकर्मानु
ष्ठानादिना मन्निष्ठाः संतः श्रेष्ठाः श्रद्धायुक्ता ये मामाराधयंति ते युक्ततमा ममाभिमताः २ तदितरे श्रेष्ठा नेत्याह येत्विति द्वाभ्यां ये त्वक्षरं प
र्युपासते ध्यायंति ते मामेव प्राप्नुवंतीति द्वयोरन्वयः अक्षरस्य लक्षणम् अनिर्देश्यं शब्देन व्यपदेष्टुमशक्यं यतो ऽव्यक्तं रूपादिहीनं सर्वत्रगं सर्व
व्यापि अव्यक्तत्वादेवाचिंत्यं कूटस्थं कूटे मायाप्रपंचे अधिष्ठानत्वेन [illegible] स्थितं अचलं वृद्ध्यादिरहितं अत एव ध्रुवं नित्यं स्पष्टमन्यत् ३ नैव

श्रीभगवानुवाच मय्यावेश्य मनो ये मां नित्ययुक्ता उपासते श्रद्धया परयोपेतास्ते मे युक्ततमा मताः २ ये त्वक्षरम
निर्देश्यमव्यक्तं पर्युपासते सर्वत्रगमचिंत्यं च कूटस्थमचलं ध्रुवं ३ संनियम्येंद्रियग्रामं सर्वत्र समबुद्धयः ते प्राप्नुवंति
मामेव सर्वभूतहिते रताः ४ क्लेशो ऽधिकतरस्तेषामव्यक्तासक्तचेतसां अव्यक्ता हि गतिर्दुःखं देहवद्भिरवा
प्यते ५ ये तु सर्वाणि कर्माणि मयि संन्यस्य मत्पराः अनन्येनैव योगेन मां ध्यायन्त उपासते ६ ७ ७

च ते ऽपि चेत्त्वामेव प्राप्नुवंति तर्हि तेषां युक्ततमत्वं कुत इत्यपेक्षायां क्लेशाधिक्यविशेषमाह क्लेश इति त्रिभिः अव्यक्ते निर्विशेषे अक्षरे आसक्तं चे
तो येषां तेषां क्लेशो ऽधिकतरः हि यस्मात् अव्यक्तविषया गतिः निष्ठा देहाभिमानिभिः दुःखं यथा भवत्येवं अवाप्यते देहाभिमानिनां नित्यं प्रत्य
क्प्रवणस्य दुर्घटत्वादिति भावः ५ मद्भक्तानां तु मत्प्रसादादनायासेन एव सिद्धिर्भवतीत्याह ये त्विति द्वाभ्यां मयि परमेश्वरे सर्वाणि कर्माणि
संन्यस्य समर्प्य मत्पराः संतो मां ध्यायंतो ऽनन्येन न विद्यते अन्यो भजनीयो यस्मिन् तेनैव एकांतभक्तियोगेन उपासते इत्यर्थः ६ श्रीनर्मदा ७

तेषामिति एवं मय्यावेशितं चेतो येस्तेषां मृत्युयुक्तात्संसारसागरादहं समुद्धर्ताऽचिरेणैव भवामि ७ यस्मादेवं तस्मान्मय्येवेति मय्येव
संकल्पात्मकं मनः आधत्स्व स्थिरीकुरु बुद्धिमपि अध्यवसायात्मिकां मय्येव प्रवेशय एवं कुर्वन्मत्प्रसादेन लब्धज्ञानः सन्नत ऊर्ध्वं देहांते मय्येव
निवसिष्यसि निवत्स्यसि मदात्मना वासं करिष्यसि नात्र संशयः तथा च श्रुतिः देहांते देवः परं ब्रह्म तारकं व्याचष्टे इति ८ भेत्राशक्तं प्रति
क्रमेणोपायमाह अथेति स्थिरं यथा भवत्येवं मयि चित्तं धारयितुं यदि शक्तो न भवसि नहि विक्षिप्तं चित्तं पुनः पुनः प्रत्याहृत्य ममानुस्मरणलक्ष

तेषामहं समुद्धर्ता मृत्युसंसारसागरात् भवामि नचिरात्पार्थ मय्यावेशितचेतसां ७ मय्येव मन आधत्स्व म
यि बुद्धिं निवेशय निवसिष्यसि मय्येव अत ऊर्ध्वं न संशयः ८ अथ चित्तं समाधातुं न शक्नोषि मयि स्थिरं अ
भ्यासयोगेन ततो मामिच्छाप्तुं धनंजय ९ अभ्यासेप्यसमर्थोसि मत्कर्मपरमो भव मदर्थमपि कर्माणि कुर्वन्
सिद्धिमवाप्स्यसि १० अथैतदप्यशक्तोसि कर्तुं मद्योगमाश्रितः सर्वकर्मफलत्यागं ततः कुरु यतात्मवान् ११

णो योऽभ्यासयोगस्तेन मां प्राप्तुमिच्छ प्रयत्नं कुरु हे धनंजय ९ अभ्यास इति अभ्यासेप्ययमशक्तोसि तर्हि मत्प्रीत्यर्थानि यानि कर्माणि एकाद
श्युपवासव्रतचर्यानामसंकीर्तनादीनि कुर्वन् मदनुष्ठानमेव परमं यस्य तादृशो भव एवं भूतान्यपि कर्माणि कुर्वन् मोक्षं प्राप्स्यसि १० अत्यंतभगवद
मेपरिनिष्ठायामशक्तस्य पक्षांतरमाह अथैतदिति यद्येतदपि कर्तुमशक्तोसि तर्हि मद्योगं मदेकशरणत्वमाश्रितः सन् सर्वेषां दृष्टार्थकानामावश्य
कानां चाग्निहोत्रादिकर्मणां फलानि यतचित्तो भूत्वा परित्यज तदेतदुक्तं भवति यथा तावदीश्वराज्ञया यथाशक्ति कर्माणि कर्त्तव्यानि फलं पुनर्दृष्टम
दृष्टं वा परमेश्वराधीनमित्येवं मयि भावमारोप्य फलासक्तिं परित्यजमानो मत्प्रसादेन कृतार्थो भविष्यसीति ११

र्त

तमिमं फलत्यागं स्तौति श्रेयो हीति सम्यक्ज्ञानरहितादभ्यासात् (श्रुति)युक्तिसहितोपदेशपूर्वकं ज्ञानं श्रेष्ठं तस्मादपि तत्पूर्वकं ध्यानं विशिष्टं (तत्)
ततस्तु तं पश्यति निष्कलं ध्यायमान इति श्रुतेः तस्मादप्युक्तलक्षणः कर्मफलत्यागः श्रेष्ठः तस्मादेवंभूतात् त्यागात् कर्मसु तत्फलेषु वासक्ति
निवृत्त्य मत्प्रसादेन च समनंतरमेव संसारः शांतिर्भवति १२ एवंभूतस्य भक्तस्य क्षिप्रमेव परमेश्वरप्रसाद हेतून्धर्मानाह अद्वेष्टेत्यष्टभिः सर्व
भूतानां यथायथमद्वेष्टा मैत्रः करुणश्च उत्तमेषु द्वेषशून्यः समेषु मित्रत्वाव स्थित इति मैत्रः हीनेषु कृपालुरित्यर्थः निर्ममो निरहंकारश्च कृपालुत्वाद

श्रेयो हि ज्ञानमभ्यासात् ज्ञानाद्ध्यानं विशिष्यते ध्यानात्कर्मफलत्यागस्त्यागाच्छांतिरनं
तरं १२ अद्वेष्टा सर्वभूतानां मैत्रः करुण एव च निर्ममो निरहंकारः समदुःखसुखः क्षमी १३
संतुष्टः सततं योगी यतात्मा दृढनिश्चयः मय्यर्पितमनोबुद्धिर्यो मद्भक्तः स मे प्रियः १४
यस्मान्नोद्विजते लोको लोकान्नोद्विजते च यः हर्षामर्षभयोद्वेगैर्मुक्तो यः स च मे प्रियः १५

वान्यैः सह समे सुखदुःखे यस्य सः क्षमी क्षमावान् १३ सततं लाभेऽलाभे च संतुष्टः प्रसन्नचित्तः योगी अप्रमत्तः यतात्मा संयतस्वभावः
दृढो मद्विषयो निश्चयो यस्य मय्यर्पिते मनोबुद्धी येन एवंभूतो यो मद्भक्तः स मे प्रियः १४ किंच यस्मादिति यस्मात्सकाशाल्लोको जनो नोद्विजते
भयशंकया न क्षोभं प्राप्नोति यश्च लोकान्नोद्विजते यश्च स्वाभाविकैर्हर्षादिभिर्मुक्तः तत्र हर्षः स्वस्येष्टार्थलाभे उत्साहः अमर्षः परस्य लाभेऽस
हनत्वं भयं त्रासः उद्वेगो भयादिनिमित्तश्चित्तक्षोभः एतैर्विमुक्तो यो मद्भक्तः स मे प्रियः १५ श्रीनर्मदादेव्यै नमः श्रीगोपालकृष्णः ७

भ०गी०टी०

६५

किंचअनपेक्ष इति अनपेक्षः यदृच्छोपस्थितेप्यर्थे निस्पृहः शुचिर्बाह्याभ्यंतरशौचसंपन्नः दक्षोऽनलसः उदासीनः पक्षपातरहितः गतव्यथः व्याधिशून्यः सर्वान् दृष्टादृष्टार्थानारंभान् उद्यमान् परित्यक्तुं शीलं यस्य सः एवंभूतः सन् यो मद्भक्तः स मे प्रियः १६ किंच यो नेति प्रियं प्राप्य यो न हृष्यति अप्रियं प्राप्य यो न द्वेष्टि इष्टार्थनाशे सति यो न शोचति अप्राप्तमर्थं न कांक्षति शुभाशुभे पुण्यपापे परित्यक्तुं शीलं यस्य एवंभूतो भक्त्या यो मद्भक्तिमान् स मे प्रियः १७ किंच सम इति शत्रौ च मित्रे च समः एकरूपः मानापमानयोरपि तथा स एव हर्षविषादशून्य इत्यर्थः शीतोष्ण

अनपेक्षः शुचिर्दक्ष उदासीनो गतव्यथः सर्वारंभपरित्यागी यो मद्भक्तः स मे प्रियः १६ यो न हृष्यति न द्वेष्टि न शोचति न कांक्षति शुभाशुभपरित्यागी भक्तिमान्यः स मे प्रियः १७ समः शत्रौ च मित्रे च तथा मानापमानयोः शीतोष्णसुखदुःखेषु समः संगविवर्जितः १८ तुल्यनिंदास्तुतिर्मौनी संतुष्टो येन केनचित् अनिकेतः स्थिरमतिर्भक्तिमान्मे प्रियो नरः १९ ये तु धर्म्यामृतमिदं यथोक्तं पर्युपासते श्रद्दधाना मत्परमा भक्तास्तेतीव मे प्रियाः २० इति श्रीमत्० भक्तियोगो नाम द्वादशोऽध्यायः १२

सुखदुःखेषु समः संगविवर्जितः क्वचिदप्यनासक्तः १८ तुल्येति तुल्या निंदास्तुतिश्च यस्य मौनी संयतवाक् येन केनचित् यथालब्धेन संतुष्टः अनिकेतो नियतवासशून्यः स्थिरमतिर्व्यवस्थितचित्तः एवंभूतो भक्तिमान् मे प्रियो नरः १९ उक्तं धर्मजातमुपसंहरति ये त्विति यथोक्तं उक्तप्रकारं धर्मं एवामृतं अमृतत्वसाधनत्वात् धर्म्यामृतमिदमिति केचित् पठंति तत् ये उपासते अनुतिष्ठंति श्रद्धां कुर्वंतो मत्परमाश्च संतो मद्भक्तास्तेतीव मे प्रियाः
दुःखमव्यक्तवर्त्मैतन्वदुविभ्रमतो बुधः सुखं सगुणपादांभोजं भक्तिमान् सत्पथा भजेत् ५ इति श्रीभगवद्गीताटीकायां सुबोधिन्यां द्वादशोऽध्यायः १२

श्रीः

६५

भक्तानामहं समुद्धर्त्ता संसारादित्यवादि यत् त्रयोदशेऽथ तत्सिद्ध्यै तत्त्वज्ञानमुदीर्यते तेषामहं समुद्धर्त्ता मृत्युसंसारसागरात् भवामीति पूर्वं प्रतिज्ञातं न चात्मज्ञा-
नं विना संसारादुद्धरणं संभवतीति तत्त्वज्ञानोपदेशार्थं प्रकृतिपुरुषविवेकाध्याय आरभ्यते तत्र यत्सप्तमेऽध्यायेऽपरा च परा चेति प्रकृतिद्वयमुक्तं तयोरविवेका-
ज्जीवभावमापन्नस्य चिदंशस्यायं संसारः याभ्यां च जीवभोगार्थमीश्वरः सृष्ट्यादिषु प्रवर्त्तते तदेव प्रकृतिद्वयं क्षेत्रक्षेत्रज्ञशब्दवाच्यं परस्परं विविक्तं तन्निरूपयि-
ष्यन् श्रीभगवानुवाच १ इदमिति इदं भोगायतनं शरीरं क्षेत्रमित्यभिधीयते संसारस्य प्ररोहभूत्वात् (भूमि) एतद्यो वेत्ति अहं ममेति मन्यते तं क्षेत्रज्ञं प्राहुः ऋषी

(श्लोकोयं क्षेपकः)

अर्जुन उवाच प्रकृतिं पुरुषं चैव क्षेत्रं क्षेत्रज्ञमेव च एतद्वेदितुमिच्छामि ज्ञानं ज्ञेयं च केशव १ श्रीभगवानुवाच
इदं शरीरं कौन्तेय क्षेत्रमित्यभिधीयते एतद्यो वेत्ति तं प्राहुः क्षेत्रज्ञ इति तद्विदः २ क्षेत्रज्ञं चापि मां विद्धि सर्व-
क्षेत्रेषु भारत क्षेत्रक्षेत्रयोर्ज्ञानं (ज्ञ) यत्तज्ज्ञानं मतं मम ३ श्रीगोपालकृष्णाय नमः श्रीनर्मदादेव्यै नमः ८

वलवत्तत्फलभोक्तृत्वात् तद्विदः क्षेत्रक्षेत्रयोर्विवेकज्ञाः (ज्ञ) २ तदेवं संसारिस्वरूपमुक्तं इदानीं तस्यैव पारमार्थिकमसंसारिस्वरूपमाह क्षेत्रज्ञमिति तं च क्षेत्र-
ज्ञं असंसारिणं वस्तुतः सर्वक्षेत्रेष्वनुगतं मामेव विद्धि तत्त्वमसीतिश्रुत्या लक्षितेन चिदंशेन मद्रूपस्योक्तत्वात् आदरार्थमेतज्ज्ञानं स्तौति क्षेत्रक्षेत्रज्ञयोर्य-
देवं वैलक्षण्येन ज्ञानं तदेव मोक्षहेतुत्वान्मम ज्ञानं मतं अन्यत्तु वृथापाण्डित्यं बंधहेतुत्वात् इत्यर्थः तदुक्तं तत्कर्म यन्न बंधाय सा विद्या या विमुक्तये ।।
आयासाय परं कर्म विद्यान्या शिल्पनैपुणमिति ३ ५ श्रीपार्वतीपरमेश्वराभ्यां नमः ८ ॐ नमो भगवते वासुदेवाय ८ श्रीनर्मदादेव्यै नमः ८

श्चैतुर्विंशतिभेदैर्भिन्ना प्रकृतिः क्षेत्रमित्यभिप्रेतं तथापि देहरूपेण परिणतायामेव तस्यामहंभावेनाविवेकः स्फुट इति तद्विवेकार्थमिदं शरीरं क्षेत्रमित्या
युक्तं तदेतत्प्रपंचयिष्यन्प्रतिजानीते तत्क्षेत्रमिति यदुक्तं मया क्षेत्रं तत्क्षेत्रं यत् स्वरूपतो जडं दृश्यादिस्वभावं यादृक्च इच्छादिधर्मकं यद्विकारि यैरि
न्द्रियादिविकारैर्युक्तं यतश्च प्रकृतिपुरुषसंयोगाद्भवति यदिति यैः स्थावरजंगमादिभेदैर्भिन्नमित्यर्थः स च सर्वक्षेत्रज्ञो यः स्वरूपतः यत्प्रभावश्च अ
चिंत्यैश्वर्ययोगेन यैः प्रभावैः संपन्नः तत्सर्वं संक्षेपतो मत्तः शृणु ॥ ४ ॥ केर्विस्तरेणोक्तस्यायं संक्षेप इत्यपेक्षायामाह ऋषिभिरिति वसिष्ठादिभिः यो
गशास्त्रेषु ध्यानधारणादिविषयत्वेन वैराजादिरूपेण बहुधा गीतं निरूपितं विविधैश्च नित्यनैमित्तिककाम्यविषयैः छंदोभि र्वेदैः नानाप्रजनीयदेवता
दिरूपेण गीतं ब्रह्मणः सूत्रैः पदैश्च ब्रह्मसूच्यते सूच्यते एभिरिति ब्रह्मसूत्राणि यतो वा इमानि भूतानि जायंते इत्यादीनि तटस्थलक्षणपराणि उपनिष

तत्क्षेत्रं यच्च यादृक्च यद्विकारि यतश्च यत् । स च यो यत्प्रभावश्च तत्समासेन मे शृणु ॥ ४ ॥
ऋषिभिर्बहुधा गीतं छंदोभिर्विविधैः पृथक् । ब्रह्मसूत्रपदैश्चैव हेतुमद्भिर्विनिश्चितैः ॥

द्वाक्यानि तथा च ब्रह्म पद्यते गम्यते साक्षात् ज्ञायते एभिरिति पदानि स्वरूपलक्षणपराणि सत्यं ज्ञानमनंतं ब्रह्मेत्यादीनि तैश्च बहुधा गीतं हेतुमद्भिः स
देव सौम्येदमग्र आसीत् कथमसतः सज्जायेत इति तथा को ह्येवान्यात्कः प्राण्यात् यदेष आकाश आनंदो न स्यात् एष ह्येवानंदयति इत्यादियुक्तिमद्भिः अन्या
त् अपानचेष्टां कः कुर्यात् प्राणयात् प्राणानां व्यापारं को वा कुर्यात् इति श्रुतिपदयोरर्थः विनिश्चितैः उपक्रमोपसंहारैकवाक्यतया असंदिग्धार्थप्रतिपादकैरि
त्यर्थः तदेवमेतैर्विस्तरेणोक्तं इदं संक्षेपतः तुभ्यं कथयिष्यामि शृणु इत्यर्थः यद्वा अथातो ब्रह्मजिज्ञासा इत्यादि ब्रह्मसूत्राणि सूच्यते तान्येव ब्रह्म प
द्यते निश्चीयते एभिरिति पदानि तैर्हेतुमद्भिर्युक्तितैः नानाशब्दैः आनंदमयोऽभ्यासादित्यादिभिर्युक्तिमद्भिर्विनिश्चितार्थैः शेषं समानम् ॥

तत्रक्षेत्रस्वरूपमाह महाभूतानीति द्वाभ्यां महाभूतानि भूम्यादीनि अहंकारस्तत्कारणभूतः बुद्धिर्विज्ञानात्मकं महत्तत्वं अव्यक्तं मूलप्रकृतिः इं
द्रियाणि बाह्यानि दश एकं च मनः इंद्रियगोचराश्च पंचतन्मात्रारूपा एव शब्दादयः आकाशादिष्वेव स्थूलतया व्यक्ताः संतः इंद्रियविषयाः पंच
न देवं चतुर्विंशतितत्वान्युक्तानि इच्छादयः प्रसिद्धाः संघातः शरीरं चेतना ज्ञानात्मिका मनोवृत्तिः धृतिर्धैर्यं एते इच्छादयो हृदयत्वान्मनोधर्माः अपि
तु मनोधर्माः अतः क्षेत्रांतःपातिन एव उपलक्षणं चैतत् संकल्पादीनां तथाच श्रुतिः कामः संकल्पो विचिकित्सा श्रद्धाश्रद्धा धृतिरधृतिर्भीरित्येतत्सर्वं म
न एवेति अनेन च यादृगिति प्रतिज्ञाताः क्षेत्रधर्मा दर्शिताः एतत्क्षेत्रं सविकारमिं/द्रियादिविकारसहितं संक्षेपेण तुभ्यं मयोक्तमिति क्षेत्रोपसंहारः ७

(margin: र्ह्रीर्धी)

६

महाभूतान्यहंकारो बुद्धिरव्यक्तमेव च इंद्रियाणि दशैकं च पंच चेंद्रियगोचराः
इच्छा द्वेषः सुखं दुःखं संघातश्चेतना धृतिः एतत्क्षेत्रं समासेन सविकारमुदाहृतं
अमानित्वमदंभित्वमहिंसा क्षांतिरार्जवं आचार्योपासनं शौचं स्थैर्यमात्मविनिग्रहः ८

अमानित्वं

इदानीमुक्तलक्षणात्क्षेत्राद्विविक्ततया ज्ञेयं पुरुषं क्षेत्रज्ञं विस्तरेण वर्णयिष्यन् तत्ज्ञानसाधनान्याह अमानित्वमिति पंचभिः स्वगुणश्लाघाराहित्यं
अदंभित्वं दंभराहित्यं अहिंसा परपीडावर्जनं क्षांतिः सहिष्णुत्वं आर्जवं अवक्रता आचार्योपासनं सद्गुरुसेवा शौचं बाह्यमाभ्यंतरं च तत्र बाह्यं मृज्ज
लादिना अभ्यंतरं च रागादिमलक्षालनं तथाच स्मृतिः शौचं च द्विविधं प्रोक्तं बाह्यमभ्यंतरं तथा मृज्जलाभ्यां स्मृतं बाह्यं भावशुद्धिस्तथांतरं स्थै
र्यं सन्मार्गे प्रवृत्तस्य तदेकनिष्ठता आत्मविनिग्रहः शरीरसंयमः एतत्ज्ञानं प्रोक्तमिति पंचमेनान्वयः ८ ५ श्रीगोपालकृष्णाय नमः

मिति

म०गी०टी०

९७

किंच इंद्रियार्थेष्विति जन्मादिदुःखदोषयोर्दर्शनं पुनःपुनरालोचनं दुःखरूपस्य दोषस्यानुदर्शनमिति वा स्पष्टमन्यत् ९ किंच असक्तिरिति असक्तिः पुत्रादिपदार्थेषु प्रीतित्यागः अनभिष्वंगः पुत्रादीनां सुखेन दुःखेन वा अहमेव सुखी दुःखी चेत्यध्यासातिरेकाभावः इष्टानिष्टोपपत्तिषु नित्यं सर्वदा समचित्तत्वं १० किंच मयि चेति मयि परमेश्वरे अनन्ययोगेन सर्वोत्तमदृष्ट्या अव्यभिचारिणी एकांतभक्तिः विविक्तः शुद्धः चित्तप्रसादकरः तं देशं सेवितुं शीलं यस्य तस्य भावस्तत्त्वं प्राकृतानां जनानां संसदि सभायामरतिः तुष्ट्यभावः ११ किंच अध्यात्मेति आत्मानमधिकृ

इंद्रियार्थेषु वैराग्यमनहंकार एव च जन्ममृत्युजराव्याधिदुःखदोषानुदर्शनम् ९
असक्तिरनभिष्वंगः पुत्रदारगृहादिषु नित्यं च समचित्तत्वमिष्टानिष्टोपपत्तिषु १०
मयि चानन्ययोगेन भक्तिरव्यभिचारिणी विविक्तदेशसेवित्वमरतिर्जनसंसदि ११
अध्यात्मज्ञाननित्यत्वं तत्त्वज्ञानार्थदर्शनं एतज्ज्ञानमिति प्रोक्तमज्ञानं यदतोऽन्यथा १२

त्य वर्तमानं ज्ञानं अध्यात्मज्ञानं तस्मिन् नित्यत्वं नित्यभावः नित्यं पूर्वं पदार्थेषु बुद्धिनिष्ठत्वमिति भावः तत्त्वज्ञानस्यार्थः प्रयोजनं मोक्षः तस्य दर्शनं मोक्षस्य सर्वोत्कृष्टतालोचनमित्यर्थः एतत् अमानित्वमदंभित्वमित्यादिविंशतिसंख्याकं यदुक्तं एतज्ज्ञानमिति प्रोक्तं ज्ञानसाधनत्वात् अतोऽन्यथाऽस्माद्विपरीतं मानित्वदंभित्वादि यच्च देतद्ज्ञानं प्रोक्तं वशिष्ठादिभिर्ज्ञानविरोधीत्वतः सर्वथा त्याज्यमित्यर्थः १२ श्रीरामचंद्रायनमः

श्रीः

९७

एभिः साधनैर्यज्ज्ञेयं तदाह ज्ञेयमिति [बुद्धिः] यत्तज्ज्ञेयं तत्प्रवक्ष्यामि श्रोतुरादरसिद्धये ज्ञानफलं दर्शयति यद्वक्ष्यमाणं ज्ञात्वा अमृतं मोक्षं प्राप्नोति किं तत् अनादिमत् आदिमन्न भवतीत्यनादिमत् परं निरतिशयं ब्रह्म अनादिरित्येतावतैव बहुव्रीहिणा अनादित्वे सिद्धेपि मतुपः प्रयोगश्छांदसः यद्वा अनादीति मत्परमिति च पदद्वयं मम विष्णोः परं निर्विशेषं रूपं ब्रह्मेत्यर्थः तदेवाह न सत् तन्नासदुच्यते विधिमुखेन प्रमाणस्य विषयः सच्छब्देनोच्यते निषेधस्य विषयस्त्वसच्छब्देनोच्यते इदं तु तदुभयविलक्षणं अविषयत्वादित्यर्थः १३ नन्वेवं ब्रह्मणः सदसद्विलक्षणत्वे सति सर्वं खल्विदं ब्रह्म ब्रह्मैवेदं सर्वमित्यादिश्रुतिभिर्विरुध्यते इत्याशंक्य परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया चेत्यादिश्रुतिप्रसिद्धया अचिंत्य

ज्ञेयं यत्तत्प्रवक्ष्यामि यज्ज्ञात्वामृतमश्नुते अनादिमत्परं ब्रह्म न सत्तन्नासदुच्यते १३ सर्वतःपाणिपादं तत्सर्वतोक्षिशिरोमुखं सर्वतःश्रुतिमल्लोके सर्वमावृत्य तिष्ठति १४ सर्वेंद्रियगुणाभासं सर्वेंद्रियविवर्जितं असक्तं सर्वभृच्चैव निर्गुणं गुणभोक्तृ च १५

शक्त्या सर्वात्मतां तस्य दर्शयन्नाह सर्वत इति पंचभिः सर्वतः पाणयः पादाश्च यस्य तत् सर्वतोक्षीणि शिरांसि मुखानि यस्य तत् सर्वतः श्रुतिमत् श्रवणेंद्रिययुक्तं सत् लोके सर्वमावृत्य व्याप्य तिष्ठति सर्वप्राणिवृत्तिभिः पाण्यादिभिरुपाधिभिः सर्वव्यवहारास्पदत्वेन तिष्ठतीत्यर्थः १४ किंच सर्वेंद्रियेति सर्वेषां चक्षुरादीनां इंद्रियाणां गुणेषु रूपाद्याकारासु वृत्तिषु तत्तदाकारेणाभासत इति तथा सर्वाणींद्रियाणि गुणांश्च तत्तद्विषयानाभासयतीति वा सर्वैरिंद्रियैर्विवर्जितं च तथा च श्रुतिः अपाणिपादो जवनो ग्रहीता पश्यत्यचक्षुः स शृणोत्यकर्णः इत्यादि असक्तं संगशून्यं तथापि सर्वं बिभर्तीति सर्वस्याधारभूतं तदेव निर्गुणं सत्वादिगुणरहितं गुणानां सत्वादीनां भोक्तृ च पालकं १५ श्रीगोपालकृष्णाय नमः ६७

किंच बहिरिति भूतानां चराचराणां स्वकार्याणां बहिरभ्यंतरश्च तदेव सुवर्णमिव कटककुंडलादीनां अचरं स्थावरं चरं जंगमं भूतजातं तदेव कार णात्मकत्वात् कार्यस्य एवमपि सूक्ष्मत्वाद्रूपादिहीनत्वात् तदविज्ञेयं इदं तदिति स्पष्टज्ञानार्हं न भवति अत एव अविदुषां योजनलक्षांतरितमिव दूरस्थं सविकारायाः प्रकृतेः परत्वात् विदुषां पुनः प्रत्यगात्मत्वात् अंतिके च तत् नित्यं संनिहितं तथा च मंत्रः तदेजति तन्नैजति तद्दूरे तद्वंतिके त दंतरस्य सर्वस्य तत्सर्वस्यास्य बाह्यत इति एजति चलति नैजति न चलति तत् अंतिक इति छेदः १५ अविभक्तमिति भूतेषु स्थावरजंगमात्म केषु अविभक्तं कारणात्मना अभिन्नं कार्यात्मना विभक्तं भिन्नमिवावस्थितं च तत् ज्ञेयं भूतानां भर्तृ च पोषकं स्थितिकाले प्रलयकाले ग्रसि

बहिरंतश्च भूतानामचरं चरमेव च सूक्ष्मत्वात्तदविज्ञेयं दूरस्थं चांतिके च तत् १५ अविभक्तं च भूतेषु विभक्तमिव च स्थितं भू तभर्तृ च तत् ज्ञेयं ग्रसिष्णु प्रभविष्णु च १६ ज्योतिषामपि तज्ज्योतिस्तमसः परमुच्यते ज्ञानं ज्ञेयं ज्ञानगम्यं हृदि सर्वस्य धिष्ठितं १८

ष्णु ग्रसनशीलं सृष्टिकाले च प्रभविष्णु नानाकार्यात्मना प्रभवनशीलं १६ किंच ज्योतिषामपि ज्योतिषां चंद्रादित्यानामपि ज्योतिः प्रकाशकं त त् येन सूर्यस्तपति तेजसेद्धः न तत्र सूर्यो भाति न चंद्रतारकं नेमा विद्युतो भांति कुतोयमग्निः तमेव भांतमनुभाति सर्वं तस्य भासा सर्वमिदं भाती वि त्यादि श्रुतेः अत एव तमसोऽज्ञानात् परं तेनासंस्पृष्टमुच्यते आदित्यवर्णं तमसः परस्तादित्यादि श्रुतिभिः ज्ञानं च तदेव बुद्धिवृत्तावभिव्यक्तं तदेव रूपाद्याकारेण ज्ञेयं च ज्ञानेन गम्यं च अमानित्वमदंभित्वमित्यादिलक्षणेन पूर्वोक्तेन ज्ञानसाधनेन प्राप्यमित्यर्थः ज्ञानगम्यं विशिनष्टि सर्वस्य प्रा णिमात्रस्य हृदि विष्ठितं विशेषेण प्रच्युतस्वरूपेण नियंतृतया स्थितं धिष्ठितमिति पाठे अधिष्ठाय स्थितमित्यर्थः १८ ७ श्रीनर्मदादेव्यै नमः

श्री:
९८

उक्तं क्षेत्रादिकमधिकारिफलसहितमुपसंहरति इतीति इत्येवं क्षेत्रं महाभूतादिधृत्यन्तं तथा ज्ञानं च अमानित्वादितत्त्वज्ञानार्थदर्शनान्तं ज्ञेयं च अनादिमत्परं ब्रह्मेत्यादिविविक्तमत्यन्तं विविक्तत्वादिभिर्विस्तरेणोक्तं एतच्च पूर्वाध्यायोक्तलक्षणो मद्भक्तो विज्ञाय मद्भावाय ब्रह्मत्वाय उपपद्यते योग्यो भवतीत्यर्थः १८ तदेवं तत्क्षेत्रं षड्ध्यायादव्यक्तं चेत्येतावत्प्रपंचितं इदानीं तु यद्धिकारि यतश्च यत् स च यो यत्प्रभावश्च इति पूर्वं प्रतिज्ञातमेव प्रकृतिपुरुषयोः संसारहेतुत्वकथनेन प्रपंचयति प्रकृतिमिति पंचभिः तत्र प्रकृतिपुरुषयोरादिमत्वेन तयोरपि प्रकृत्यन्तरेण भाव्यमित्यनवस्थापत्तिः स्यात् अतस्तावुभावनादी विद्धि अनादेरीश्वरस्य शक्तित्वात्प्रकृतिरनादिः पुरुषोपि तदंशत्वादनादिरेव अत एव परमेश्वरस्य तच्छक्तीनां चानादित्वं नित्यत्वं च श्रीमच्छंकरभ

इति क्षेत्रं तथा ज्ञानं ज्ञेयं चोक्तं समासतः मद्भक्त एतद्विज्ञाय मद्भावायोपपद्यते १८ प्रकृतिं पुरुषं चैव विद्ध्यनादी उभावपि विकारांश्च गुणांश्चैव विद्धि प्रकृतिसंभवान् १९ कार्यकारणकर्तृत्वे हेतुः प्रकृतिरुच्यते पुरुषः सुखदुःखानां भोक्तृत्वे हेतुरुच्यते २०

गवद्भाष्यकृद्भिरिति प्रबंधेनोपपादितमिति नास्माभिः प्रतन्यते विकारांश्च देहेंद्रियादीन् गुणांश्च गुणपरिणामान् सुखदुःखमोहादीन् प्रकृतेः संभवान् विद्धि १९ विकाराणां प्रकृतिसंभवत्वं दर्शयन् पुरुषस्य संसारहेतुत्वं दर्शयति कार्यकारणेति कार्यं शरीरं कारणानि सुखदुःखादिसाधनानींद्रियाणि तेषां कर्तृत्वे तदाकारपरिणामे प्रकृतिर्हेतुरुच्यते कापिलादिभिः पुरुषो जीवस्तु तत्कृतसुखदुःखानां भोक्तृत्वे हेतुरुच्यते अयं भावः यद्यप्यचेतनायाः प्रकृतेः स्वतः कर्तृत्वं न संभवति तथा पुरुषस्याविकारिणो भोक्तृत्वं न संभवति तथापि कर्तृत्वं नाम क्रियानिर्वर्तकत्वं तत्तु चेतनस्याधिष्ठानात् संभवति यथा वह्नेरूर्ध्वज्वलनं वायोस्तिर्यग्गमनं वत्सादृष्टवशात् स्तन्यपयसः क्षरणमिति अतः पुरुषसंनिधानात् प्रकृतेः कर्तृत्वमुच्यते भोक्तृत्वं च सुखदुःखसंवेदनं तच्चेतनधर्म एव इति प्रकृतिसंनिधानात् पुरुषस्य भोक्तृत्वमुच्यत इति २०

भ०गी०टी०
६८

तथाप्यविकारिणो जन्मरहितस्य च भोक्तृत्वं कथमित्यत आह पुरुष इति हि यस्मात्प्रकृतिस्थः तत्कार्ये देहे तादात्म्येन स्थितः पुरुषः अतस्तज्जनितान्सुखादीन्भुंक्ते अस्य पुरुषस्य सतीषु देवादियोनिषु असतीषु तिर्यगादियोनिषु यानि जन्मानि तेषु गुणसंगः शुभाशुभकर्मकारिभिरिंद्रियैः संगः कारणमित्यर्थः २२ तदनेन प्रकारेण प्रकृत्यविवेकात्पुरुषस्य संसारः न तु स्वरूपत इत्याशयेन तस्य स्वरूपमाह उपद्रष्टेति अस्मिन्प्रकृतिकार्ये देहे वर्त्तमानोपि पुरुषः परः भिन्न एव न तद्गुणैर्युज्यत इत्यर्थः तत्र हेतवः यस्मादुपद्रष्टा पृथग्भूत एव समीपे स्थित्वा द्रष्टा साक्षीत्यर्थः त

पुरुषः प्रकृतिस्थो हि भुंक्ते प्रकृतिजान्गुणान् कारणं गुणसंगोस्य सदसद्योनिजन्मसु २२
उपद्रष्टानुमंता च भर्त्ता भोक्ता महेश्वरः परमात्मेति चाप्युक्तो देहेस्मिन्पुरुषः परः २३
य एवं वेत्ति पुरुषं प्रकृतिं च गुणैः सह सर्वथा वर्त्तमानोपि न स भूयोभिजायते २४

थानुमंता अनुमोदितेन संनिधानमात्रेणानुग्राहकः साक्षी चेता केवलो निर्गुणश्च इत्यादिश्रुतेः तथा ऐश्वरेण रूपेण भर्त्ता विधारक इति चोक्तः भोक्ता पालक इति च महांश्चासावीश्वरश्च ब्रह्मादीनामधिपतिरिति च परमात्मा अंतर्यामी चोक्तः श्रुत्या तथा च श्रुतिः एष भूताधिपतिरेष लोकेश्वर एष लोकपाल इत्यादि २३ एवं प्रकृतिपुरुषविवेकज्ञानिनं स्तौति य एवमिति एवमुपद्रष्टृत्वादिरूपेण पुरुषं यो वेत्ति प्रकृतिं च गुणैः सुखदुःखादिपरिणामैः सहितां यो वेत्ति स पुरुषः सर्वथा विधिमभिलंघ्य वर्त्तमानोपि पुनर्नाभिजायते मुच्यत एवेत्यर्थः २४ ६७

श्रीः
६८

एवंभूतविविक्तात्मज्ञाने साधनविकल्पानाह ध्यानेनेति द्वाभ्यां ध्यानेन आत्माकारप्रत्ययावृत्त्या आत्मनि देहे आत्मना मनसा एनमात्मानं केचित्पश्यंति अन्ये तु सांख्येन प्रकृतिपुरुषवैलक्षण्यालोचनेन योगेनाष्टांगेनापरे अपरे च कर्मयोगेन पश्यंतीति सर्वत्रानुषंगः एतेषां च ध्याना दीनां यथायोग्यं क्रमसमुच्चये सत्यपि तत्तन्निष्ठाभेदाभिप्रायेण विकल्पोक्तिः २४ अतिमंदाधिकारिणां निस्तारोपायमाह अन्य इति अन्ये तु सांख्ययोगादिमार्गेण एवंभूतमुपद्रष्टृत्वादिलक्षणमात्मानं साक्षात्कर्तुमजानंतोऽन्येभ्य आचार्येभ्य उपदेशेन श्रुत्वा उपासते ध्यायंति तेच

ध्यानेनात्मनि पश्यंति केचिदात्मानमात्मना अन्ये सांख्येन योगेन कर्मयोगेन चापरे २५
अन्ये त्वेवमजानंतः श्रुत्वाऽन्येभ्य उपासते ते पि चातितरंत्येव मृत्युं श्रुतिपरायणाः २६
यावत्संजायते किंचित्सत्त्वं स्थावरजंगमं क्षेत्रक्षेत्रज्ञसंयोगात्तद्विद्धि भरतर्षभ २७
समं सर्वेषु भूतेषु तिष्ठंतं परमेश्वरं विनश्यत्स्वविनश्यंतं यः पश्यति स पश्यति २८

श्रद्धया उपदेशपरायणाः संतो मृत्युं संसारं शनैरतितरंत्येव २६ तत्र कर्मयोगस्य तत्तीयचतुर्थपंचमेषु प्रपंचितत्वात् ध्यानस्य योगस्य च षष्ठाष्टमयोः प्रपंचितत्वात् ध्यानादेश्च सांख्यविविक्तात्मविषयत्वात् सांख्यमेव प्रपंचयन्नाह यावदित्यादि यावत्समाप्तिः यावत्किंचित्वस्तुमात्रं सत्त्वमुत्पद्यते तत्सर्वं क्षेत्रक्षेत्रज्ञयोः संयोगात् अविवेककृतात् तादात्म्याध्यासाद्भवतीति जानीहि २७ अविवेककृतं संसारोद्भवमुक्त्वा तन्निवृत्तये विविक्तात्मविषयं सम्यक्दर्शनमाह सममिति स्थावरजंगमात्मकेषु भूतेषु निर्विशेषं सद्रूपेण समं यथा भवत्येवं तिष्ठंतमात्मानं यः पश्यति अत एवैतेषु विनश्यत्स्वविनश्यंतं यः पश्यति स एव सम्यक्पश्यति २८:

भ०गी०टी०
७०

कुत इत्यत आह सममिति सर्वभूतमात्रे समं सम्यगप्रच्युतस्वरूपेणावस्थितं परमात्मानं पश्यन् हि यस्मात् आत्मना स्वेनैवात्मानं न हिन
स्ति अविद्यया सच्चिदानंदरूपमात्मानं तिरस्कृत्य न विनाशयति नततश्च परां गतिं मोक्षं प्राप्नोति यस्त्वेवं न पश्यति स हि देहात्मदर्शी देहेन
सहात्मानं हि नस्ति तथा च श्रुतिः असुर्या नाम ते लोका अंधेन तमसावृताः तांस्ते प्रेत्याभिगच्छंति ये के चात्महनो जनाः इति २९ ननु शुभाशुभ
कर्मकर्तृत्वेन वैषम्ये दृश्यमाने कथमात्मनः समत्वमित्याशंक्याह प्रकृत्यैवेति प्रकृत्यैव देहेंद्रियाकारेण परिणतया सर्वशः सर्वप्रकारैः क्रियमा

समं पश्यन् हि सर्वत्र समवस्थितमीश्वरं न हिनस्त्यात्मनात्मानं ततो याति परां गतिं २९
प्रकृत्यैव च कर्माणि क्रियमाणानि सर्वशः यः पश्यति तथात्मानमकर्तारं स पश्यति ३०
यदा भूतपृथग्भावमेकस्थमनुपश्यति तत एव च विस्तारं ब्रह्म संपद्यते तदा ७७ ३१

णानि कर्माणि यः पश्यति तथात्मानं च अकर्तारं देहाभिमानेनैवात्मनः कर्तृत्वं न स्वतः इत्येवं यः पश्यति स एव सम्यक् पश्यति नान्य इत्यर्थः ३०
इदानीं तु भूतानां प्रकृतितादात्म्यात्त्वेनाभेदात् भूतभेदकृतमप्यात्मनो भेदमपश्यन् ब्रह्मत्वमुपैतीत्याह यदेति यदा भूतानां स्थावरजंगमानां पृथग्भावं भे
दं पृथक्त्वं एकस्थं एकस्यामेव ईश्वरशक्तिरूपायां प्रकृतौ स्थितं प्रलये अनुपश्यति आलोचयति तत एव च तस्या एव प्रकृतेः सकाशात् भूतानां विस्तारं सृष्टि
समये अनुपश्यति तदा प्रकृतितादात्म्येन भूतानामप्यभेदं पश्यन् परिपूर्णं ब्रह्म संपद्यते ब्रह्मैव भवतीत्यर्थः ३१ श्रीगोपालकृष्णाय नमः ७७

श्रीः
७०

तथापि परमेश्वरस्य संसारावस्थायां देहसंबंधनिमित्तैः कर्मभिस्तत्फलैश्च सुखदुःखादिभिश्च वैषम्यं दुःपरिहरमिति कुतः समदर्शनं तत्राह अना
दित्वादिति उत्पत्तिमत्तदेव हि व्येति विनाशमेति यच्च गुणवद्वस्तु तस्य गुणनाशे व्ययो भवति अयं तु परमात्मा अनादिर्निर्गुणश्च अतोऽव्ययः अवि
कारीत्यर्थः तस्मात् शरीरे स्थितोऽपि किंचिन्न करोति न च कर्मफलैर्लिप्यते ३२ अत्र दृष्टांतमाह यथेति यथा सर्वत्र पंकादिष्वपि स्थितमाकाशं सौक्ष्म्याद
संगत्वात् पंकादिभिर्नोपलिप्यते तथा सर्वत्र उत्तमअधमे वा देहेऽवस्थितोप्यात्मा नोपलिप्यते देहिकैर्गुणदोषैर्न युज्यत इत्यर्थः ३३ असंगत्वाल्लेपो नास्ति इ

अनादित्वान्निर्गुणत्वात्परमात्मायमव्ययः शरीरस्थोऽपि कौंतेय न करोति न लिप्यते ३२ यथा सर्वगतं सौक्ष्म्यादाकाशं
नोपलिप्यते सर्वत्रावस्थितो देहे तथात्मा नोपलिप्यते ३३ यथा प्रकाशयत्येकः कृत्स्नं लोकमिमं रविः क्षेत्रं क्षेत्री तथा कृ
त्स्नं प्रकाशयति भारत ३४ क्षेत्रक्षेत्रज्ञयोरेवमंतरं ज्ञानचक्षुषा भूतप्रकृतिमोक्षं च ये विदुर्यांति ते परं ३५ ॐ
तत्सदिति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे क्षेत्रक्षेत्रज्ञनिर्देशयोगो नाम त्रयोदशोऽध्यायः १३ ॐ

स्याकाशस्य दृष्टांतेनोक्तं प्रकाशकत्वाच्च प्रकाश्यधर्मैर्न युज्यत इति रविदृष्टांतेनाह यथेति स्पष्टार्थः ३४ अध्यायार्थमुपसंहरति क्षेत्रक्षेत्रज्ञयोरिति
एवमुक्तप्रकारेण क्षेत्रक्षेत्रज्ञयोरंतरं भेदं विवेकज्ञानलक्षणेन चक्षुषा ये विदुः तथा चेयमुक्ता भूतानां प्रकृतिस्तस्याः सकाशान्मोक्षोपायं ध्या
नादिकं ये विदुः ते परं पदं यांति विविक्तौ येन तत्त्वेन मिश्रौ प्रकृतिपूरुषौ तं वंदे परमानंदं नंदनंदनमीश्वरं ३५ ॥ ॐ इति श्रीभगवद्गीता
टीकायां सुबोधिन्यां त्रयोदशोऽध्यायः १३ ॐ श्रीपुराणपुरुषोत्तमाय नमः ॥ श्रीगोपालकृष्णाय नमः ॥ श्रीनर्मदादेव्यै नमः ॥

भ॰गी॰टी॰
७१

पुंप्रकृत्योः स्वतंत्रत्वं वारयन्गुणसंगतः प्राह संसारवैचित्र्यं विस्तरेणचतुर्दशे यावत्संजायते किंचित्सत्वं स्थावरजंगमं क्षेत्रक्षेत्रज्ञसंयोगात्त
द्विद्धि भरतर्षभ इत्युक्तं सच क्षेत्रक्षेत्रज्ञयोः संयोगोऽनीश्वरसांख्यानामिव न स्वातंत्र्येण किंतु ईश्वरेच्छयैव इति कथनपूर्वकं कारणंगुणसंगो
स्य सदसद्योनिजन्मस्वित्यनेनोक्तं सत्वादिगुणकृतं संसारवैचित्र्यं प्रपंचयिष्यन् एवंभूतं वक्ष्यमाणमर्थं स्तौति श्रीभगवानुवाच परंभूय
इति द्वाभ्यां परं परमार्थनिष्ठं ज्ञायतेऽनेनेति ज्ञानं उपदेशं भूयोपि तुभ्यं प्रकर्षेण वक्ष्यामि किंभूतं ज्ञानानां तपः कर्मादिविषयाणां मध्ये उत्त
मं मोक्षहेतुत्वात् तदेवाह यत्ज्ञात्वा प्राप्य मुनयो मननशीलाः सर्वे इतो देहबंधनात् परांसिद्धिंप्राप्ताः १ किंच इदमिति इदं वक्ष्यमाणं ज्ञान

श्रीभगवानुवाच परंभूयः प्रवक्ष्यामि ज्ञानानां ज्ञानमुत्तमं यत्ज्ञात्वा मुनयः सर्वे परां सिद्धिमितो गताः १ इदं ज्ञानमुपाश्रित्य मम
साधर्म्यमागताः सर्गेपि नोपजायंते प्रलये न व्यथंति च २ मम योनिर्महद्ब्रह्म तस्मिन्गर्भं दधाम्यहं संभवः सर्वभूतानां ततो भवति भारत ३

मुपाश्रित्य इदं ज्ञानसाधनमनुष्ठाय मम साधर्म्यं मद्रूपत्वं प्राप्ताः संतः सर्गेपि ब्रह्मादिषूत्पद्यमानेष्वपि नोत्पद्यंते तथा प्रलयेपि न व्यथंति प्रलयदुः
खानि नानुभवंति पुनरावर्त्तन इत्यर्थः २ तदेवं प्रशंसया श्रोतारमभिमुखीकृत्य परमेश्वराधीनयोः प्रकृतिपुरुषयोः सर्वभूतोत्पत्तिं प्रति हेतु
त्वं न तु स्वतंत्रयोरितीमं विवक्षितमर्थं कथयति ममेति देशतः कालतश्चानवछिन्नत्वान्महत् बृंहणत्वाच्च स्वकार्याणां वृद्धिहेतुत्वात् ब्रह्म प्रकृ
तिरित्यर्थः तन्महद्ब्रह्म मम परमेश्वरस्य योनिर्गर्भाधानस्थानं तस्मिन्नहं गर्भं जगद्विस्तारहेतुं दधामि संदधामि निक्षिपामि प्रलये मयि ली
नं संतमविद्याकामकर्मानुशयवन्तं क्षेत्रज्ञं सृष्टिसमये भोग्येन क्षेत्रेण संयोजयामीत्यर्थः ततो गर्भाधानात् सर्वभूतानां संभव उत्पत्तिर्भवतीत्यर्थः

श्रीः
७१

भा

न केवलं सृष्ट्युपक्रमे एव मदधिष्ठिताभ्यां प्रकृतिपुरुषाभ्यामयं भूतोत्पत्तिप्रकारः अपि तु सर्वदैवेत्याह सर्वयोनिष्विति सर्वासु योनिषु मनुष्यादियोनिषु मूर्त्तयः स्थावरजंगमादिकाः उत्पद्यंते तासां मूर्तीनां महद्ब्रह्म प्रकृतिः योनिर्मातृस्थानीया अहं बीजप्रदः गर्भाधानादिकर्त्ता पिता ४ तदेवं परमेश्वराधीनाभ्यां प्रकृतिपुरुषाभ्यां सर्वभूतोत्पत्तिं निरूप्येदानीं प्रकृतिसंयोगेन पुरुषस्य संसारं प्रपंचयति सत्वमित्यादि चतुर्दशभिः सत्वं रजस्तम इत्येवं संज्ञकास्त्रयो गुणाः प्रकृतितः संभव उद्भवो येषां ते तथोक्ताः गुणसाम्यं प्रकृतिस्तस्याः सकाशात्पृथक्त्वेनाभिव्यक्ताः संतः प्रकृतिकार्ये देहे तादात्म्येन स्थितं देहिनं चिदंशं वस्तुतोऽव्ययं निर्विकारमेव संतं निबध्नंति स्वकार्यैः सुखदुःखमोहादिभिः संयोजयंतीत्यर्थः ५ तत्र सत्वस्य लक्ष-

सर्वयोनिषु कौंतेय मूर्त्तयः संभवंति याः तासां ब्रह्म महद्योनिरहं बीजप्रदः पिता ४ सत्वं रजस्तम इति गुणाः प्रकृतिसंभवाः निबध्नंति महाबाहो देहे देहिनमव्ययं ५ तत्र सत्वं निर्मलत्वात्प्रकाशकमनामयं सुखसंगेन बध्नाति ज्ञानसंगेन चानघ ६ रजो रागात्मकं विद्धि तृष्णासंगसमुद्भवं तन्निबध्नाति कौंतेय कर्मसंगेन देहिनं ७

णं बंधकत्वप्रकारमाह तत्रेति तत्र तेषां गुणानां मध्ये सत्वं निर्मलत्वात्स्वच्छत्वात्स्फटिकमणिरिव प्रकाशकं भास्वरं अनामयं च निरुपद्रवं शांतमित्यर्थः अतः शांतत्वात् स्वकार्येण सुखेन यः संगः तेन बध्नाति प्रकाशकत्वाच्च स्वकार्येण ज्ञानेन यः संगः तेन च बध्नाति हे अनघ निष्पाप सुखोऽहं सुखी ज्ञानी चेति मनोधर्मान् तद्धर्मिण्यात्मनि निक्षिप्य संयोजयतीत्यर्थः ६ रजसो लक्षणं बंधकत्वं चाह रजो रागेति रजः संज्ञकं गुणं रागात्मकं अनुरंजनरूपं विद्धि अत एव तृष्णासंगसमुद्भवं तृष्णा अप्राप्तेऽर्थेऽभिलाषः संगः प्राप्तेऽर्थे प्रीतिविशेषेण सक्तिः तयोस्तृष्णासंगयोः समुद्भवो यस्मात् तद्

तमसो लक्षणं बंधकत्वं चाह तमस्त्विति तमस्तु अज्ञानाज्जातं आवरणशक्तिप्रधानात् प्रकृत्यंशादुद्भूतं विद्धीत्यर्थः अतः सर्वेषां देहिनां मोहनं भ्रांतिज
नकं अतएव प्रमादेनालस्येन निद्रया च तत्तमो देहिनं निबध्नाति तत्र प्रमादोऽनवधानं आलस्यमनुद्यमः निद्रा चित्तस्यावसादः ८ सत्वादीनामेवं स्व
स्वकार्यकारणे सामर्थ्यातिशयमाह सत्वमिति सत्वं सुखे संजयति संश्लेषयति दुःखशोकादिकारणे सत्यपि सुखाभिमुखमेव देहिनं करोतीत्यर्थः
एवं सुखादिकारणे सत्यपि रजः कर्मण्येव संजयति तमस्तु महत्संगेनोत्पद्यमानमपि ज्ञानमावृत्याच्छाद्य प्रमादे संजयति महद्भिरुपदिश्यमानस्या

तमस्त्वज्ञानजं विद्धि मोहनं सर्वदेहिनां प्रमादालस्यनिद्राभिस्तन्निबध्नाति भारत ८ सत्वं सुखे संजयति रजः
कर्मणि भारत ज्ञानमावृत्य तु तमः प्रमादे संजयत्युत ९ रजस्तमश्चाभिभूय सत्वं भवति भारत रजः सत्वं
तमश्चैव तमः सत्वं रजस्तथा १० सर्वद्वारेषु देहेस्मिन्प्रकाश उपजायते ज्ञानं यदा तदा विद्याद्विवृद्धं सत्वमित्युत ११

र्थस्यानवधाने योजयति उतअपि आलस्यादावपि योजयतीत्यर्थः ९ तत्र हेतुमाह रजइति रजस्तमश्चेति उभे हूयमभिभूय तिरस्कृत्य सत्वं भवति अ
दृष्टवशादुद्भवति ततः स्वकार्ये सुखे ज्ञानादौ संजयतीत्यर्थः एवं रजोपि सत्वं तमश्च उभे हूयमभिभूयोद्भवति ततः स्वकार्ये तृष्णाकर्मादौ संजयति एवं तमो
पि सत्वं रजश्चाभिभूयोद्भवति ततश्च स्वकार्ये प्रमादालस्यादौ संजयतीत्यर्थः १० इदानीं सत्वादीनां वृद्धानां लिंगान्याह सर्वद्वारेष्विति त्रिभिः अस्मिन्नात्म
नि भोगायतने देहे सर्वेष्वपि द्वारेषु श्रोत्रादिषु यदा शब्दादिज्ञानात्मकः प्रकाश उत्पद्यते तदा अनेन प्रकाशलिंगेन सत्वं विवृद्धं विद्यात् जानीयात् उतशब्दात्सु

श्रीः
७२

किंच लोभ इति लोभः धनागमे बहुधा जायमानेपि पुनः पुनर्वर्द्धमानोऽभिलाषः प्रवृत्तिर्नित्यंकुर्व[illegible]तां कर्मणामारंभः गृहादिषु कर्म्मोद्यमः इदं कृत्वेदं करिष्यामीत्यादिसंकल्पविकल्पानुपरमः अशमः स्पृहा उच्चावचेषु दृष्टमात्रेषु वस्तुष्वितस्ततो जिघृक्षा रजसि प्रवृद्धे एतानि लिंगानि जायंते एतैर्लिंगैः रजोरूपस्य वृद्धिं विद्यादित्यर्थः १२ किंच अप्रकाश इति अप्रकाशो विवेकभ्रंशः अप्रवृत्तिरनुद्यमः प्रमादः कर्तव्यार्थानुसंधानराहित्यं मोहो मिथ्याभिनिवेशः तमसि प्रवृद्धे एतानि लिंगानि जायंते एतैस्तमोवृद्धिं जानीयात् १३ मरणसमयेपि वृद्धानां सत्वादीनां फलविशेषमाह यदेति द्वाभ्यां सत्वे प्रवृद्धे सति य

लोभः प्रवृत्तिरारंभः कर्मणामशमः स्पृहा रजस्येतानि जायन्ते विवृद्धे भरतर्षभ १२ अप्रकाशोऽप्रवृत्तिश्च प्रमादो मोह एव च तमस्येतानि जायंते विवृद्धे कुरुनंदन १३ यदा सत्वे प्रवृद्धे तु प्रलयं याति देहभृत् तदोत्तमविदां लोकानमलान्प्रतिपद्यते १४ रजसि प्रलयं गत्वा कर्मसंगिषु जायते तथा प्रलीनस्तमसि मूढयोनिषु जायते १५ कर्मणः सुकृतस्याहुः सात्विकं निर्मलं फलं रजसस्तु फलं दुःखमज्ञानं तमसः फलं १६

दा जीवो मृत्युं प्राप्नोति तदा उत्तमान् हिरण्यगर्भादीन् विदंति उपासत इति उत्तमविदः तेषां ये अमलाः प्रकाशमया लोकाः सुखोपभोगस्थानविशेषाः तान्प्रतिपद्यते प्राप्नोति १४ किंच रजसीति रजसि प्रवृद्धे सति कर्मासक्तेषु मनुष्येषु जायते तथा तमसि प्रवृद्धे सति प्रलीनो मृतो मूढयोनिषु पश्वादिषु जायते १५ इदानीं सत्वादीनां स्वानुरूपकर्मद्वारेण विचित्रफलहेतुत्वमाह कर्मण इति सुकृतस्य सात्विकस्य कर्मणः सात्विकं सत्वप्रधानं निर्मलं प्रकाशबहुलं सुखं फलमाहुः कपिलादयः रजस इति राजसस्य कर्मण इत्यर्थः कर्मफलकथनस्य प्रकृतत्वात् तस्य दुःखं फलमाहुः तमस इति तामसस्य कर्मण इत्यर्थः तस्याज्ञानं मूढत्वं फलमाहुः सात्विकादिकर्मलक्षणं च नियतं संगरहितमित्यादिनाग्रे वक्ष्यति १६

तत्रैव हेतुमाह सत्त्वादिति सत्त्वात् ज्ञानं संजायते अतः सात्त्विकस्य कर्मणः प्रकाशबहुलं सुखं फलं भवति रजसो लोभो जायते तस्य च दुःखहेतुत्वात् न
त्सर्वैकस्य कर्मणो दुःखं फलं भवति तमसस्तु प्रमादमोहौ ज्ञानाभावश्च भवति ततस्तामसस्य कर्मणोऽज्ञानप्रायं फलं भवतीति युक्तमेवेत्यर्थः १७ इदानीं सत्त्वा
दिवृत्तिशीलानां फलमाह ऊर्ध्वमिति सत्त्वस्थाः सत्त्ववृत्तिप्रधानाः ऊर्ध्वं गच्छन्ति सत्त्वोत्कर्षतारतम्यादुत्तरोत्तरशतगुणानन्दान् मनुष्यगन्धर्वपितृदेवादि
लोकान् सत्यलोकपर्यन्तान् प्राप्नुवन्तीत्यर्थः राजसास्तु तृष्णाद्याकुला मध्ये तिष्ठन्ति मनुष्यलोक एवोत्पद्यन्ते जघन्यो निकृष्टः तमोगुणः तस्य वृत्तिः प्रमा

सत्त्वात्संजायते ज्ञानं रजसो लोभ एव च प्रमादमोहौ तमसो भवतोऽज्ञानमेव च १७ ऊर्ध्वं गच्छन्ति सत्त्वस्था मध्ये ति
ष्ठन्ति राजसाः जघन्यगुणवृत्तिस्था अधो गच्छन्ति तामसाः १८ नान्यं गुणेभ्यः कर्तारं यदा द्रष्टानुपश्यति गुणेभ्यश्च
परं वेत्ति मद्भावं सोऽधिगच्छति १९ गुणानेतानतीत्य त्रीन्देही देहसमुद्भवान् जन्ममृत्युजरादुःखैर्विमुक्तोऽमृतमश्नुते २०

दमोहादिः तत्र स्थिताः अधो गच्छन्ति तमोवृत्तितारतम्यात्तामिस्रादिषु निरयेषूत्पद्यन्ते १८ तदेवं प्रकृतिगुणसंगकृतं संसारं सप्रपंचमुक्त्वेदानीं तद्विवे
कतो मोक्षं दर्शयति नान्यमिति यदा तु द्रष्टा विवेकी भूत्वा बुद्ध्याद्याकारपरिणतेभ्यो गुणेभ्योऽन्यं कर्तारं नानुपश्यति अपितु गुणा एव कर्माणि कुर्वन्तीति पश्य
ति गुणेभ्यश्च परं व्यतिरिक्तं तत्साक्षिणमात्मानं वेत्ति स मद्भावं ब्रह्मत्वमधिगच्छति प्राप्नोति १९ ततश्च गुणकृतसर्वानर्थनिवृत्त्या कृतार्थो भवतीत्याह
गुणानिति देहाकारः समुद्भवः परिणामो येषां ते देहसमुद्भवास्तानेतान्त्रीनपि गुणानतीत्यातिक्रम्य तत्कृतैर्जन्मादिभिर्मुक्तः सन्नमृतं ब्रह्मानन्दमाप्नोति
२०

गुणानेताननतीत्यामृतमश्नुत इत्येतच्छ्रुत्वा गुणातीतस्य लक्षणमाचारं च गुणात्ययोपायं च सम्यग्बुभुत्सुरर्जुन उवाच कैर्लिंगैरिति । हे प्रभो कैर्लिंगैः की-
दृशैरात्मन्युत्पन्नैर्भिन्नैर्गुणातीतो देही भवतीति लक्षणप्रश्नः । क आचारोऽस्येति किमाचारः कथं वर्त्तत इत्यर्थः । कथं च केनोपायेन एतांस्त्रीनपि गुणान-
तीत्य वर्त्तते तत्कथयेति ॥ २१ ॥ स्थितप्रज्ञस्य का भाषेत्यादिना द्वितीयाध्याये पृष्टमपि दत्तोत्तरमपि पुनर्विशेषबुभुत्सया पृच्छतीति ज्ञात्वा प्रकारान्तरे-
ण तस्य लक्षणादिकं श्रीभगवानुवाच । प्रकाशं चेत्यादिषड्भिः । तत्रैकेन लक्षणमाह । प्रकाशं च सर्वद्वारेषु देहेऽस्मिन्निति पूर्वोक्तं सत्वकार्यं प्रवृत्तिं च र-

अर्जुन उवाच । कैर्लिंगैस्त्रीन्गुणानेतानतीतो भवति प्रभो । किमाचारः कथं चैतांस्त्रीन्गुणानति-
वर्त्तते ॥ २१ ॥ श्रीभगवानुवाच । प्रकाशं च प्रवृत्तिं च मोहमेव च पाण्डव । न द्वेष्टि संप्रवृत्तानि न निवृत्तानि
कांक्षति ॥ २२ ॥ उदासीनवदासीनो गुणैर्यो न विचाल्यते । गुणा वर्त्तन्त इत्येवं योऽवतिष्ठति नेंगते ॥ २३ ॥

जः कार्यं मोहं च तमः कार्यं उपलक्षणमेतत् सत्वादीनां सर्वाण्यपि कार्याणि यथायथं संप्रवृत्तानि स्वतः प्राप्तानि संति दुःखबुद्ध्या न द्वेष्टि निवृत्तानि च सं-
ति सुखबुद्ध्या न कांक्षति गुणातीतः स उच्यते इति चतुर्थेनान्वयः ॥ २२ ॥ तदेवं स्वसंवेद्यं तस्य लक्षणमुक्त्वा परसंवेद्यं तस्य लक्षणं वक्तुं किमाचार इति द्वितीय-
प्रश्नस्योत्तरमाह उदासीनवदिति त्रिभिः । उदासीनवत् साक्षितया आसीनः स्थितः सन् गुणैः गुणकार्यैः सुखदुःखादिभिर्यो न विचाल्यते स्वरूपान्न
प्रच्याव्यते अपि तु गुणा एव स्वकार्येषु वर्त्तन्ते एतैर्मम संबंध एव नास्तीति विवेकज्ञानेन यः तूष्णीमवतिष्ठति परस्मैपदमार्षं नेंगते न चलति ॥ २३ ॥

र

किंच समेति समे सुखदुःखे यस्य यतः स्वस्थः स्वरूप एव स्थितः अत एव समानि लोष्टाश्मकांचनानि यस्य तुल्ये प्रियाप्रिये सुखदुःखहेतुभूते यस्य धी
रो धीमान् तुल्या निंदा च आत्मसंस्तुतिश्च यस्य २४ किंच मानापमानयोरिति माने च अपमाने च तुल्यः मित्रपक्षे अरिपक्षे च तुल्यः सर्वान् दृष्टार्थान् आ
रंभानुद्यमान् परित्यक्तुं शीलं यस्य एवंभूताचारयुक्तो गुणातीत उच्यते इत्यर्थः २५ कथं चैतान् गुणान् अतिवर्तते इत्यस्य प्रश्नस्योत्तरमाह मां चेति
च शब्दोऽवधारणार्थः मामेव परमेश्वरमव्यभिचारेण एकांतभक्तियोगेन यः सेवते स एतान् गुणान् समतीत्य सम्यगतिक्रम्य ब्रह्मभूयाय ब्रह्मभावाय

समदुःखसुखः स्वस्थः समलोष्टाश्मकांचनः तुल्यप्रियाप्रियो धीरस्तुल्यनिंदात्मसंस्तुतिः २४ मानापमा
नयोस्तुल्यस्तुल्यो मित्रारिपक्षयोः सर्वारंभपरित्यागी गुणातीतः स उच्यते २५ मां च योऽव्यभिचारेण भक्तियोगेन सेवते स गुणान्
समतीत्यैतान् ब्रह्मभूयाय कल्पते २६ ब्रह्मणो हि प्रतिष्ठाहममृतस्याव्ययस्य च शाश्वतस्य च धर्मस्य सुखस्यैकांतिकस्य च २७ ❀
❀ इति श्रीभगवद्गीता० गुणत्रयविभागयोगो नाम चतुर्दशोऽध्यायः १४ ❀

कल्पते योग्यो भवति २६ तत्र हेतुमाह ब्रह्मणो हीति हि यस्मात् ब्रह्मणोऽहं प्रतिष्ठा प्रतिमा घनीभूतं ब्रह्मैवाहं यथा घनीभूतः प्रकाश एव सूर्यमंड
लं तद्वदेवेत्यर्थः तथाऽव्ययस्य नित्यस्य अमृतस्य च मोक्षस्य नित्यमुक्तत्वात् तथा तत्साधनस्य शाश्वतस्य धर्मस्य शुद्धसत्त्वात्मकत्वात् तथा एकांतिकस्या
खंडितस्य सुखस्य च प्रतिष्ठाहं परमानंदैकरूपत्वात् अतो मत्सेविनो मद्भावस्यावश्यंभावित्वाद्युक्तमेवोक्तं ब्रह्मभूयाय कल्पत इति २७ स्वमाधीनगु
णसंगप्रसंजितभवं [illegible] बुधिं सुखं तरति मद्भक्त इत्यभाणि चतुर्दशे ॥ ❀ इति श्रीभगवद्गीताटीकायां सुबोधिन्यां चतुर्दशोऽध्यायः १४ ॥

वैराग्येनविनाज्ञानंनचभक्तिर्यतःस्फुटं वैराग्योपस्कृतंज्ञानमीशःपंचदशेऽदिशत् पूर्वाध्यायांतेमांचयोव्यभिचारेणभक्तियोगेनसेवत
इत्यादिनापरमेश्वरमेकांतभक्त्याभजतस्तत्प्रसादलब्धज्ञानेनब्रह्मभावोभवतीत्युक्तं नचैकांतभक्तिर्ज्ञानंवाविरक्तस्यभवतीतिवैराग्य
पूर्वकंज्ञानमुपदेष्टुकामः प्रथमंतावत्ताईश्लोकाभ्यांसंसारस्वरूपंवृक्षरूपकालंकारेणवर्णयन्श्रीभगवानुवाच ऊर्द्ध्वमूलमिति॥
ऊर्द्ध्वउत्तरःक्षराक्षराभ्यामुत्कृष्टःपुरुषोत्तमोमूलंयस्यतं अधइतिततोऽर्वाचीनाःकार्योपाधयोहिरण्यगर्भादयोगृह्यंते तेतुशाखा
यस्यतं विनश्वरत्वेनश्वःप्रभातपर्यंतमपिस्थास्यतीतिविश्वासानर्हत्वात् अश्वत्थंप्राहुः प्रवाहरूपेणाविच्छेदादव्ययंप्राहुः ऊर्द्ध्वमू

श्रीभगवानुवाच ऊर्द्ध्वमूलमधःशाखमश्वत्थंप्राहुरव्ययं छंदांसियस्यपर्णानियस्तंवेदसवेदवित् १

लअर्वाक्शाखएषोश्वत्थःसनातन इत्याद्याःश्रुतयः छंदांसिवेदायस्यपर्णानि धर्माधर्मप्रतिपादनद्वारेणच्छायास्थानीयैःकर्मफ
लैःसंसारवृक्षस्यसर्वजीवाश्रयणीयत्वापादनात् पर्णस्थानीयावेदाःयस्तमेवंभूतमश्वत्थंवेदसएववेदार्थवित् संसारवृक्षस्य
मूलमीश्वरःश्रीनारायणः ब्रह्मादयस्तदंशाःशाखास्थानीयाः सचसंसारवृक्षोविनश्वरः प्रवाहरूपेणनित्यश्च वेदोक्तैःकर्मभिः
सेव्यतामापादितश्चेत्येतावानिहवेदार्थः अतएवविद्वान्वेदविदितिस्तूयते १ श्रीपुराणपुरुषोत्तमायनमः ७ श्रीरामाय

किंच अध इति हिरण्यगर्भादयः कार्योपाधयो जीवाः शाखास्थानीयत्वेनोक्तास्तेषु च ये दुष्कृतिनस्ते अधः पश्वादियोनिषु प्रसृता विस्तारं गताः
सुकृतिनः ऊर्ध्वं देवादियोनिषु प्रसृतास्तस्य संसारवृक्षस्य शाखाः किंच गुणैः सत्वादिवृत्तिभिः जलसेचनैरिव यथायथं प्रवृद्धाः वृद्धिं प्राप्ताः
किंच विषया रूपादयः प्रवालाः पल्लवस्थानीयाः यासां ताः शाखास्थानीयाभिरिंद्रियवृत्तिभिः संयुक्तत्वात् किंच अधश्च शब्दात् ऊर्ध्वं च मू
लानि अनुसंततानि विरूढानि मुख्यं मूलं ईश्वर एक एव इमानि त्ववांतरमूलानि तत्तद्भोगवासनालक्षणानि तेषां कार्यमाह मनुष्यलो
के कर्मानुबंधीनि कर्म अनुबंधः अनंतरं भावी येषां तानि ऊर्ध्वाधोलोकेषु उपभुक्ततत्तद्भोगवासनाभिर्हि कर्मक्षये मनुष्यलोकं प्राप्तानां

अधश्चोर्ध्वं प्रसृतास्तस्य शाखा गुणप्रवृद्धा विषयप्रवालाः अधश्च मूलान्यनुसंततानि कर्मानुबंधीनि मनुष्य
लोके २ न रूपमस्येह तथोपलभ्यते नांतो न चादिर्न च संप्रतिष्ठा अश्वत्थमेनं सुविरूढमूलमसंगशस्त्रेण दृढेन छित्वा ३

तत्तदनुरूपेषु कर्मसु प्रवृत्तिर्भवति तस्मिन्नेव हि कर्माधिकारो नान्येषु लोकेषु ततो मनुष्यलोक इत्युक्तं २ किंच न रूपमस्येति इह संसारे स्थितैः
प्राणिभिः अस्य संसारवृक्षस्य ततोर्ध्वमूलत्वादिप्रकारेण रूपं नोपलभ्यते नचांतः अवसानं अपर्यवसानत्वात् नचादिः अनादित्वात् नच संप्रतिष्ठा न
स्थितिः कथं तिष्ठतीति नोपलभ्यते यस्मादेवंभूतत्वादयं संसारवृक्षो दुरुच्छेद्यः अनर्थकरश्च तस्मादेवं दृढेन वैराग्येन छित्वा तत्त्वज्ञाने यतेते
त्याह अश्वत्थमेनमिति सार्धेन एनमश्वत्थं सुविरूढमूलं अत्यंतबद्धमूलं संततं असंगः अहंताममतात्यागस्तेन शस्त्रेण दृढेन सम्यग्विचारवता
छित्वा पृथक्कृत्य ३

ततस्तस्य मूलभूतं तत्पदं वस्तु वैष्णवं पदं परिमार्गितव्यं अन्वेष्टव्यं कीदृशं यस्मिन्गताः यत्पदं प्राप्ताः संतो भूयो न निवर्तंते इत्यर्थः अन्वेषणप्र
कारमेवाह यतः एषा पुराणी चिरंतनी संसारप्रवृत्तिः प्रसृता विस्तृता तमेव चाद्यं पुरुषं प्रपद्ये शरणं व्रजामि इत्येवमेकांतभक्त्या ऽन्वेष्टव्यमि
त्यर्थः ॥४॥ तत्प्राप्तौ साधनांतराण्यपि दर्शयन्नाह निर्मानमोहा इति निर्गतौ मानमोहौ अहंकारमिथ्याभिनिवेशौ येभ्यस्ते जितः पुत्रादिसंगरूपो

ततः पदं तत्परिमार्गितव्यं यस्मिन्गता न निवर्तंति भूयः तमेव चाद्यं पुरुषं प्रपद्ये यतः प्रवृत्तिः प्रसृता
पुराणी ॥४॥ निर्मानमोहा जितसंगदोषा अध्यात्मनित्या विनिवृत्तकामाः द्वंद्वैर्विमुक्ताः सुखदुःखसंज्ञैर्ग
च्छंत्यमूढाः पदमव्ययं तत् ॥५॥ न तद्भासयते सूर्यो न शशांको न पावकः यद्गत्वा न निवर्तंते तद्धाम परमं मम ॥६॥

दोषो यैः अध्यात्मे आत्मज्ञाने नित्याः परिनिष्ठिताः विशेषेण निवृत्तः कामो येभ्यस्ते सुखदुःखहेतुत्वात् सुखदुःखसंज्ञानि शीतोष्णादीनि द्वं
द्वानि तैर्विमुक्ताः अत एव अमूढाः निवृत्ताविद्याः संतस्तदव्ययं पदं वैष्णवं गच्छंति ॥५॥ तदेव गंतव्यं पदं विशिनष्टि न तदिति तत्पदं सूर्याद
यो न प्रकाशयंति यत्प्राप्य न निवर्तंते योगिनः तद्धाम स्वरूपं परमं मम सूर्यादिप्रकाशाविषयत्वेन जडत्वे शीतोष्णादिदोषप्रसंगो निरस्तः ॥६॥

ननु च त्वदीयं धाम प्राप्ताः संतो यदि न निवर्तंते तर्हि सति संपद्य न विदुः तर्हि संपद्यामह इत्यादिश्रुतेः सुषुप्तिप्रलयसमये त्वत्प्राप्तिः सर्वेषाम
स्तीति को नाम संसारी स्यादित्याशंक्य संसारिणं दर्शयति ममैवेति पंचभिः ममैवांशो यो यमविद्यया जीवभूतः सनातनः सर्वदा संसारित्वेन
प्रसिद्धः असौ सुषुप्तिप्रलययोः प्रकृतौ लीनतया स्थितानि मनःषष्ठानि यानि तानींद्रियाणि पुनर्जीवलोके संसारे भोगार्थमाकर्षति एतच्च कर्मे
न्द्रियाणां प्राणस्य चोपलक्षणार्थं अयंभावः सत्यं सुषुप्तिप्रलययोरपि मदंशत्वात् सर्वस्यापि जीवमात्रस्य मल्लयादुत्पत्तिवन्मत्प्राप्तिः तथाप्य
विद्यावृतस्य सानुशयस्य सप्रकृतिके मयि लयो न तु शुद्धे तदुक्तं अव्यक्ताद्व्यक्तयः सर्वाः प्रभवंतीत्यादिना अतश्च पुनः संसाराय निर्गच्छन्नवि

ममैवांशो जीवलोके जीवभूतः सनातनः मनःषष्ठानींद्रियाणि प्रकृतिस्थानि कर्षति ७ शरीरं यदवाप्नोति यच्चाप्युत्क्रामतीश्व
रः गृहीत्वैतानि संयाति वायुर्गंधानिवाशयात् ८ श्रोत्रं चक्षुः स्पर्शनं च रसनं घ्राणमेव च अधिष्ठाय मनश्चायं विषयानुपसेवते ९

द्यान् प्रकृतौ स्थितानि स्वोपाधिभूतानींद्रियाण्याकर्षति विदुषां तु स्वस्वरूपप्राप्तेर्नावृत्तिरिति ७ तान्याकृष्य किं करोतीत्यत आह शरीरमिति
यत् यदा शरीरांतरं कर्मवशादवाप्नोति यतश्च शरीरादुत्क्रामति ईश्वरो देहादीनां स्वामी तदा पूर्वस्माच्छरीरादेतानि गृहीत्वा तच्छरीरांत
रं सम्यग्याति शरीरे सत्येव इंद्रियग्रहणे दृष्टांतः आशयात्स्वस्थानात् कुसुमादेः सकाशात् गंधान् गंधवतः सूक्ष्मानंशान् गृहीत्वा यथा वायुर्ग
च्छति तद्वत् ८ तान्येवेंद्रियाणि दर्शयन् तद्दर्शनं गृहीत्वा गच्छति न तु इह श्रोत्रमिति श्रोत्रादीनि बाह्येंद्रियाणि मनश्चांतःकरणमधिष्ठायाश्रित्यायं

ननु च कार्यकारणव्यतिरेकेणैवंभूतमात्मानं सर्वेऽपि किं न पश्यन्ति तत्राह उत्क्रामन्तमिति उत्क्रामन्तं देहाद्देहान्तरं गच्छन्तं तस्मिन्नेव देहे स्थि-
तं वा विषयान्भुंजानं वा गुणान्वितमिंद्रियादियुक्तं जीवं विमूढा नालोकयन्ति ज्ञानमेव चक्षुर्येषां ते विवेकिनः पश्यन्ति १० दुर्ज्ञेयश्चायं य-
तोऽविवेकिष्वपि केचिदेव पश्यन्ति केचिन्न पश्यन्तीत्याह यतन्त इति ध्यानादिभिः प्रयतमाना योगिनः केचिदेनमात्मानमात्मनि देहेऽव-
स्थितं विविक्तं पश्यन्ति शास्त्राभ्यासादिभिः यत्नं कुर्वाणा अपि अकृतात्मानः अविशुद्धचित्ताः अत एवाचेतसो मंदमतयः एनं न पश्यन्ति ११

उत्क्रामन्तं स्थितं वापि भुंजानं वा गुणान्वितं विमूढा नानुपश्यन्ति पश्यन्ति ज्ञानचक्षुषः १० यतन्तो योगिन-
श्चैनं पश्यन्त्यात्मन्यवस्थितं यतन्तोऽप्यकृतात्मानो नैनं पश्यन्त्यचेतसः ११ यदादित्यगतं तेजो जगद्भासयतेऽखिलं
यच्चंद्रमसि यच्चाग्नौ तत्तेजो विद्धि मामकं १२ गामाविश्य च भूतानि धारयाम्यहमोजसा पुष्णामि चौषधीः सर्वाः सोमो भूत्वा रसात्मकः

न देवं न तद्भासयते सूर्य इत्यनेन पारमेश्वरं धामोक्तं तत्प्राप्तानां चापुनरावृत्तिरुक्ता तत्र च संसारिणोऽभावमाशंक्य संसारिस्वरूपं देहादि-
व्यतिरिक्तं दर्शितं इदानीं तदेव पारमेश्वरं रूपं अनन्तशक्तित्वेन निरूपयति यदित्यादिभिश्चतुर्भिः आदित्यादिषु स्थितं यदनेकप्रकारकं ते
जो विश्वं प्रकाशयति तत्सर्वं तेजो मदीयमेव जानीहि १२ किंच गामाविश्येति गां पृथिवीं ओजसा बलेनाधिष्ठायाहमेव चराचराणि
भूतानि धारयामि अहमेव रसमयः सोमो भूत्वा व्रीह्याद्योषधीः संवर्द्धयामि १३ ७ श्रीपुराणपुरुषोत्तमाय नमः श्रीनर्मदादेव्यै नमः

किंचअहमिति वैश्वानरोजाठरोभूत्वा प्राणिनांदेहस्यांतः प्रविश्य प्राणापानाभ्यांतदुद्दीपकाभ्यांसहितःप्राणिनांभुक्तंभक्ष्यंभोज्यंलेह्यंचोष्यं
चेतिचतुर्विधंअन्नंपचामि तत्रयद्दंतैरवखंड्यावखंड्यभक्ष्यतेअपूपादितद्भक्ष्यं यत्तुकेवलंजिह्वयाविलोड्यनिगीर्यतेपायसादितद्भोज्यं यत्तु
जिह्वायांनिक्षिप्यरसास्वादेननिगीर्यतेद्रवीभूतगुडादितल्लेह्यं यत्तुदंष्ट्राभिर्निष्पीड्यसारांशंनिगीर्यावशिष्टंत्यज्यतेयथेक्षुदंडादितच्चोष्य
मितिभेदः १४ किंचसर्वस्येति सर्वस्यप्राणिजातस्यहृदिसम्यगंतर्यामिरूपेणप्रविष्टोहं अतश्चमत्तएवहेतोःप्राणिमात्रस्यस्मृतिरनुभूता

अहंवैश्वानरोभूत्वाप्राणिनांदेहमाश्रितः प्राणापानसमायुक्तःपचाम्यन्नंचतुर्विधं १४
सर्वस्यचाहंहृदिसन्निविष्टोमत्तःस्मृतिर्ज्ञानमपोहनंच वेदैश्चसर्वैरहमेववेद्योवेदांतकृद्वेदविदेवचाहं १५
द्वाविमौपुरुषौलोकेक्षरश्चाक्षरएवच क्षरःसर्वाणिभूतानिकूटस्थोक्षरउच्यते १६

र्थविषयास्मृतिर्भवति ज्ञानंचविषयेंद्रियसंप्रयोगजंभवति अपोहनंचतयोःप्रमोषोभवति वेदैश्चसर्वैस्तत्तद्देवतादिरूपेणाहमेववेद्यः वेदांतकृ
त्संप्रदायप्रवर्तकश्च ज्ञानदोगुरुरहमित्यर्थः वेदार्थविदप्यहमेव १५ इदानींतद्धामपरमंममेतियदुक्तंस्वकीयंसर्वोत्कृष्टंस्वरूपंतद्दर्शयति द्वावि
मावितित्रिभिः द्वाविमौक्षरश्चाक्षरश्चेति द्वाविमौपुरुषौलोकेप्रसिद्धौ तावेवाह तत्रक्षरःपुरुषोनामसर्वाणिभूतानिब्रह्मादिस्थावरांतानिश
रीराणिअविवेकिलोकस्यशरीरेष्वेवपुरुषत्वप्रसिद्धेः कूटःशिलाराशिःपर्वतइवदेहेषुनश्यत्स्वपिनिर्विकारतयातिष्ठतीतिकूटस्थश्चेतनोभोक्ता

श्रीः
१७

यदर्थमेतौ लक्षितौ तमाह उत्तम इति । ताभ्यां क्षराक्षराभ्यां अन्यो विलक्षणस्तूत्तमः पुरुषः वैलक्षण्यमेवाह परमश्चासावात्मेति चोदाहृतउ
क्तः श्रुतिभिः आत्मत्वेन क्षरादिचेतनाद्विलक्षणः परमत्वेन चाक्षराद्भोक्तुर्विलक्षण इत्यर्थः परमात्मत्वमेव दर्शयति यो लोकत्रयमिति यईश्व
रः ईशनशीलः अव्ययश्च निर्विकार एव सन् लोकत्रयं भूतत्वमाविश्य बिभर्ति पालयति १७ एवंभूतं पुरुषोत्तमत्वमात्मनो नामनिर्वचनेन द
र्शयति यस्मादिति यस्मात्क्षरं जडवर्गमतिक्रांतोहं नित्यमुक्तत्वात् अक्षराच्चेतनवर्गादप्युत्तमश्च नियंतृत्वात् अतो लोके वेदेच पु

उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः १७
यस्मात्क्षरमतीतोहमक्षरादपि चोत्तमः अतोस्मि लोके वेदे च प्रथितः पुरुषोत्तमः १८
यो मामेवमसंमूढो जानाति पुरुषोत्तमं स सर्वविद्भजति मां सर्वभावेन भारत १९

रुषोत्तमः प्रथितः प्रख्यातोस्मि तथाच श्रुतिः सर्वो यमात्मा सर्वस्य वशी सर्वस्येशानः सर्वस्याधिपतिः सर्वमिदं प्रशास्तीत्यादि १८
एवंभूतेश्वरज्ञानेः फलमाह यो मामिति एवं निरुक्तप्रकारेण संमूढो निश्चितमतिः सन् यो मां पुरुषोत्तमं जानाति स सर्वभावेन सर्व
प्रकारेण मामेव भजति ततः सर्ववित् सर्वज्ञो भवति १९ ७ श्रीगोपालकृष्णायनमः ७ श्रीनर्मदादेव्यैनमः ७ श्रीपुरुषोत्तमाय०

अध्यायार्थमुपसंहरति इतीति इतिअनेन संक्षेपप्रकारेण गुह्यतमं अतिरहस्यं संपूर्णं शास्त्रमेव मयोक्तं नपुनर्विंशतिश्लोकमध्यायमात्रं हे अनघ व्यसनशून्य अत एतन्मदुक्तं शास्त्रं बुध्वा बुद्धिमान् सम्यक्ज्ञानी स्यात् योपि कोपि हे भारत त्वं कृतकृत्योसीति किमुक्तव्यमिति भावः २० संसारशास्त्रविनं छित्वा स्पष्टं पंचदशे प्रभुः पुरुषोत्तमयोगाख्ये परंपदमुपादिशत् ॥ इति श्रीभगवद्गीताटीकायां सुबोधिन्यां पंचदशोध्यायः १५
आसुरीं संपदं त्यक्त्वा दैवीमेवाश्रिता नराः मुच्यंत इति निर्णेतुं तद्विवेकोथ षोडशे पूर्वाध्यायांते एतद्बुध्वा बुद्धिमान्स्यात्कृतकृत्यश्च भारतेत्यु

इति गुह्यतमं शास्त्रमिदमुक्तं मयानघ एतद्बुध्वा बुद्धिमान्स्यात्कृतकृत्यश्च भारत २० ॥

॥ इति श्रीभगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे० पुरुषोत्तमयोगो नाम पंचदशोध्यायः १५

श्रीभगवानुवाच अभयं सत्वसंशुद्धिर्ज्ञानयोगव्यवस्थितिः दानं दमश्च यज्ञश्च स्वाध्यायस्तप आर्जवं १

क्तं तत्र कः एतत्तत्त्वं बुध्यते को वा न बुद्ध्यत इत्यपेक्षायां तत्त्वज्ञानेऽधिकारिणोऽनधिकारिणश्च विवेकार्थं षोडशाध्यायारंभः निरूपिते हि कार्यार्थेऽधिकारिजिज्ञासा भवति तदुक्तं भट्टैः भावो योयेन बोद्धव्यः स प्रागात्तो लिलो यदा तदाकस्तस्य वोढेति शास्त्रं कर्तुं निरूपणमिति तत्राधिकारिविशेषणभूतां दैवीं संपदमाह अभयमिति त्रिभिः अभयं भयाभावः सत्वस्य चित्तस्य संशुद्धिः सुप्रसन्नता ज्ञानयोगे आत्मज्ञानोपाये व्यवस्थितिः परिनिष्ठा दानं स्वभोज्यस्यान्नादेर्यथोचितं संविभागः दमो बाह्येंद्रियसंयमः यज्ञो यथाधिकारं दर्शपूर्णमासादिः स्वाध्यायो ब्रह्मयज्ञादिर्जपयज्ञः तप उक्तशाध्या

श्रीः
७८

किंच अहिंसेति अहिंसा परपीडावर्जनं सत्यं यथादृष्टार्थभाषणं अक्रोधस्ताडितस्यापि चित्तक्षोभानुत्पत्तिः त्यागश्चौदार्यं शांतिश्चित्तोप रतिः पैशुन्यं परोक्षे परदोषप्रकाशनं तद्वर्जनमपैशुन्यं भूतेषु दीनेषु दया अलोलुप्त्वं वर्णलोपभार्षः मार्दवं मृदुत्वमक्रूरता ह्रीः अकार्यप्रवृत्तौ लोकलज्जा अचापलं व्यर्थक्रियाराहित्यं २ किंच तेज इति तेजः प्रागल्भ्यं क्षमा परिभवादिषूत्पद्यमानक्रोधप्रतिबंधः धृतिर्दुःखादिभिरवसीदतश्चित्तस्य स्थिरीकरणं शौचं बाह्याभ्यंतरशुद्धिः अद्रोहो जिघांसाराहित्यं अतिमानिता आत्मन्यतिपूज्यताभिमानः तदभावो नातिमानिता एतान्यभयादीनि षड्विंशतिः दैवीं संपदमभिजातस्य भवंति देवयोग्यां सात्विकीं संपदमभिलक्ष्य तदाभिमुख्येन जातस्य भाविकल्याणस्य पुं

अहिंसा सत्यमक्रोधस्त्यागः शांतिरपैशुनं दयाभूतेष्वलोलुप्त्वं मार्दवं ह्रीरचापलं २ तेजः क्षमा धृतिः शौचमद्रोहो नातिमानिता भवंति संपदं दैवीमभिजातस्य भारत ३ दंभो दर्पोभिमानश्च क्रोधः पारुष्यमेव च अज्ञानं चाभिजातस्य पार्थ संपदमासुरीं ४ दैवी संपद्विमोक्षाय निबंधायासुरी मता मा शुचः संपदं दैवीमभिजातोसि पांडव ५

सो भवंतीत्यर्थः ३ आसुरीं संपदमाह दंभ इति दंभो धर्मध्वजित्वं दर्पो धनविद्यादिनिमित्तः चित्तस्योत्सेकः अभिमानोक्त एव अतः क्रोधः प्रसिद्धः पारुष्यं निष्ठुरत्वं अज्ञानमविवेकः आसुरीमित्युपलक्षणं असुराणां राक्षसानां च या संपत् तामासुरीमभिलक्ष्य जातस्यैतानि दंभादीनि भवंतीत्यर्थः ४ एतयोः संपदोः कार्यं दर्शयन्नाह दैवी संपदिति दैवी या संपत् तया युक्तो मयोक्ते तत्त्वज्ञाने ऽधिकारी आसुर्या संपदा युक्तस्तु नित्यसंसारीत्यर्थः एतच्छ्रुत्वा किमहमत्राधिकारी न वेति संदेहव्याकुलचित्तमर्जुनमाश्वासयति हे पांडव मा शुचः शोकमाकार्षीः यतस्त्वं

सर्वात्मना वर्जयितव्येत्येतदर्थमासुरीं संपदं प्रपंचयितुमाह द्वाविति द्वौ द्विप्रकारौ भूतानां सर्गौ मे मद्वचनाच्छृणु असुरराक्षसप्रकृत्योरेकीक
रणेन द्वावित्युक्तं अतो राक्षसीमासुरीं चैव प्रकृतिं मोहिनीं श्रिता इत्यादिना नवमाध्यायोक्तप्रकृतित्रैविध्येनाविरोधः स्पष्टमन्यत् ६ आसुरीं वि
स्तरतो निरूपयति प्रवृत्तिमित्यादि द्वादशभिः धर्मे प्रवृत्तिं अधर्मान्निवृत्तिं च आसुरस्वभावा जना न जानंति अतः शौचं आचारः सत्यं च तेषु नास्ति ७
ननु वेदोक्तयोर्धर्माधर्मयोः प्रवृत्तिनिवृत्तिं च कथं न विदुः कुतो वा धर्माधर्मयोरनंगीकारे जगतः सुखदुःखादिव्यवस्था स्यात् कथं वा शौचाचा

द्वौ भूतसर्गौ लोकेस्मिन् दैव आसुर एव च दैवो विस्तरशः प्रोक्त आसुरं पार्थ मे शृणु ६
प्रवृत्तिं च निवृत्तिं च जना न विदुरासुराः न शौचं नापि चाचारो न सत्यं तेषु विद्यते ७
असत्यमप्रतिष्ठं ते जगदाहुरनीश्वरं अपरस्परसंभूतं किमन्यत्कामहैतुकम् ८

रादिविषयामीश्वराज्ञामतिवर्तेरन् ईश्वरानंगीकारे च कुतो जगदुत्पत्तिः स्यादत आह असत्यमिति नास्ति सत्यं वेदपुराणादिप्रमाणं यस्मि
न्तादृशं जगदाहुः वेदादीनां प्रामाण्यं न मन्यंत इत्यर्थः तदुक्तं त्रयो वेदस्य कर्त्तारो मुनिभंडनिशाचराः इत्यादि अत एव नास्ति धर्माधर्मरूपा प्र
तिष्ठा व्यवस्थाहेतुर्यस्य तत् स्वाभाविकं जगद्वैचित्र्यमाहुरित्यर्थः अत एव नास्तीश्वरः कर्त्ता व्यवस्थापकश्च यस्य तादृशं जगदाहुः तर्हि कुतोस्य ज
गत उत्पत्तिं वदंतीत्यत्राह अपरस्परसंभूतं अपरश्च परश्चेत्यपरस्परं अपरस्परतः अन्योन्यतः स्त्रीपुरुषमिथुनात्संभूतं जगत् किमन्यत्कारण
मस्य नास्त्यन्यत् किंचित् किंतु कामहेतुकं स्त्रीपुरुषयोः काम एव प्रवाहरूपेण हेतुरस्येत्याहुरित्यर्थः ८

किंच एतामिति एतां लोकायतिकानां दृष्टिं दर्शनमाश्रित्य नष्टात्मानो मलिनचित्ताः संतोऽल्पबुद्धयः दृष्टार्थमात्रमतयः अत एवोग्रं हिंस्रं कर्म येषां ते अहिता वैरिणो भूत्वा जगतः क्षयाय प्रभवंति उद्भवंतीत्यर्थः ९ अपिच काममिति दुःपूरं पूरयितुमशक्यं काममाश्रित्य दंभादिभिर्युक्ताः संतः क्षुद्रदेवताराधनादौ प्रवर्त्तंते कथं असद्ग्राहान् गृहीत्वा अनेन मंत्रेणैतां देवतामाराध्य महानिधीन्साधयिष्याम इत्यादिदुराग्रहान्मोहमात्रेण स्वीकृत्य प्रवर्त्तंते अशुचीनि मद्यमांसादिविषयाणि व्रतानि येषां ते १० किंच चिंतामिति प्रलयो मरणमेवांतो यस्याः तां अपरिमेयां

एतां दृष्टिमवष्टभ्य नष्टात्मानोऽल्पबुद्धयः प्रभवंत्युग्रकर्माणः क्षयाय जगतोऽहिताः ९ काममाश्रित्य दुःपूरं दंभमानमदान्विताः मोहाद्गृहीत्वासद्ग्राहान्प्रवर्त्तंतेऽशुचिव्रताः १० चिंतामपरिमेयां च प्रलयांतामुपाश्रिताः कामोपभोगपरमा एतावदिति निश्चिताः ११ आशापाशशतैर्बद्धाः कामक्रोधपरायणाः ईहंते कामभोगार्थमन्यायेनार्थसंचयान् १२ इदमद्य मया लब्धमिदं प्राप्स्ये मनोरथं इदमस्तीदमपि मे भविष्यति पुनर्धनम् १३

परिमातुमशक्यां चिंतामाश्रिताः नित्यचिंतापरा इत्यर्थः कामोपभोग एव परमो येषां एतावदिति कामोपभोग एव परमः पुरुषार्थो नान्यदस्तीति कृतनिश्चयाः अर्थसंचयानीहंत इत्युत्तरेणान्वयः तथाच बार्हस्पत्यं सूत्रं काम एवैकः पुरुषार्थ इति चैतन्यविशिष्टः कायः पुरुष इति च ११ अत एवाह आशेति आशा एव पाशास्तेषां शतानि तैर्बद्धा इतस्ततः आकृष्यमाणाः कामक्रोधौ परमयनमाश्रयो येषां ते कामभोगार्थमन्यायेन चौर्यादिना अर्थानां संचयान् ईहंते इच्छंति १२ तेषां मनोराज्यं कथयन्नरकप्राप्तिमाह इदमद्येति चतुर्भिः प्राप्स्ये प्राप्स्यामि मनोरथं मनसः प्रियं शिष्ट स्पष्टं एषां चत्रयाणां श्लोकानां इत्यज्ञानविमोहिताः संतो नरके पतंतीति चतुर्थेनान्वयः १३

किंच असाविति सिद्धः कृतकृत्यः स्पष्टमन्यत् १४ किंच आढ्य इति आढ्यो धनादिसंपन्नः अभिजनवान् कुलीनः यक्ष्ये यागाद्यनुष्ठानेनापि दीक्षितांतरेभ्यः सकाशान्महतीं प्रतिष्ठां प्राप्स्यामि दास्यामि स्तावकेभ्यः मोदिष्ये हर्षं प्राप्स्यामीत्येवमज्ञानेन विमोहिता मिथ्याभिनिवेशं प्रापिताः १५ एवंभूता यत्प्राप्नुवंति तच्छृणु अनेकेति अनेकेषु मनोरथेषु प्रवृत्तं चित्तं अनेकचित्तं तेन विभ्रांता विक्षिप्तास्तेनैव मोहमयेन जालेन समावृताः मत्स्या इव सूत्रमयेन जालेन यंत्रिताः एवं कामभोगेषु प्रसक्ता अभिनिविष्टाः संतोऽशुचौ कश्मले नरके पतंति १६ यद्यप्यु

असौ मया हतः शत्रुर्हनिष्ये चापरानपि ईश्वरोऽहमहं भोगी सिद्धोऽहं बलवान्सुखी १४
आढ्योऽभिजनवानस्मि कोऽन्योऽस्ति सदृशो मया यक्ष्ये दास्यामि मोदिष्य इत्यज्ञानविमोहिताः १५
अनेकचित्तविभ्रांता मोहजालसमावृताः प्रसक्ताः कामभोगेषु पतंति नरकेऽशुचौ १६
आत्मसंभाविताः स्तब्धा धनमानमदान्विताः यजंते नामयज्ञैस्ते दंभेनाविधिपूर्वकम् १७

निचयस्तेषां मनोरथ उक्तः स केवलं दंभाहंकारादिप्रधान एव न तु सात्विक इत्यभिप्रायेणाह आत्मसंभाविता इति द्वाभ्यां आत्मनैव संभाविताः पूज्यतां नीताः न तु साधुभिः कैश्चित् अत एव स्तब्धाः अनम्राः धनेन यो मानश्च मदश्च ताभ्यामन्विताः ततो नाममात्रेण ये यज्ञास्ते नामयज्ञाः यद्वा दीक्षितः सोमयाजीत्येवमादिनाममात्रसिद्धये ये यज्ञास्तैर्यजन्ते कथं दंभेन न तु श्रद्धया अविधिपूर्वकं यथा भवति तथा १७ श्रीनर्मदादेव्यै नमः

अविधिपूर्वकत्वमेव प्रपंचयति अहंकारमिति अहंकारादीन्संश्रिताः संतः आत्मपरदेहेषु स्वदेहेषु परदेहेषु च स्थितं मां प्र
द्विषंतो यजंते दंभयज्ञेषु श्रद्धाया अभावात् आत्मनो दुःखैव पीडा भवति तथा पश्वादीनामप्यविधिना हिंसायां चैन्यद्रोहमात्रमेवावशि
ष्यते इति प्रद्विषंत इत्युक्तं अभ्यसूयकाः सन्मार्गवर्तिनां गुणेषु दोषारोपकाः १८ तेषां च कदाचिदप्यासुरस्वभावप्रच्युतिर्न भवतीत्या
ह तानिति द्वाभ्यां तानहं मां द्विषतः क्रूरान् संसारेषु जन्ममृत्युमार्गेषु तथापि आसुरीष्वेव अतिक्रूरासु व्याघ्रसर्पादियोनिषु अजस्रम

अहंकारं बलं दर्पं कामं क्रोधं च संश्रिताः मामात्मपरदेहेषु प्रद्विषंतोऽभ्यसूयकाः १८ तानहं द्विषतः क्रूरान्
संसारेषु नराधमान् क्षिपाम्यजस्रमशुभानासुरीष्वेव योनिषु १९ आसुरीं योनिमापन्ना मूढा जन्मनि जन्मनि मा
मप्राप्यैव कौंतेय ततो यांत्यधमां गतिं २० त्रिविधं नरकस्येदं द्वारं नाशनमात्मनः कामः क्रोधस्तथा लोभस्तस्मादेतत्त्रयं स ते

नवरतं क्षिपामि तेषां पापकर्मणां तादृशं फलं ददामीत्यर्थः १९ ते च आसुरीमिति मामप्राप्यैवेत्येवकारेण मत्प्राप्तिशंकाकुतस्तेषां मत्प्रा
प्त्युपायं सन्मार्गमप्यप्राप्य ततोऽप्यधमां कृमिकीटादियोनिं गतिं यांतीत्युक्तं क्लिष्टं स्पष्टं २० उक्तानामासुरदोषाणां मध्ये सकलदोषमूलभूतं
दोषत्रयं सर्वथा वर्जनीयमित्याह त्रिविधमिति कामः क्रोधो लोभ इति त्रितयं त्रिविधं नरकस्य द्वारं अत एवात्मनो नाशनं नीचयोनिप्रापकं तस्मा

त्रितयमेतत्त्यजेत्

भ०गी०टी०

८९

त्यागे च विशिष्टफलमाह एतैरिति तमसो नरकस्य द्वारभूतैरेतैस्त्रिभिः कामादिभिर्विमुक्तो नरः आत्मनः श्रेयःसाधनं तपोयोगादिक
माचरति ततश्च मोक्षं प्राप्नोति २२ कामादित्यागश्च स्वधर्माचरणं विना न भवतीत्याह य इति शास्त्रविधिं वेदविहितं धर्ममुत्सृज्य
यः कामकारतो यथेष्टं वर्त्तते स सिद्धिं तत्त्वज्ञानं न प्राप्नोति न च सुखमुपशमं न च परां गतिं मुक्तिं प्राप्नोति २३ फलितमाह तस्मादिति

एतैर्विमुक्तः कौंतेय तमोद्वारैस्त्रिभिर्नरः आचरत्यात्मनः श्रेयस्ततो याति परां गतिं २२ यः शास्त्रविधिमुत्सृज्य
वर्त्तते कामकारतः न स सिद्धिमवाप्नोति न सुखं न परां गतिं २३ तस्माच्छास्त्रं प्रमाणं ते कार्याकार्यव्यवस्थितौ ज्ञा
त्वा शास्त्रविधानोक्तं कर्म कर्त्तुमिहार्हसि २४ ॥ इति श्रीभगवद्गीता० दैवासुरसंपद्विभागयोगनाम षोडशोऽध्यायः १६

इदं कार्यमिदमकार्यमित्यस्यां व्यवस्थायां तव शास्त्रं श्रुतिस्मृतिपुराणादिकं प्रमाणं अतः शास्त्रविधानोक्तं कर्म ज्ञात्वा इह कर्माधिकारे वर्त्त
मानो यथाधिकारं कर्म कर्त्तुमर्हसि तत्कृत्वा सत्त्वशुद्धिसम्यक्ज्ञानमुक्तीनामित्यर्थः २४ दैवदैतेयसंपत्तिसद्विभागेन षोडशे तत्त्वज्ञा
नेऽधिकारस्तु सात्विकस्येति दर्शितं ॥ ६ ॥ इति श्रीभगवद्गीताटीकायां सुबोधिन्यां दैवासुरसंपद्विभागयोगो नाम षोडशोऽध्यायः
१६

श्रीः

८९

यजेत इत्यनेन न शास्त्रार्थं बुध्वानुष्ठेयं ... तानादरं

उक्ताधिकारहेतूनां श्रद्धामुख्यानुसात्त्विकी इति सप्तदशेऽङ्गेन श्रद्धाभेदस्त्रिधोच्यते पूर्वाध्यायान्ते यः शास्त्रविधिमुत्सृज्य वर्त्तते कामकारतः न स
सिद्धिमवाप्नोतीत्यनेन शास्त्रोक्तविधिमुत्सृज्य कामकारेण वर्त्तमानस्य ज्ञानेऽधिकारो नास्तीत्युक्तं तत्र शास्त्रविधिमुत्सृज्य कामकारं विना श्र
द्धया वर्त्तमानानां किमधिकारोऽस्ति नास्ति वेति बुभुत्सया अर्जुन उवाच ये इति अत्र च शास्त्रविधिमुत्सृज्य यजन्ते इत्यनेन शास्त्रार्थं बुध्वा तमुल्लं
घ्य वर्त्तमाना न गृह्यन्ते तेषां श्रद्धया यजनानुपपत्तेः आस्तिक्यबुद्धिर्हि श्रद्धा नवा शास्त्रज्ञानवतां शास्त्रविरुद्धेऽर्थे संभवति तामेवाधिकृत्य त्रिविधा
भवति श्रद्धा यजन्ते सात्त्विका देवान् इत्याद्युत्तरानुपपत्तेश्च अतो नात्र शास्त्रार्थातिलंघिनो गृह्यन्ते अपितु क्लेशबुद्ध्या आलस्याद्वा शास्त्रार्थज्ञाने प्रय

अर्जुन उवाच ये शास्त्रविधिमुत्सृज्य यजन्ते श्रद्धयान्विताः तेषां निष्ठा तु का कृष्ण सत्त्वमाहो रजस्तमः १

७

त्नमकृत्वा केवलमाचारपरम्परावशेन श्रद्धया कंचिद्देवताराधनादौ प्रवर्त्तमाना गृह्यन्ते अतोऽयमर्थः ये शास्त्रविधिमुत्सृज्य दुःखबुद्ध्या आलस्याद्वा भ्रमनादस्य
केवलमाचारप्रामाण्येन श्रद्धयान्विताः सन्तो यजन्ते तेषां तु का निष्ठा का स्थितिः क आश्रयः तामेव विशेषेण पृच्छति किं सत्त्वं आहो किं वा रजः अथवा तमः इति
तेषां तादृशी देवपूजादिप्रवृत्तिः किं सत्त्वसंश्रिता रजःसंश्रिता वा तमःसंश्रिता वेत्यर्थः श्रद्धायाः सात्त्विकत्वात् क्लेशबुद्ध्या आलस्येन च शास्त्रानादर
स्य च राजसतामसत्वात् उभयथा संदेहः यदि सत्त्वभावसंश्रिताः तर्हि तेषामपि सात्त्विकत्वात् यथोक्तात्मज्ञानेऽधिकारः स्यात् अन्यथा नेति प्रश्नतात्पर्यार्थः १

अनेनोत्तरं श्रीभगवानुवाच त्रिविधेति अयमर्थः शास्त्रतत्त्वज्ञाननतः प्रवर्त्तमानानां परमेश्वरपूजाविषया सात्त्विकी एकविधैव श्रद्धा लोकाचारमात्रेणतुप्रवर्त्तमानानां देहिनां याश्रद्धा सातु सात्त्विकी राजसी तामसी चेति त्रिविधा भवति तत्र हेतुः स्वभावः पूर्वजन्मसंस्कारः तस्माज्जाता स्वभावजा स्वभावमन्यथाकर्तुं समर्थं हि शास्त्रोक्तं विवेकज्ञानं तत्तु तेषां नास्ति अतः केवलं पूर्वस्वभावेन भवंती श्रद्धा त्रिविधा भवति तामिमां त्रिविधां शृणु तदुक्तं व्यवसायात्मिका बुद्धिरेकेह कुरुनंदन इत्यादिना २ ननु च श्रद्धा सा सत्त्वस्यैव सत्त्वकार्यत्वेन तथैव भगवता ऽ दुःखं प्रतिनिर्दिष्टत्वात् यदुक्तं शमो दम स्थितिक्षेत्रे तपः सत्यं दया स्मृतिः तुष्टिस्त्यागो स्पृहा श्रद्धा ह्री दयादिः स्वनिर्वृतिः इत्येताः सत्त्वस्य स्वतनय इति अतः कथं तस्याः त्रैविध्यमुच्यते सत्यं तथापि रजस

श्रीभगवानुवाच त्रिविधा भवति श्रद्धा देहिनां सा स्वभावजा सात्त्विकी राजसी चैव तामसी चेति तां शृणु २ सत्त्वानुरूपा सर्वस्य श्रद्धा भवति भारत श्रद्धामयोयं पुरुषो यो यच्छ्रद्धः स एव सः ३

मोयुक्तपुरुषाश्रयत्वेन रजस्तमोमिश्रत्वेन सत्त्वस्यैव त्रैविध्यात् श्रद्धाया अपि त्रैविध्यं घटत इत्याह सत्त्वानुरूपेति सत्त्वानुरूपा सत्त्वतारतम्यानुसारिणी सर्वस्य विवेकिनोऽविवेकिनो वा लोकस्य श्रद्धा भवति तस्मादयं पुरुषः लौकिकः श्रद्धामयः श्रद्धाविकारः त्रिविधया श्रद्धया विक्रियत इत्यर्थः तदेवाह यो यच्छ्रद्धः यादृशी श्रद्धा यस्य स एव सः तादृश्या श्रद्धया युक्त एव सः यः पूर्वं सत्त्वोत्कर्षेण सात्त्विकश्रद्धयायुक्तः पुरुषः स पुनस्तादृश एव संस्कारेण सात्त्विक श्रद्धोयुक्त एव भवति यस्तु रजसउत्कर्षेण राजसश्रद्धायुक्तः स पुनस्तादृश एव भवति यस्तु तमस उत्कर्षेण तामसश्रद्धायुक्तः स पुनस्तादृश एव भवतीति लोकाचारमात्रेण प्रवर्त्तमानेष्वेवं सात्त्विकराजसतामसश्रद्धाव्यवस्था शास्त्रजनितविवेकज्ञानयुक्तानां तु स्वभावविजयेन सात्त्विक्येकैव श्रद्धेति प्रकरणार्थः ३

सात्त्विकादिभेदमेव कार्यभेदेन प्रपंचयति यजंत इति सात्त्विका जनाः सत्त्वप्रकृतीन् देवानेव यजंते पूजयंति राजसास्तु रजःप्रकृतीन् यक्षान् राक्षसांश्च यजन्ते एतेभ्योऽन्ये तु विलक्षणास्तामसा जनास्तामसानेव प्रेतान् भूतगणांश्च यजंते सत्त्वादिप्रकृतीनां तत्तद्देवतानां तु पूजा कश्चिद्विधिः तेन तत्पूजकानां सात्त्विकत्वादि ज्ञातव्यमित्यर्थः ४ राजसतामसेषु पुनर्विशेषमाह अशास्त्रविहितमिति द्वाभ्यां शास्त्रविधिमजानंतो केचित् प्राचीनपुण्यसंस्कारेण सात्त्विका एव भवंति केचित्तु मध्यमा राजसा भवंति अधमास्तु तामसा भवंति ये पुनरत्यंतं मंदभाग्या गतानुगत्या पाखंडसंगेन सदाचाराननुवर्तिनः संतः

यजन्ते सात्त्विका देवान्यक्षरक्षांसि राजसाः प्रेतान्भूतगणांश्चान्ये यजंते तामसा जनाः ४

अशास्त्रविहितं घोरं तप्यंते ये तपो जनाः दंभाहंकारसंयुक्ताः कामरागबलान्विताः

कर्षयन्तः शरीरस्थं भूतग्राममचेतसः मां चैवान्तःशरीरस्थं तान्विद्ध्यासुरनिश्चयान् ६

अशास्त्रविहितं घोरं भूतभयंकरं तपस्तप्यंते कुर्वंति तत्र हेतवः दंभाहंकाराभ्यां संयुक्ताः तथा कामोऽभिलाषः राग आसक्तिः बलमाग्रहः एतैरन्विताः संतः तान् आसुरनिश्चयान् विद्धीत्युत्तरेणान्वयः ५ किंच कर्षयंत इति शरीरस्थं प्रारंभकत्वेन देहस्थितं भूतानां पृथिव्यादीनां ग्रामं समूहं कर्षयंतः वृथैवोपवासादिभिः कृशं कुर्वंतोऽचेतसोऽविवेकिनः मां च अंतर्यामिनया अंतःशरीरस्थं देहमध्ये स्थितं मदाज्ञालंघनेनैव कर्षयंतः संत एव तपश्चरंति एतानासुरनिश्चयान् आसुरो निकृष्टो निश्चयो येषां तान् विद्धि ६

आहारादिभेदादपि सात्विकादिभेदं दर्शयितुमाह आहारस्त्वित्यादित्रयोदशभिः सर्वस्यापि जनस्य य आहारः अन्नादिः सतु यथायथं त्रिविधः प्रियो भवति तथा यज्ञतपोदानानि च त्रिविधानि भवंति तेषां च वक्ष्यमाणमिमं भेदं शृणु ७ तत्र राजस तामसाहारयज्ञादिपरित्यागेन सात्विकाहारयज्ञादिसेवया सत्ववृद्धौ यत्नः कर्तव्य इत्येतदर्थं कथ्यते ७ तत्राहारत्रैविध्यमाह आयुरित्यादित्रिभिः आयुर्जीवितं सत्वमुत्साहः बलं शक्तिः आरोग्यं रोगराहित्यं सुखं चित्तप्रसादः प्रीतिरभिरुचिः आयुरादीनां विवर्द्धनाः विवृद्धिकराः ते च रस्याः रसवंतः स्निग्धाः स्नेहयुक्ताः स्थिरा देहे बहुकालावस्थायिनः हृद्याः दृष्टमात्रे एव हृदयंगमाः एवं भूताआहाराभक्ष्यभोज्यादयः सात्विकस्य प्रियाः ८ तथा कट्विति अतिशब्दः कट्वादि

आहारस्त्वपि सर्वस्य त्रिविधो भवति प्रियः यज्ञस्तपस्तथा दानं तेषां भेदमिमं शृणु ७ आयुःसत्वबलारोग्यसुख
प्रीतिविवर्द्धनाः रस्याः स्निग्धाः स्थिरा हृद्या आहाराः सात्विकप्रियाः ८ कट्वम्ललवणात्युष्णतीक्ष्णरूक्षविदाहिनः आ
हारा राजसस्येष्टा दुःखशोकामयप्रदाः ९ यातयामं गतरसं पूतिपर्युषितं च यत् उच्छिष्टमपि चामेध्यं भोजनं तामसप्रियं १०

षु सप्तस्वपि संबध्यते अतिकटुः निंबादिः अत्यम्लोऽतिलवणोऽत्युष्णश्च प्रसिद्धः अतितीक्ष्णो मरिचादिः अतिरूक्षः कंगुकोद्रवादिः अतिविदाही सर्षपादिः अतिकट्वादय आहारा राजसस्येष्टाः प्रियाः दुःखं तात्कालिकं हृदयसंतापादिः शोकः पश्चाद्भावि दौर्मनस्यं आमयो रोगः एतानि प्रददतीति प्रयच्छंतीति ९ तथा यातयाममिति यातो यामः प्रहरो यस्य पक्वस्यौदनादेस्तद्यातयामं शैत्यावस्थां प्राप्तमित्यर्थः गतरसं निष्पीडितसारं पूतिदुर्गंधं पर्युषितं दिनांतरपक्वं उच्छिष्टमन्यभुक्तावशिष्टं अमेध्यमभक्ष्यं कलंजादिः एवंभूतं भोजनं भोज्यं तामसस्य प्रियं १० श्रीरामकृष्णाभ्यां नमः

यज्ञोपि त्रिविधः तत्र सात्विकं यज्ञमाह अफलाकांक्षिभिरिति फलाकांक्षारहितैः पुरुषैः विधिनादृष्टः आवश्यकतया विहितो यो यज्ञः इज्यते अ
नुष्ठीयते स सात्विको यज्ञः कथमिज्यते यष्टव्यमेवेति यज्ञानुष्ठानमेव कार्यं नान्यत्फलं साधनीयमित्येवं मनः समाधाय एकाग्रं कृत्वेत्यर्थः ११
राजसं यज्ञमाह विधिहीनमिति विधिहीनं शास्त्रोक्तविधिशून्यं असृष्टान्नं ब्राह्मणादिभ्यो न सृष्टं न निष्पादितमन्नं यस्मिन्तं मंत्रैर्हीनं य
थोक्तदक्षिणारहितं च श्रद्धाशून्यं यज्ञं तामसं परिचक्षते कथयन्ति शिष्टाः १३ तपसः सात्विकादिभेदं दर्शयितुं प्रथमं तावच्छारीरादिभेदेन तस्य

अफलाकांक्षिभिर्यज्ञो विधिदृष्टो य इज्यते यष्टव्यमेवेति मनः समाधाय स सात्विकः ११ अभिसंधा
य तु फलं दंभार्थमपि चैव यत् इज्यते भरतश्रेष्ठ तं यज्ञं विद्धि राजसं १२ विधिहीनमसृष्टान्नं मंत्रहीनमद
क्षिणं श्रद्धाविरहितं यज्ञं तामसं परिचक्षते १३ देवद्विजगुरुप्राज्ञपूजनं शौचमार्जवं ब्रह्मचर्यमहिंसा
च शारीरं तप उच्यते १४ अनुद्वेगकरं वाक्यं सत्यं प्रियहितं च यत् स्वाध्यायाभ्यसनं चैव वाङ्मयं तप उ
च्यते १५ मनः प्रसादः सौम्यत्वं मौनमात्मविनिग्रहः भावसंशुद्धिरित्येतत्तपो मानसमुच्यते १६

त्रैविध्यमाह देवद्विजेति त्रिभिः प्राज्ञा गुरुव्यतिरिक्ता अन्येपि तत्वविदः देवब्राह्मणादिपूजनं शौचादिकं शारीरं शरीरनिर्वर्त्यं तप उच्यते १४ वाचि
कं तप आह अनुद्वेगेति उद्वेगं भयं न करोतीति अनुद्वेगकरं वाक्यं सत्यं च श्रोतुः प्रियं च हितं च परिणामे सुखकरं स्वाध्यायाभ्यसनं वेदाभ्यासश्च वा
चा निर्वर्त्यं तपः वाङ्मयं १५ मानसं तप आह मनः प्रसाद इति मनसः प्रसादः स्वच्छता सौम्यत्वमक्रूरता मौनं मुनेर्भावः मननमित्यर्थः आत्मनो विनिग्रहं

तदेवं शारीरवाङ्मनोभिर्निर्वर्त्यं त्रिविधं तपो दर्शितं तस्य त्रिविधस्यापि तपसः सात्त्विकादिभेदेन त्रैविध्यमाह श्रद्धयेति त्रिभिः त्रिविधमपि तपः श्रेष्ठया
श्रद्धया फलाकांक्षारहितैः युक्तैरेकाग्रचित्तैर्नरैः कृतं तत्सात्त्विकं १७ राजसमाह सत्कारेति सत्कारः साधुकारः साधुरयं तापस इत्यादिवाक्पूजा
मानः प्रत्युत्थानाभिवादनादिर्दैहिकी पूजार्थलाभादिः एतदर्थं दंभेन च यत्तपः क्रियते अतएव चलमेवानियतं अध्रुवं च क्षणिकं यदेवंभूतं तपस्तदि
ह राजसं प्रोक्तं १८ तामसं तप आह मूढेति मूढग्राहेणाविवेककृतेन तदाग्रहेण आत्मनः पीडया यत्तपः क्रियते परस्योत्सादनार्थं वा अन्यस्य

श्रद्धया परया तप्तं तपस्तत्त्रिविधं नरैः अफलाकांक्षिभिर्युक्तैः सात्त्विकं परिचक्षते १७ सत्कारमानपूजार्थं
तपो दंभेन चैव यत् क्रियते तदिह प्रोक्तं राजसं चलमध्रुवं १८ मूढग्राहेणात्मनो यत्पीडया क्रियते तपः पर
स्योत्सादनार्थं वा तत्तामसमुदाहृतं १९ दातव्यमिति यद्दानं दीयतेऽनुपकारिणे देशे काले च पात्रे च तद्दानं
सात्त्विकं स्मृतं २० यत्तु प्रत्युपकारार्थं फलमुद्दिश्य वा पुनः दीयते च परिक्लिष्टं तद्राजसमुदाहृतम् २१

विनाशार्थं अभिचाररूपं तत्तामसमुदाहृतं कथितं १९ एवं प्रतिज्ञानमेव दानस्य त्रैविध्यमाह दातव्यमिति दातव्यमित्येवं निश्चयेन यद्दानं दी
यते अनुपकारिणे प्रत्युपकारासमर्थाय देशे कुरुक्षेत्रादौ काले ग्रहणादौ पात्रे चेति देशकालसाहचर्यान्नुसप्तमी प्रयुक्ता पात्रभूताय तपःश्रुतादि
संपन्नाय ब्राह्मणायेत्यर्थः यद्वा पात्र इति चतुर्थ्येवैषा पात्रे रक्षकायेत्यर्थः स हि सर्वस्मादापद्गणाद्दातारं पातीति यदेवंभूतं दानं तत्सात्त्विकं २० रा
जसं दानमाह यत्त्विति कालांतरे अयं मां प्रत्युपकरिष्यतीति एतदर्थं फलं वा स्वर्गादिकमुद्दिश्य यत्पुनर्दानं दीयते परिक्लिष्टं चित्तक्लेशयुक्तं यथा भवत्येवं

षि॰ लं॰ १८

तामसं दानमाह अदेशेति अदेशेऽशुचिस्थाने अकालेऽशौचसमये अपात्रेभ्यो विटनटादिभ्यो यद्दानं दीयते देशकालसंपत्तावपि असत्कृतं पादप्रक्षालनादिसत्काररहितं अवज्ञातं तिरस्कारयुक्तं एवंभूतं दानं तामसमुदाहृतं २२ ननु चैवं विचार्यमाणे सर्वमपि यज्ञतपोदानादि राजसतामसप्रायमेवेति अयथायज्ञादिप्रयास इत्याशंक्य तथाविधस्यापि सात्विकत्वापादानप्रकारं दर्शयितुमाह ॐ तत्सदिति ॐ तत्सदितेयं ब्रह्मणः परमात्मनो निर्देशो नामव्यपदेशः स्मृतः शिष्टैः तत्र तावदोमिति ब्रह्म इत्यादिश्रुतिप्रसिद्धेरोमिति ब्रह्मणो नाम जगत्कारणत्वेनातिप्रसिद्धत्वात् अविदुषां परोक्षत्वाच्च तच्छब्दोऽपि ब्रह्मणो नाम परमार्थसत्त्वसाधुत्वप्रशस्तत्वादिभिः सच्छब्दो ब्रह्मणो नाम अयं त्रिविधोऽपि नाम

अदेशकाले यद्दानमपात्रेभ्यश्च दीयते असत्कृतमवज्ञातं तत्तामसमुदाहृतम् २२
ॐ तत्सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृतः ब्राह्मणास्तेन वेदाश्च यज्ञाश्च विहिताः पुरा २३
तस्मादोमित्युदाहृत्य यज्ञदानतपःक्रियाः प्रवर्त्तंते विधानोक्ताः सततं ब्रह्मवादिनां २४

निर्देशो विगुणमपि सगुणीकर्तुं समर्थ इत्याशयेन स्तौति तेन त्रिविधेन ब्रह्मणो निर्देशेन ब्राह्मणाश्च वेदाश्च यज्ञाश्च पूर्वं सृष्ट्यादौ विहिताः विधात्रा निर्मिताः सगुणीकृता वा यद्वा यस्यायं त्रिविधो निर्देशस्तेन परमात्मना ब्राह्मणादयः अतिपवित्रतमाः सृष्टाः तस्मात्तस्यायं निर्देशोऽतिप्रशस्त इत्यर्थः २३ इदानीं प्रत्येकमोंकारादीनां प्राशस्त्यं दर्शयिष्यन् ॐकारस्य तावदाह तस्मादिति यस्मादेवं ब्रह्मणो निर्देशः प्रशस्तस्तस्मादोमित्युदाहृत्य उच्चार्य कृता वेदवादिनां यज्ञाद्याः शास्त्रोक्ताः क्रियाः सततं सर्वदा अंगवैकल्येऽपि प्रकर्षेण वर्त्तंते सगुणा भवंतीत्यर्थः २४

द्वितीयं नाम प्रशस्तोऽपि तदिति तदित्युदाहृतेति पूर्वस्यानुषंगः तदित्युदाहृत्य शुद्धचित्तैर्मोक्षकांक्षिभिः पुरुषैः फलाभिसंधिमकृत्वा यज्ञतपोदानाख्याः क्रियाः क्रियंते ततश्चित्तशोधनद्वारेण फलसंकल्पत्यजनेन मुमुक्षुत्वसंपादकत्वात्तच्छब्दनिर्देशः प्रशस्त इत्यर्थः २५ सच्छब्दप्राशस्त्यमाह सद्भाव इति द्वाभ्यां सद्भावे अस्तित्वे देवदत्तस्य पुत्रादिकमस्तीत्यस्मिन्नर्थे साधुभावे च साधुत्वे देवदत्तस्य पुत्रादिः श्रेष्ठमित्यस्मिन्नर्थे सदित्येतत्पदं प्रयुज्यते प्रशस्ते मांगलिके विवाहादिकर्मणि च सदिदं कर्मेति सच्छब्दो युज्यते प्रयुज्यते संगच्छत इति वा २६ किंच यज्ञ इति यज्ञादिषु च या स्थितिः तात्पर्येणावस्थानं तदपि सदित्युच्यते यस्य च वेदनामत्रयं स एव परमात्मा अर्थः फलं यस्य तत्तदर्थं कर्म यज्ञोपहार गृहांगणपरि

तदित्यनभिसंधाय फलं यज्ञतपःक्रियाः दानक्रियाश्च विविधाः क्रियन्ते मोक्षकांक्षिभिः २५

सद्भावे साधुभावे च सदित्येतत्प्रयुज्यते प्रशस्ते कर्मणि तथा सच्छब्दः पार्थ युज्यते २६

यज्ञे तपसि दाने च स्थितिः सदिति चोच्यते कर्म चैव तदर्थीयं सदित्येवाभिधीयते २७

मार्जनोपलेपरंगमालिकादिक्रिया नलिनीहृदयेयद्देवस्य तत्कर्म क्रियते उद्यानशालिक्षेत्रधनार्जनादिविषयं तत्कर्म तदर्थीयं तच्चास्तिक्यबहितमपि सदित्येवाभिधीयते तस्मादेवमतिप्रशस्तमेतन्नामत्रयं तस्मादेतत्सर्वकर्मसाद्गुण्यार्थं कीर्तयेदिति [illegible] तात्पर्यार्थः अत्रचार्थवादानुपपत्त्या विधिः कल्प्यते विधेयं स्तूयते वस्तिवति न्यायात् अपरे तु प्रवर्त्तते विधानोक्ताः क्रियंते मोक्षकांक्षिभिः इत्यादिवर्त्तमानापदेशस्य विधायकतीत्यादिदर्शनाद्वयविनया परिणमनीय इत्याहुः तच्च सद्भावे साधुभावे चेत्यादिषु प्राप्तार्थत्वात् न संगच्छत इति इत्युक्तक्रमेण विधिविक

इदानीं सर्वकर्मसु श्रद्धयैव प्रवृत्त्यर्थं अश्रद्धाकृतं सर्वं निंदति अश्रद्धयेति अश्रद्धया हुतं हवनं दत्तं दानं तपं निर्वर्तितं तपः यच्चान्यदपि कृतं कर्म सर्वमसदित्युच्यते यतः तत्प्रेत्य लोकांतरे न फलति विगुणत्वात् नो इह नचास्मिंल्लोके फलति अयशस्करत्वात् २८ रजस्तमोमयीं त्यक्त्वा शुद्धां सत्त्वमयीं श्रितः तत्त्वज्ञानेऽधिकारी स्यादिति सप्तदशोऽदितं ॥ ॐ इति श्रीभगवद्गीतार्थटीकायां सुबोधिन्यां सप्तदशोऽध्यायः १७ ॐ न्याससत्यागविभागेन सर्वगीतार्थसंग्रहं स्पष्टमष्टादशे प्राह परमार्थविनिर्णये अत्र च सर्वकर्माणि मनसा संन्यस्यास्ते सुखं वशी संन्यासयोग

अश्रद्धया हुतं दत्तं तपस्तप्तं कृतं च यत् असदित्युच्यते पार्थ न च तत्प्रेत्य नो इह २८ ॐ हरिः ॐ
तत्सदिति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्म० श्रद्धात्रयविभागयोगो नाम सप्तदशोऽध्यायः १७ ॐ
अर्जुन उवाच संन्यासस्य महाबाहो तत्त्वमिच्छामि वेदितुं त्यागस्य च हृषीकेश पृथक्केशिनिषूदन १

युक्तात्मेत्यादि कर्मसंन्यास उपदिष्टः तथा सक्तः कर्मफलासंगं नित्यतृप्तो निराश्रयः सर्वकर्मफलत्यागं ततः कुरु यतात्मवान् इत्यादिषु च फलमात्र त्यागेन कर्मानुष्ठानमुपदिष्टं न च परस्परविरुद्धं सर्वज्ञः परमकारुणिको भगवानुपदिशेत् अतः कर्मसंन्यासस्य तदनुष्ठानस्य चाविरोधप्रकारं बुभुत्सुरर्जुन उवाच संन्यासस्येति भो हृषीकेश सर्वेंद्रियनियामक हे केशिनिषूदन केशिनाम्नो महतो हयाकृतेर्दैत्यस्य युद्धे मुखं व्यादाय भक्षयितुमागच्छतोऽसंतर्व्याप्ते मुखे वाम बाहुं प्रवेश्य तत्क्षणमेव विवर्धितेन बाहुना कर्कटिकाफलवत्तं विदार्य निषूदितवान् अत एव हे महाबाहो इति संबोधनं संन्यासस्य त्या

तत्रोत्तरं श्रीभगवानुवाच काम्यानामिति पुत्रकामो यजेत स्वर्गकामो यजेतेत्येवमादिकामोपबन्धेन विहितानां काम्यानां कर्मणां न्यासं प
रित्यागं संन्यासं कवयो विदुः सम्यक् फलैः सह कर्मणामपि न्यासं संन्यासं पण्डिता विदुः जानंतीत्यर्थः सर्वेषां काम्यानां नित्यनैमित्तिकानां च
कर्मणां फलमात्रत्यागं प्राहुस्त्यागं विचक्षणाः निपुणाः न तु स्वरूपतः कर्मत्यागं ननु नित्यनैमित्तिकानां फलश्रवणाद् विद्यमानस्य फलस्य
कथं त्यागः स्यात् नहि वंध्यायाः पुत्रत्यागः संभवति उच्यते यद्यपि स्वर्गकामः पशुकामः इत्यादिवत् संध्यामुपासीत यावज्जीवमग्निहोत्रं

श्रीभगवानुवाच काम्यानां कर्मणां न्यासं संन्यासं कवयो विदुः

जुहोतीत्यादिषु फलविशेषो न श्रूयते तथाप्यपुरुषार्थे आपातेक्षावंतं प्रवर्त्तयितुमशक्नुवन्विधिर्विश्वजिता यजेतेत्यादिष्विव सामान्यतः किमपि फ
लमाक्षिपत्येव न चातीव गुरुमतश्रद्धयास्माभिरुद्धुरेव विधेः प्रयोजनमिति मंतव्यं उरुषमहत्त्वप्रपत्तेर्दुःपरिहरत्वात् श्रूयते च नित्यादिष्वपि फलं स
र्वएते पुण्यलोका भवंतीति कर्मणा पितृलोक इति धर्मेण पापमपनुदतीत्यादिषु तस्मादयुक्तमुक्तं सर्वकर्मफलत्यागं प्राहुस्त्यागं विचक्षणा इति

ननु च फलत्यागे न पुनरपि निष्फलेषु कर्मसु प्रवृत्तिरेव स्यात् तन्न सर्वेषामपि कर्मणां संयोगपृथक्त्वेन विविदिषार्थतया विनियोगात् तथा च श्रु-
तिः तमेतमात्मानं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसानाशकेनेति अतः प्रतिपदोक्तं सर्वं फलं बंधकेन त्यक्त्वा विविदिषार्थं स-
र्वकर्मानुष्ठानं घटत एव विविदिषा च नित्यानित्यवस्तुविवेकेन निवृत्तदेहाद्यभिमानतया बुद्धेः प्रत्यक्प्रवणता तावत्पर्यंतं च सत्वशुद्ध्यर्थं ज्ञाना-
विरुद्धं यथोचितमावश्यकं कर्म कुर्वतस्तत्फलत्याग एव कर्मत्यागो नाम न स्वरूपेण तथा च श्रुतिः कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समा इति
ततः परं तु सर्वकर्मनिवृत्तिः स्वत एव भवति तदुक्तं नैष्कर्म्यसिद्धौ प्रत्यक्प्रवणतां बुद्धेः कर्माण्युत्पाद्य शुद्धितः कृतार्थान्यस्तमायांति प्रावृडंते घ-

सर्वकर्मफलत्यागं प्राहुस्त्यागं विचक्षणाः २

नाद्यव इति उक्तं च भगवता यस्त्वात्मरतिरेव स्यादात्मतृप्तश्च मानवः आत्मन्येव च संतुष्टस्तस्य कार्यं न विद्यते इति वशिष्ठेन चोक्तं न कर्मा-
णि त्यजेद्योगी कर्मभिस्त्यज्यते ह्यसौ कर्मणो मूलभूतस्य संकल्पस्यैव नाशतः इति ज्ञाननिष्ठाविक्षेपकत्वमालक्ष्य त्यजेद्धा तदुक्तं भगवता
तावत्कर्माणि कुर्वीत न निर्विद्येत यावता मत्कथाश्रवणादौ वा श्रद्धा यावन्न जायते ज्ञाननिष्ठो विरक्तो वा मद्भक्तो वानपेक्षकः सलिंगानाश्र-
मांस्त्यक्त्वा चरेदविधिगोचर इत्यादि अलमतिप्रसंगेन प्रकृतमनुसरामः २

अविदुषः फलत्यागमात्रमेव त्यागशब्दार्थो न कर्मत्याग इत्येतदेव मतान्तरनिरासेन दृढीकर्तुं मतभेदं दर्शयति त्याज्यमिति दोषवत् हिंसादिदोषवत्त्वेन बंधकमिति हेतोः सर्वमपि कर्म त्याज्यमित्येके सांख्याः प्राहुः मनीषिण इत्यस्यायं भावः न हिंस्यात्सर्वभूतानीति निषेधः पुरुषस्यानर्थहेतुर्हिंसेत्याह अग्नीषोमीयं पशुमालभेतेत्यादिशास्त्रं क्रतूपकारकत्वमाह अतो भिन्नविषयत्वेन सामान्यविशेषन्यायागोचरत्वात् क्रतुसाध्येषु सर्वेष्वपि कर्मसु हिंसादेः संभवात् सर्वमपि कर्म त्याज्यमेवेति तदुक्तं दृष्टवदानुश्रविकः स ह्यविशुद्धिक्षयातिशययुक्त इति अपरे तु मीमांसकाः यज्ञादिकर्म न त्याज्यमेवेत्याहुः अयं भावः क्रत्वर्थापि सती हिंसा पुरुषेणैव कर्तव्या सा चान्योद्देशेनापि कृता पुरुषस्य प्रत्य

त्याज्यं दोषवदित्येके कर्म प्राहुर्मनीषिणः यज्ञदानतपःकर्म न त्याज्यमिति चापरे ३
निश्चयं शृणु मे तत्र त्यागे भरतसत्तम त्यागो हि पुरुषव्याघ्र त्रिविधः संप्रकीर्तितः ४

वायहेतुरेव तथा हि विधिर्विधेयस्य तदुद्देशेनानुष्ठानं विधत्ते तादर्थ्यलक्षणत्वाच्छेषत्वस्य न त्वेवं निषेधो निषेध्यस्य तादर्थ्यमपेक्षते प्राप्तिमात्रापेक्षित्वात् अन्यथा अज्ञानप्रमादादिकृते दोषाभावप्रसंगात् तदेवं समानविषयत्वेन सामान्यशास्त्रस्य विशेषेण बाधान्नास्ति दोषवत्त्वं अतो न त्याज्यमिति नित्यं यज्ञादिकर्म ३ एवं मतभेदमुपन्यस्य स्वमतं कथयितुमाह निश्चयमिति तत्रैवं विप्रतिपन्ने त्यागे निश्चयं मे वचनात् शृणु त्यागस्य लोकप्रसिद्धत्वात् किमत्र श्रोतव्यमिति मावमंस्थाः इत्याह हे पुरुषव्याघ्र पुरुषश्रेष्ठ त्यागोऽयं दुर्बोधः हि यस्मादयं कर्मत्यागस्तत्त्वविद्भिस्तामसादिभेदे

त्रैविध्यं च नियतस्य तु संन्यासः कर्मण इत्यादिना वक्ष्यति प्रथमं तावन्निश्चयमाह यज्ञदानेति द्वाभ्यां मनीषिणां विवेकिनां पावनानि चित्तशुद्धिकराणि ५
येन प्रकारेण कृतान्येतानि पावनानि भवंति तं प्रकारं दर्शयन्नाह एतानीति यानि यज्ञादिकर्माणि मया पावनानीत्युक्तं एतान्येव कर्त्तव्यानि कथं सं
गं कर्तृत्वाभिनिवेशं त्यक्त्वा केवलमीश्वराराधनतया कर्त्तव्यानि फलानि च त्यक्त्वा कर्त्तव्यानीति च निश्चितं मे मतं अत एवोत्तमं ६ प्रतिज्ञातं त्याग
स्य त्रैविध्यमिदानीं दर्शयति नियतस्येति त्रिभिः काम्यस्य कर्मणो बंधकत्वात् संन्यासो युक्तः नियतस्य तु नित्यस्य कर्मणः संन्यासस्त्यागो नोपप

यज्ञदानतपःकर्म न त्याज्यं कार्यमेव तत् यज्ञो दानं तपश्चैव पावनानि मनीषिणां ५ एतान्यपि तु कर्माणि संगं
त्यक्त्वा फलानि च कर्त्तव्यानीति मे पार्थ निश्चितं मतमुत्तमं ६ नियतस्य तु संन्यासः कर्मणो नोपपद्यते मोहा
त्तस्य परित्यागस्तामसः परिकीर्तितः ७ दुःखमित्येव यत्कर्म कायक्लेशभयात्त्यजेत् स कृत्वा राजसं त्यागं नैव
त्यागफलं लभेत् ८ कार्यमित्येव यत्कर्म नियतं क्रियतेऽर्जुन संगं त्यक्त्वा फलं चैव स त्यागः सात्त्विको मतः ९

द्यते सत्वशुद्धिद्वारा मोक्षहेतुत्वात् अतस्तस्य परित्यागमुपादेयमपि त्याज्यमित्येवंलक्षणान्मोहाद्यदि भवेत् स च मोहस्य तामसत्वात्तामसः परिकीर्ति
तः ७ राजसं त्यागमाह दुःखमिति अकर्त्रात्मबोधं विना केवलं दुःखमित्येवं मत्वा शरीरायासभयान्नित्यं कर्म त्यजेदिति यत् तादृशस्त्यागो राज
सः दुःखस्य राजसत्वात् अतस्तं राजसं त्यागं कृत्वा राजसः पुरुषस्त्यागस्य फलं ज्ञाननिष्ठालक्षणं नैव लभेतेत्यर्थः ८ सात्त्विकं त्यागमाह का
र्यमिति कार्यमित्येव कर्त्तव्यमिति बुद्ध्वा नियतं अवश्यकर्त्तव्यतया विहितं कर्म संगं फलं च त्यक्त्वा क्रियते इति यत् तादृशस्त्यागः सात्त्विको मतः ९

कस्तर्हि पश्यति यस्य कर्मलेपो नास्तीत्यपेक्षायामाह यस्येति अहमिति कृतो हं कर्तेत्येवंभूतो भावोऽभिप्रायो यस्य नास्ति यद्वा अहंकृतोऽहंकार स्वभावः स्वाभावकर्तृत्वाभिनिवेशो यस्य नास्ति इन्द्रियाणामेव कर्मकर्तृत्वालोचनादित्यर्थः अत एव यस्य बुद्धिर्न लिप्यते इष्टानिष्टबुद्ध्या कर्मसु न सज्जते स एवंभूतो देहादिव्यतिरिक्तात्मदर्शी इमाँल्लोकान्सर्वानपि प्राणिनः लोकदृष्ट्या हत्वापि विविक्तया स्वदृष्ट्या न हंति न च तत्फलैर्निबध्यते बंधं न प्राप्नोति किं पुनः सत्वशुद्धिद्वारा अपरोक्षत्वादिज्ञानोत्पत्तिहेतुभिः कर्मभिस्तस्य बंधशंकेत्यर्थः तदुक्तं ब्रह्मण्याधाय कर्माणि संगं त्यक्त्वा करोति यः लिप्यते न स पापेन पद्मपत्रमिवांभसेति ॥१७॥ हत्वापि न हंति न निबध्यते इत्येतद्देवोपपादयितुं कर्मचोदनायाः कर्माश्रयस्य च क

यस्य नाहंकृतो भावो बुद्धिर्यस्य न लिप्यते । हत्वापि स इमाँल्लोकान्न हंति न निबध्यते ॥१७॥
ज्ञानं ज्ञेयं परिज्ञाता त्रिविधा कर्मचोदना । करणं कर्म कर्तेति त्रिविधः कर्मसंग्रहः ॥१८॥

र्मफलादीनां च त्रिगुणात्मकत्वात् निर्गुणस्यात्मनस्तत्संबंधो नास्तीत्यभिप्रायेण कर्मचोदनां कर्माश्रयं चाह ज्ञानमिति ज्ञानं इष्टसाधनमिदमिति बोधः ज्ञेयं इष्टसाधनं कर्म परिज्ञाता एवंभूतज्ञानाश्रयः एवं त्रिविधा कर्मचोदना नोद्यते प्रवर्त्यतेऽनयेति चोदना ज्ञानादित्रितयं कर्मप्रवृत्तेर्हेतुरित्यर्थः यद्वा चोदनेति विधिरुच्यते तदुक्तं भट्टैः चोदना चोपदेशश्च विधिश्चैकार्थवाचिन इति ततश्चायमर्थः उक्तलक्षणं त्रिगुणात्मकं ज्ञानादित्रयमवलंब्य कर्मविधिः प्रवर्तत इति तदुक्तं त्रैगुण्यविषया वेदा इति तथा करणं साधकतमं कर्म च कर्तुरीप्सिततमं कर्ता क्रियानिर्वर्तकः कर्म संगृह्यतेऽस्मिन्निति कर्मसंग्रहः करणादित्रिविधं कारकं क्रियाश्रय इत्यर्थः संप्रदानादिकारकत्रयं तु परंपरया क्रियानिर्वर्तकमेव केवलं न तु साक्षात्क्रियाया आश्रयः अतः करणा

ततः किमत आह ज्ञानमिति गुणाः सम्यक् कार्यभेदेन ख्यायंते प्रतिपाद्यंते तस्मिन्निति गुणसंख्यानं सांख्यशास्त्रं तस्मिन् ज्ञानं कर्म च क्रिया कर्त्ता च प्रत्येकं सत्वादिगुणभेदेन त्रिविधैवोच्यते तान्यपि ज्ञानादीनि वक्ष्यमाणानि यथावच्छृणु त्रिविधैवेत्येवकारो गुणत्रयोपाधिव्यतिरेकेणात्मनः स्वतः कर्मादिप्रतिषेधार्थः चतुर्दशेऽध्याये तत्र सत्वं निर्मलत्वादित्यादिगुणानां बंधकत्वप्रकारो निरूपितः सप्तदशेऽध्याये यजंते सात्विका देवानित्यादिना गुणकृतं त्रिविधस्वभावं निरूप्य रजस्तमःस्वभावं परित्यज्य सात्विकाहारादिसेवया सात्विकत्वं संपादनीयमित्युक्तं इह तु क्रियाकारकफलादीनामात्मसंबंधो नास्तीति सर्वेषां त्रिगुणात्मकत्वमुच्यत इति विशेषो ज्ञातव्यः १९ तत्र ज्ञानस्य सात्विकादित्रैविध्यमाह सर्वभूतेष्विति त्रिभिः सर्वभूते

ज्ञानं कर्म च कर्त्ता च त्रिधैव गुणभेदतः प्रोच्यते गुणसंख्याने यथावच्छृणु तान्यपि १९ सर्वभूतेषु येनैकं भावमव्ययमीक्षते अविभक्तं विभक्तेषु तज्ज्ञानं विद्धि सात्विकं २० पृथक्त्वेन तु यज्ज्ञानं नानाभावान्पृथग्विधान् वेत्ति सर्वेषु भूतेषु तज्ज्ञानं विद्धि राजसं २१ यत्तु कृत्स्नवदेकस्मिन्कार्ये सक्तमहैतुकं अतत्वार्थवदल्पं च तत्तामसमुदाहृतं २२

ब्रह्मादिस्थावरांतेषु विभक्तेषु परस्परं व्यावृत्तेष्वविभक्तमनुस्यूतमेकमव्ययं निर्विकारं भावं परमात्मतत्वं येन ज्ञानेनेक्षते आलोचयति तज्ज्ञानं सात्विकं विद्धि २० राजसं ज्ञानमाह पृथक्त्वेनेति पृथक्त्वेन तु यज्ज्ञानमित्यस्यैव विवरणं सर्वेषु भूतेषु देहेषु नानाभावान् वस्तुत एवानेकान् क्षेत्रज्ञान् पृथग्विधान् सुखित्वदुःखित्वादिरूपेण विलक्षणान् येन ज्ञानेन वेत्ति तज्ज्ञानं राजसं विद्धि २१ तामसं ज्ञानमाह यत्त्विति एकस्मिन्कार्ये देहे प्रतिमादौ वा कृत्स्नवत् परिपूर्णवत् सक्तमेतावानेवात्मा ईश्वरो वा इत्यभिनिवेशयुक्तं अहैतुकं निरुपपत्तिकमतत्वार्थवत् परमार्थावलंबनशून्यं अत एवाल्पं तुच्छं अल्पविषयत्वादल्पफलत्वाच्च यदेवंभूतं ज्ञानं तत्तामसमुदाहृतं २२

इदानीं त्रिविधं कर्माह नियतमिति त्रिभिः नियतं नित्यतया विहितं संगरहितमभिनिवेशशून्यं अरागद्वेषतः पुत्रप्रीत्या वा शत्रुद्वेषेण वा कृतं न भवति फलं प्राप्तुमिच्छतीति फलप्रेप्सुः तद्विलक्षणेन निष्कामेण कर्त्रा यत्कृतं कर्म तत्सात्विकमुच्यते २३ किंच यत्त्विति यत्तु कर्म कामेप्सुना फलं प्राप्तुमिच्छता साहंकारेण वा मत्समः कोन्यः श्रोत्रियोऽस्तीति एवं निरूढाहंकारेण वा क्रियते यच्च पुनर्बहुलायासं मतिक्लेशसंयुक्तं तत्कर्म राजसमुदाहृतं २४ किंच अनुबंधमिति अनुबध्यत इत्यनुबंधः पश्चाद्भावि शुभाशुभं क्षयं वित्तव्ययं हिंसां परपीडां पौरुषं स्वसामर्थ्यं अनपेक्ष्य

नियतं संगरहितमरागद्वेषतः कृतं अफलप्रेप्सुना कर्म यत्तत्सात्विकमुच्यते २३ यत्तु कामेप्सुना कर्म साहंकारेण वा पुनः क्रियते बहुलायासं तद्राजसमुदाहृतं २४ अनुबंधं क्षयं हिंसामनपेक्ष्य च पौरुषं मोहादारभ्यते कर्म यत्तत्तामसमुच्यते २५
मुक्तसंगोऽनहंवादी धृत्युत्साहसमन्वितः सिद्ध्यसिद्ध्योर्निर्विकारः कर्त्ता सात्विक उच्यते २६ रागी कर्मफलप्रेप्सुर्लुब्धो हिंसात्मकोऽशुचिः हर्षशोकान्वितः कर्त्ता राजसः परिकीर्तितः २७ अयुक्तः प्राकृतः स्तब्धः शठो नैष्कृतिकोऽलसः विषादी दीर्घसूत्री च कर्त्ता तामस उच्यते २८

अपर्यालोच्य केवलं मोहादेव यत्कर्म आरभ्यते तत्तामसमुदाहृतं २५ कर्त्तारं त्रिविधमाह मुक्तसंग इति त्रिभिः मुक्तसंगस्त्यक्ताभिनिवेशः अनहंवादी गर्वोक्तिरहितः धृतिर्धैर्यं उत्साह उद्यमः ताभ्यां समन्वितो युक्तः प्रारब्धस्य कर्मणः सिद्धावसिद्धौ च निर्विकारो हर्षविषादशून्यः एवंभूतः कर्त्ता सात्विक उच्यते २६ किंच रागीति रागी पुत्रादिप्रीतिमान् कर्मफलप्रेप्सुः कर्मफलकामी लुब्धः परस्वाभिलाषी हिंसात्मको मारकस्वभावः अशुचिर्विहितशौचशून्यः लाभालाभयोर्हर्षशोकाभ्यां समन्वितः कर्त्ता राजसः २७ किंच अयुक्त इति अयुक्तः अनवहितः प्राकृतो विवेकशून्यः स्तब्धोऽनम्रः शठः शक्तिनिगूहनकारी नैष्कृतिकः [illegible]मानी अलसः अनु

यमशीलः विषादी शोकशीलः यच्चाद्योराकार्यं तन्मासेनापि न संपादयति यः स दीर्घसूत्री एवंभूतः कर्त्ता तामसः २८

कर्तृत्रैविध्येन च ज्ञानस्यापि त्रैविध्यं कर्मत्रैविध्येन च ज्ञेयस्यापि त्रैविध्यं बुद्धेस्त्रैविध्येन करणस्याप्युक्तं भविष्यति इदानीं बुद्धेर्धृतेश्च त्रैविध्यं प्रतिजानीते बु
द्धेरिति स्पष्टार्थः २९ तत्र बुद्धेस्त्रैविध्यमाह प्रवृत्तिमिति त्रिभिः प्रवृत्तिं धर्मे निवृत्तिमधर्मे यस्मिन्देशे काले च यत्कार्यमकार्यं च भयाभये कार्याका
र्ये निमित्तावर्थानर्थौ कथं बंधः कथं मोक्ष इति या बुद्धिः अंतःकरणं वेत्ति सा सात्विकी यया पुमान्वेत्तीति वक्तव्ये करणे कर्तृत्वोपचारः काष्ठानि पचंती
तिवत् ३० किंच ययेति अयथावत्संदेहास्पदत्वेनेत्यर्थः स्पष्टमन्यत् ३१ किंच अधर्ममिति विपरीतग्राहिणी बुद्धिस्तामसीत्यर्थः बुद्धिं तः

बुद्धेर्भेदं धृतेश्चैव गुणतस्त्रिविधं शृणु प्रोच्यमानमशेषेण पृथक्त्वेन धनंजय २९ प्रवृत्तिं च निवृत्तिं च कार्याकार्ये भयाभये बंधं
मोक्षं च या वेत्ति बुद्धिः सा पार्थ सात्विकी ३० यया धर्ममधर्मं च कार्यं चाकार्यमेव च अयथावत्प्रजानाति बुद्धिः सा पार्थ राजसी ३१
अधर्मं धर्ममिति या मन्यते तमसावृता सर्वार्थान्विपरीतांश्च बुद्धिः सा पार्थ तामसी ३२ धृत्या यया धारयते मनःप्राणेंद्रियक्रियाः
योगेनाव्यभिचारिण्या धृतिः सा पार्थ सात्विकी ३३ यया तु धर्मकामार्थान्धृत्या धारयतेर्जुन प्रसंगेन फलाकांक्षी धृतिः सा पार्थ राजसी ३४

करणं पूर्वोक्तज्ञानं तु न धृतिः धृतिरपि तद्वृत्तिरेव यद्वा अंतःकरणस्य धर्मिणो बुद्धिरध्यवसायलक्षणा वृत्तिरेव बुद्ध्यादिभ्यो नातद्वृत्तीनां ब
हुत्वेपि धर्माधर्माभिव्यंजनत्वेन प्रधानदेवतासां त्रैविध्यमुक्तं उपलक्षणं चैतत् इत्यासां ३२ इदानीं धृतेस्त्रैविध्यमाह धृत्येति त्रिभिः योगेन चित्तैका
ग्र्येण हेतुनाऽव्यभिचारिण्या विषयांतरमधारयंत्या यया धृत्या मनसः प्राणेंद्रियाणां च क्रियाः धारयते नियच्छति सा धृतिः सात्विकी राजसीं धृ
तिमाह ययेति यया तु धृत्या धर्मार्थकामान्प्राधान्येन धारयते न संचरति तत्प्रसंगेन फलाकांक्षी च भवति सा राजसी धृतिः ३४ श्रीनर्मदायै॰

तामसीं धृतिमाह यथेति दुष्टा अविवेकबहुला मेधा यस्य स दुर्मेधाः पुरुषः यया धृत्या स्वप्नादीन्न मुंचति पुनःपुनरावर्त्तयति सप्नात्रविनिद्रा सा धृतिस्तामसी ३५ सुखस्य त्रैविध्यं प्रतिजानीते सुखमित्यर्द्धेन स्पष्टार्थः ३६ तत्र सात्त्विकं सुखमाह अभ्यासादिति सार्द्धेन यत्र यस्मिन् सुखे अभ्यासादतिपरिचयाद्रमते न तु विषयसुखमिव सहसा रतिं प्राप्नोति यस्मिंश्च रममाणः दुःखांतमवसानं नितरां गच्छति कीदृशं तत् अग्रे प्रथमं विषमिव मनःसंयमाधीनत्वाद्दुःखावहमिव भवति परिणामे त्वमृतसदृशं आत्मविषया बुद्धिस्तस्याः प्रसादो रजस्तमोमलत्यागेन स्वच्छत त्मबुद्धि

यया स्वप्नं भयं शोकं विषादं मदमेव च न विमुंचति दुर्मेधा धृतिः सा पार्थ तामसी ३५ सुखं त्विदानीं त्रिविधं शृणु मे भरतर्षभ अभ्यासाद्रमते यत्र दुःखांतं च निगच्छति ३६ यत्तदग्रे विषमिव परिणामेऽमृतोपमं तत्सुखं सात्त्विकं प्रोक्तमात्मबुद्धिप्रसादजं ३७ विषयेंद्रियसंयोगाद्यत्तदग्रेऽमृतोपमं परिणामे विषमिव तत्सुखं राजसं स्मृतं ३८ यदग्रे चानुबंधे च सुखं मोहनमात्मनः निद्रालस्यप्रमादोत्थं तत्तामसमुदाहृतं ३९ न तदस्ति पृथिव्यां वा दिवि देवेषु वा पुनः सत्त्वं प्रकृतिजैर्मुक्तं यदेभिः स्यात्त्रिभिर्गुणैः ४०

यावस्थानंतरोजातं यत्सुखं तत्सात्त्विकं प्रोक्तं योगिभिः ३७ राजसं सुखमाह विषयेति विषयाणामिंद्रियाणां च संयोगाद्यत्तत्प्रसिद्धं स्त्रीसंयोगादि सुखं अमृतं उपमा यस्य तादृशं भवति अग्रे प्रथमं परिणामे विषोपमं विषतुल्यं इहामुत्र च दुःखहेतुत्वात्तत्सुखं राजसं ३८ तामसं सुखमाह यदग्र इति अग्रे च प्रथमक्षणे अनुबंधे च पश्चादपि यत्सुखं आत्मनो मोहकं तदेवाह निद्रा च आलस्यं च प्रमादश्च कर्तव्यार्थावधानराहित्येन मनोराज्यमेतेभ्यः समुत्तिष्ठति यत्सुखं तत्तामसमुदाहृतं ३९ अनुक्तमपि संग्रहन् प्रकरणार्थमुपसंहरति न तदस्तीति एभिः प्रकृतिसंभवैः सत्त्वादिभिस्त्रिभिर्गुणैः मुक्तं हीनं सत्त्वं प्राणिजातं अन्यद्वा यत्तत् पृथिव्यां मनुष्यलोकादिषु दिवि देवेषु क्वापि नास्तीत्यर्थः ४०

ननु च यद्येवं सर्वमपि क्रियाकारकफलादिकं प्राणिजातं च त्रिगुणात्मकमेव कथं तर्ह्यस्य मोक्ष इत्यपेक्षायां स्वस्वाधिकारविहितैः कर्मभिः प
रमेश्वराराधनात्तत्प्रसादलब्धज्ञानेनेत्येवं सर्वगीतार्थसारं संगृह्य दर्शयितुं प्रकरणांतरमारभते ब्राह्मणेत्यादि यावत्समाप्तिः ब्राह्मणेति ×
हे परंतप शत्रुतापन ब्राह्मणानां क्षत्रियाणां विशां च शूद्राणां च कर्माणि प्रविभक्तानि प्रकर्षेण विभागतो विहितानि शूद्राणां समासात्पृथक्
करणं द्विजत्वाभावेन वैलक्षण्यात् विभागोपलक्षणमाह स्वभावः सात्विकराजसादिः प्रभवति प्रादुर्भवति येभ्य स्तैर्गुणैरुपलक्षणभूतैः
यद्वा स्वभावः पूर्वजन्मसंस्कारस्तस्मात्प्रादुर्भुतैरित्यर्थः सत्वोपसर्जनरजःप्रधानाः क्षत्रियाः तमउपसर्जनरजःप्रधाना वैश्याः रजउपसर्जन

तत्र सत्वप्रधानाः ब्राह्मणाः

ब्राह्मणक्षत्रियविशां शूद्राणां च परंतप कर्माणि प्रविभक्तानि स्वभावप्रभवैर्गुणैः ४१
शमो दमस्तपः शौचं क्षांतिरार्जवमेव च ज्ञानं विज्ञानमास्तिक्यं ब्रह्मकर्म स्वभावजं ४२
शौर्यं तेजो धृतिर्दाक्ष्यं युद्धे चाप्यपलायनं दानमीश्वरभावश्च क्षात्रं कर्म स्वभावजं ४३

तमःप्रधानाः शूद्राः ४१ तत्र ब्राह्मणस्य स्वाभाविकानि कर्माण्याह शम इति शमश्चित्तोपरमः दमो बाह्येंद्रियोपरमः तपः पूर्वोक्तं शारीरा
दि शौचं बाह्याभ्यंतरं क्षांतिः क्षमा आर्जवमवक्रता ज्ञानं शास्त्रीयं विज्ञानमनुभवः आस्तिक्यं आस्ति परलोक इति निश्चयः एतच्छमादि
ब्राह्मणस्य स्वभावजातं कर्म ४२ तत्र क्षत्रियस्य स्वाभाविकं कर्माह शौर्यमिति शौर्यं पराक्रमः तेजः प्रागल्भ्यं धृतिर्धैर्यं दाक्ष्यं कौशलं
युध्ये चाप्यपलायनं अपराङ्मुखता दानमौदार्यं ईश्वरभावो नियमनशक्तिः एतत्क्षत्रियस्य स्वभावजं कर्म ४३ श्रीनर्मदादेव्यै नमः

वैश्यशूद्रयोः कर्माह कृषिरिति कृषिः कर्षणं गोरक्षतीति गोरक्षस्तस्य भावो गोरक्ष्यं पशुपाल्यमित्यर्थः वाणिज्यं क्रयविक्रयादि एतद्वैश्यस्य स्वभावजं क
र्म त्रैवर्णिकपरिचर्यात्मकं शूद्रस्यापि स्वभावजं कर्म ४४ एवंभूतस्य ब्राह्मणादिकर्मणो ज्ञानहेतुत्वमाह स्वे स्व इति स्वस्वाधिकारविहिते कर्मण्यभिरतः
परिनिष्ठितो नरः संसिद्धिं ज्ञानयोग्यतां लभते कर्मणो ज्ञानप्राप्तिप्रकारमाह स्वकर्मेति सार्धेन स्वकर्मपरिनिष्ठितो यथा येन प्रकारेण तत्त्वज्ञानं लभते
तं प्रकारं शृणु तमेवाह यतोऽन्तर्यामिनः परमेश्वराद्भूतानां प्राणिनां प्रवृत्तिश्चेष्टा भवति येन च कारणात्मना सर्वमिदं विश्वं ततं व्याप्तं तमीश्वरं स्व
कर्मणाऽभ्यर्च्य पूजयित्वा सिद्धिं लभते मनुष्यः ४६ स्वकर्मणेति विगुणस्य फलमाह श्रेयानिति विगुणोऽपि स्वधर्मः सम्यगनुष्ठितादपि परधर्माच्छ्रे

कृषिगोरक्ष्यवाणिज्यं वैश्यकर्म स्वभावजं परिचर्यात्मकं कर्म शूद्रस्यापि स्वभावजं ४४ स्वे स्वे कर्मण्यभिरतः
संसिद्धिं लभते नरः स्वकर्मनिरतः सिद्धिं यथा विंदति तच्छृणु ४५ यतः प्रवृत्तिर्भूतानां येन सर्वमिदं ततं स्वक
र्मणा तमभ्यर्च्य सिद्धिं विंदति मानवः ४६ श्रेयान्स्वधर्मो विगुणः परधर्मात्स्वनुष्ठितात् स्वभावनियतं कर्म कुर्व
न्नाप्नोति किल्बिषं ४७ सहजं कर्म कौंतेय सदोषमपि न त्यजेत् सर्वारंभा हि दोषेण धूमेनाग्निरिवावृताः ४८

ष्ठः ननु च बंधुवधादियुक्तात् युद्धादेः स्वधर्माद्भिक्षाटनादिः परधर्मः श्रेष्ठ इति मंतव्यं यतः स्वभावेन प्रवृत्तिकेन नियतं नियमेनोक्तं कर्म कुर्वन् किल्बिषं
नाप्नोति ४७ यदि पुनः सांख्यदृष्ट्या स्वधर्मे हिंसालक्षणं दोषं मत्वा परधर्मं श्रेष्ठं मन्यसे तर्हि सदोषत्वं परधर्मेऽपि तुल्यमित्याशयेनाह सहजमि
ति सहजं स्वभावविहितं कर्म सदोषमपि न त्यजेत् हि यस्मात्सर्वेऽप्यारंभाः दृष्टादृष्टार्थानि सर्वाण्यपि कर्माणि दोषेण केनचिदावृताः व्याप्ताः यथा
सहजेन धूमेनाग्निरावृतस्तद्वत् अतोऽग्नेर्यथा धूमरूपं दोषमपाकृत्य प्रतापः एव तमःशीतादिनिवृत्तये सेव्यते तथापि कर्मणो दोषांशं विहा

ननु च कथं कर्मणि क्रियमाणे दोषान्प्रहाणेन गुणांश एव कर्मणः त्यक्तुं शक्य इत्यपेक्षायामाह असक्तबुद्धिरिति असक्ता संगशून्या बुद्धिर्यस्य जितात्मा
निरहंकारः विगतास्पृहा फलविषया यस्मात्स एवंभूते न सत्त्यागः सात्त्विको भवतीत्येवं द्वयेनोक्तेन कर्मासक्तिफलत्यागलक्षणेन संन्या
सेन नैष्कर्म्यसिद्धिं सर्वकर्मनिवृत्तिलक्षणां सिद्धिं सत्त्वशुद्धिमधिगच्छति यद्यपि संगफलत्यागेन कर्मानुष्ठानमपि नैष्कर्म्यमेव कर्तृत्वा
भिनिवेशाभावात् तदुक्तं नैव किंचित्करोमीति युक्तो मन्येतेत्यादिश्लोकचतुष्टयेन तथाप्यनेनोक्तलक्षणेन संन्यासेन परमां निष्कर्म

असक्तबुद्धिः सर्वत्र जितात्मा विगतस्पृहः नैष्कर्म्यसिद्धिं परमां संन्यासेनाधिगच्छति ४९
सिद्धिं प्राप्तो यथा ब्रह्म तथाप्नोति निबोध मे समासेनैव कौंतेय निष्ठा ज्ञानस्य या परा ५०
बुद्ध्या विशुद्धया युक्तो धृत्यात्मानं नियम्य च शब्दादीन्विषयांस्त्यक्त्वा रागद्वेषौ व्युदस्य च ५१

सिद्धिं सर्वकर्माणि मनसा संन्यस्यास्ते सुखं वशी इत्येवं लक्षणां पारमहंस्यां परमचर्यां प्राप्नोति ४९ एवंभूतस्य परमहंसस्य ज्ञाननिष्ठाप्र
लभावप्रकारमाह सिद्धिं प्राप्त इति षड्भिः नैष्कर्म्यसिद्धिं प्राप्तः सन् यथा येन प्रकारेण ब्रह्म प्राप्नोति तं प्रकारं संक्षेपेणैव मे वचनान्निबोध ५०
तदेवाह बुद्ध्येति उक्तेन प्रकारेण विशुद्धया पूर्वोक्तया सात्त्विकबुद्ध्या युक्तः धृत्या सात्त्विक्या आत्मानं तामेव बुद्धिं नियम्य निश्चलां कृत्वा
शब्दादीन्विषयांस्त्यक्त्वा तद्विषयौ च रागद्वेषौ परित्यज्य व्युदस्य बुद्ध्या विशुद्धया युक्त इत्यादीनां ब्रह्मभूयाय कल्पत इति तृतीयेनान्वयः ५१

किंच विविक्तसेवीति विविक्तसेवी शुचिदेशस्थायी लघ्वाशी मितभोजी एतैरुपायैर्यतवाक्कायमानसः संयतवाक्देहचित्तो भूत्वा नित्यं
सर्वदा ध्यानेन यो योगो ब्रह्मसंस्पर्शस्तत्परः सन् ध्यानाविच्छेदार्थं पुनः पुनर्दृढं वैराग्यं सम्यगुपाश्रितो भूत्वा ५२ किंच अहंकारमिति ×
ततश्च विरक्तो हमित्याद्यहंकारं बलं दुराग्रहं दर्पं योगबलादुन्मार्गप्रवृत्तिलक्षणं प्रारब्धवशात्प्राप्यमाणेष्वपि विषयेषु कामं क्रोधं परि
ग्रहं च विमुच्य ति विशेषेण त्यक्त्वा बलादापन्नेषु च निर्ममः सन् शांतः परमामुपशांतिं प्राप्नोति ब्रह्मभूयाय ब्रह्माहमिति नैश्चल्येनावस्थाना

विविक्तसेवी लघ्वाशी यतवाक्कायमानसः ध्यानयोगपरो नित्यं वैराग्यं समुपाश्रितः ५२ अहंकारं बलं
दर्पं कामं क्रोधं परिग्रहं विमुच्य निर्ममः शांतो ब्रह्मभूयाय कल्पते ५३ ब्रह्मभूतः प्रसन्नात्मा न शोचति न कांक्षति समः
सर्वेषु भूतेषु मद्भक्तिं लभते परां ५४ भक्त्या मामभिजानाति यावान्यश्चास्मि तत्त्वतः ततो मां तत्त्वतो ज्ञात्वा विशते तदनंतरं ५५

य कल्पते योग्यो भवति ५३ ब्रह्माहमिति एवं नैश्चल्येनावस्थानस्य फलमाह ब्रह्मभूत इति ब्रह्मभूतो ब्रह्मण्यवस्थितः प्रसन्नचित्तो नष्टं
न शोचति न चाप्राप्तं कांक्षति देहाद्यभिमानाभावात् अत एव सर्वेष्वपि भूतेषु समः सन् रागद्वेषादिकृतविक्षेपाभावात् सर्वभूतेषु मद्भा
वलक्षणां परां मद्भक्तिं लभते ५४ ततश्च भक्तेति तया च परया भक्त्या तत्त्वतो मामभिजानाति कथंभूतं यावान् सर्वव्यापिनं परमेश्वरं स
च्चिदानंदघनस्तथाभूतं ततश्च मामेव तत्त्वतो ज्ञात्वा तदनंतरं तस्य ज्ञानस्योपरमे सति परमानंदरूपो भवतीत्यर्थः ५५ ७७

स्वकर्मभिः परमेश्वराराधनमुक्तं मोक्षप्रकारमुपसंहरति सर्वेति सर्वाणि नित्यनैमित्तिकानि च काम्यानि च कर्माणि दृवौक्तक्रमेण मद्व्यपाश्रयः
सन् कर्म कुर्वाणः अहमेव व्यपाश्रयः आश्रयणीयो न तु स्वर्गादि फलं यस्य सः मम प्रसादाच्छाश्वतं अनाद्यव्ययं नित्यं सर्वोत्कृष्टं पदं प्राप्नोति ५६
यस्मादेवं तस्मात् चेतसेति सर्वकर्माणि चेतसा मयि संन्यस्य समर्प्य मत्परः अहमेव परः प्राप्यः पुरुषार्थो यस्य सः व्यवसायात्मिकया बुद्ध्या यो-
गमाश्रित्य सततं कर्मानुष्ठानकालेऽपि ब्रह्मार्पणं ब्रह्म हविरित्यादिन्यायेन मय्येव चित्तं यस्य तथाभूतो भव ५७ ततो यद्भविष्यति तच्छृणु मच्चि-
मच्चित्त इति

सर्वकर्माण्यपि सदा कुर्वाणो मद्व्यपाश्रयः मत्प्रसादादवाप्नोति शाश्वतं पदमव्ययं ५६ चेतसा सर्वकर्माणि मयि
संन्यस्य मत्परः बुद्धियोगमुपाश्रित्य मच्चित्तः सततं भव ५७ मच्चित्तः सर्वदुर्गाणि मत्प्रसादात्तरिष्यसि अथ चेत्त्वम
हंकारान्न श्रोष्यसि विनंक्ष्यसि ५८ यदहंकारमाश्रित्य न योत्स्य इति मन्यसे मिथ्यैष व्यवसायस्ते प्रकृतिस्त्वां नियोक्ष्यति ५९

तः सन् मत्प्रसादात्सर्वाणि दुर्गाणि दुस्तराणि सांसारिकाणि दुःखानि तरिष्यसि विपक्षे दोषमाह अथ चेद्यदि पुनस्त्वमहंकारात् ज्ञातृत्वा-
भिमानान्मदुक्तमेतन्न श्रोष्यसि तर्हि विनंक्ष्यसि पुरुषार्थाद्भ्रश्यसे ५८ कामं विनंक्ष्यामि न तु बंधुभिर्युद्धं करिष्यामीति चेत्तत्राह यदहमिति
यदुक्तमनादृत्य केवलमहंकारमवलंब्य युद्धं न करिष्यामीति मन्यसे यत् अध्यवस्यसि एष ते व्यवसायो मिथ्यैव अस्वतंत्रत्वान्नदेवाहः।
प्रकृतिस्त्वां रजोगुणरूपेण परिणता सती नियोक्ष्यति युद्धे प्रवर्तयिष्यत्येव ५९ ॥ श्रीपुराणपुरुषोत्तमाय नमः ॥ ॥ ॥

भ०गी०टी०
२४

किंच स्वभावजेति स्वभावः क्षत्रियत्वहेतुः पूर्वकर्मसंस्कारस्तस्माज्जातेन स्वकीयेन कर्मणा शौर्यादिना पूर्वोक्तेन निबद्धो यंत्रितस्त्वं मोहाद्य
कर्त् त्कर्त्तुं युद्धलक्षणं कर्तुं नेच्छसि अवशोपि तत्कर्म करिष्यस्येव तदेवश्लोकद्वयेन सांख्यादिमतेन प्रकृतिपारतंत्र्यं कर्मपारतंत्र्यं चोक्तं ६० इदानीं स्व
मतमाह सर्वभूतानां हृदयमध्ये ईश्वरोंऽतर्यामी तिष्ठति किं कुर्वन् सर्वाणि भूतानि मायया निजशक्त्या भ्रामयन् तत्तत्कर्मसु प्रवर्तयन् यथा दारुयं
त्रमारूढानि कृत्रिमाणि भूतानि कुंभकारो लोके भ्रामयति तद्वदित्यर्थः यद्वा यंत्राणि शरीराण्यारूढानि भूतानि देहाभिमानिनो जीवान् भ्राम

स्वभावजेन कौंतेय निबद्धः स्वेन कर्मणा कर्त्तुं नेच्छसि यन्मोहात्करिष्यस्यवशोपि तत् ६०
ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति भ्रामयन् सर्वभूतानि यंत्रारूढानि मायया ६१
तमेव शरणं गच्छ सर्वभावेन भारत तत्प्रसादात्परां शांतिं स्थानं प्राप्स्यसि शाश्वतम् ६२

यन्नित्यर्थः तथा च श्वेताश्वतराणां मंत्रः एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतांतरात्मा कर्माध्यक्षः सर्वभूताधिवासः साक्षी चेता के
वलो निर्गुणश्चेति अंतर्यामिब्राह्मणं च य आत्मनि तिष्ठन्नात्मनोंऽतरो यं आत्मा न वेद यस्यात्मा शरीरं य आत्मानमंतरो यमयति स त आ
त्मांतर्याम्यमृत इत्यादि ६१ यस्मादेवं सर्वे जीवाः परमेश्वरपरतंत्रास्तस्मात् तस्मात्त्वमहंकारं परित्यज्य सर्वभावेन सर्वात्मना तमीश्वर
मेव शरणं गच्छ तिष्ठत तश्च तस्यैव प्रसादात्परमामुपशांतिं स्थानं च पारमेश्वरं नित्यं प्राप्स्यसि ६२ श्रीगोपालकृष्णायनमः ६५ ५

श्री:
२४

तमेवेति २

सर्वगीतार्थमुपसंहरन्नाह इतीति इत्यनेन प्रकारेण ते तुभ्यं सर्वज्ञेन परमकारुणिकेन मया ज्ञानमाख्यातमुपदिष्टं कथंभूतं गुह्याद्गोप्याद्गुह्य
स्यमंत्रयोगादिज्ञानादपि गुह्यतरमेवं मयोपदिष्टं गीताशास्त्रमशेषतो विमृश्य पर्यालोच्य यथेच्छसि तथा कुरु एतस्मिन्पर्यालोचिते
सति न ते मोहो भविष्यतीति भावः ६३ अतिगंभीरं गीताशास्त्रमशेषतः पर्यालोचयितुमशक्तं तं उपायस्य रूपमेव तस्य सारं संग्र
ह्य कथयति सर्वगुह्यतममिति त्रिभिः सर्वेभ्यो गुह्येभ्यो गुह्यतमं मम वचस्तत्र तत्रोक्तमपि भूयः पुनरपि वक्ष्यमाणं शृणु पुनःपुनः कथने हेतु
माह इष्टमत्यंतं मे त्वमिष्टोसि प्रियोसीति मत्वा अतएव हेतोस्ते हितं वक्ष्यामि यद्वा त्वं दृष्टोसि मया वक्ष्यमाणं च दृढं सर्वप्रमाणोपेतमिति नि

इति ते ज्ञानमाख्यातं गुह्याद्गुह्यतरं मया विमृश्यैतदशेषेण यथेच्छसि तथा कुरु ६३ सर्वगुह्यतमं भूयः शृणु मे
परमं वचः इष्टोसि मे दृढमिति ततो वक्ष्यामि ते हितं ६४ मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु मामेवैष्यसि स
त्यं ते प्रतिजाने प्रियोसि मे ६५ सर्वधर्मान्परित्यज्य मामेकं शरणं व्रज अहं त्वां सर्वपापेभ्यो मोक्षयिष्यामि मा शुच ६६

श्चितस्य ततस्ते वक्ष्यामीत्यर्थः इष्टमतिरिति केचित्पठंति ६४ तदेवाह मन्मनाइति मन्मना मच्चित्तो भव ममैव भक्तो भव मद्याजी मद्यजनशीलो
भव मामेव नमस्कुरु एवं वर्तमानस्त्वं मत्प्रसादाल्लब्धज्ञानेन मामेवैष्यसि प्राप्स्यसि अत्र संशयं मा कार्षीः त्वं हि मे प्रियोसि अतः सत्यं यथा
भवत्येवं तुभ्यमहं प्रतिजाने प्रतिज्ञां करोमि ६५ ततोपि गुह्यतममाह सर्वधर्मानिति मद्भक्त्यैव सर्वं भविष्यतीति दृढविश्वासेन विधिकैंकर्यं त्यक्त्वा म
देकनिष्ठो भव एवं वर्तमानः कर्मत्यागनिमित्तं पापं यत्स्यादिति मा शुचः शोकं मा कार्षीः यतस्त्वां मदेकशरणं सर्वपापेभ्योऽहं मोचयिष्यामि ६६

ततोऽपि दुःखितं मामाह सर्वधर्मानिति ६६ एवं गीतार्थं तत्समुपदिश्य तत्संप्रदायप्रवर्त्तने नियममाह इदमिति इदं गीताशास्त्रं ते त्वया अतपस्काय स्वधर्मानुष्ठानहीनाय न वाच्यं न चाभक्ताय गुरावीश्वरे च भक्तिशून्याय कदाचिदपि न वाच्यं न चाशुश्रूषवे परिचर्यामकुर्वते श्रोतुमनिच्छते च न वाच्यं मां परमेश्वरं योऽभ्यसूयति मनुष्यदृष्ट्या दोषारोपणेन निंदति तस्मै न वाच्यं एतैर्दोषैर्विरहितेभ्यो भक्तेभ्यो गीताशास्त्रोपदेष्टुः फलमाह य इदमिति॥ भक्तेषु मद्भक्तेभ्यो योऽभिधास्यति स मयि परां भक्तिं करोति ततो निःसंशयः सन्मामेव प्राप्नोतीत्यर्थः ६८ किंच न चेति तस्मान्मद्भक्तेभ्यो गीताशास्त्रव्याख्यातुः सकाशादन्यो मनुष्येषु मध्ये न कश्चिदपि मम प्रियकृत्तमः अत्यन्तपरितोषकर्त्ता नास्ति न च कालांतरे भविता भविष्यति समामपि तस्माद-

इदं ते नातपस्काय नाभक्ताय कदाचन न चाशुश्रूषवे वाच्यं न च मां योऽभ्यसूयति ६७ य इदं परमं गुह्यं मद्भक्तेष्वभिधास्यति भक्तिं मयि परां कृत्वा मामेवैष्यत्यसंशयः ६८ न च तस्मान्मनुष्येषु कश्चिन्मे प्रियकृत्तमः भविता न च मे तस्मादन्यः प्रियतरो भुवि ६९ अध्येष्यते च य इमं धर्म्यं संवादमावयोः ज्ञानयज्ञेन तेनाहमिष्टः स्यामिति मे मतिः ७०

न्यः प्रियतरोऽधुनाऽपि वितावन्नास्ति न च कालांतरे भविता भविष्यतीत्यर्थः ६९ पठतः फलमाह अध्येष्यत इति आवयोः श्रीकृष्णार्जुनयोरिमं धर्म्यं धर्मादनपेतं संवादं योऽध्येष्यते जपरूपेणाध्यापयिष्यति तेन पुंसा सर्वयज्ञेभ्यः श्रेष्ठेन ज्ञानयज्ञेनाहमिष्टः स्यां भवेयमिति मे मतिरिति यद्यपि गीतामध्यमान एव केवलं जपति तथापि मम ततः श्रवणतो मामेवासौ प्रकाशयतीति बुद्धिर्भवतीति तथा लोके यदृच्छयापि यदा कश्चित्कस्य नाम गृह्णाति तदासौ मामाह्वयतीति मत्वा तत्पार्श्वमागच्छति तथाहमपि तस्य संनिहितो भवेयं अत एव अजामिलक्षत्रबंधुप्रमुखानां कथंचिन्नामोच्चारणमात्रेण प्रसन्नोऽस्मि

अन्यस्य जपतो योऽन्यः कश्चिच्छृणोति तस्यापि फलमाह श्रद्धावानिति योनरः श्रद्धायुक्तः केवलं शृणुयादपि श्रद्धावानपि कश्चित्तु किमर्थमय
मुच्चैर्जपतीति अबहुजपतीति वा दोषदृष्टिं करोति तन्नाद्रत्यर्थमाह अनसूयश्च असूयारहितश्च यः शृणुयात् सोपि पापैर्विमुक्तः शुभाश्च
मेधादिपुण्यकृतांल्लोकान्प्राप्नुयात् ७१ सम्यग्बोधानुपपत्तौ पुनरुपदेक्ष्यामीत्याशयेन श्रीभगवानुवाच कच्चिदिति कच्चिदिति प्रश्नार्थे अज्ञा
नसंमोह तत्त्वाज्ञानकृतो विपर्ययश्च स प्रनष्टः ७२ कृतार्थः सन्नर्जुन उवाच नष्टइति आत्मविषयमोहो नष्टः गतः अपगतः संदेहो यस्मा

श्रद्धावाननसूयश्च शृणुयादपि यो नरः सोपि मुक्तः शुभाँल्लोकान्प्राप्नुयात्पुण्यकर्मणां ७१ श्रीभगवानुवाच
कच्चिदेतच्छ्रुतं पार्थ त्वयैकाग्रेण चेतसा कच्चिदज्ञानसंमोहः प्रणष्टस्ते धनंजय ७२ अर्जुन उवाच नष्टो मोहः स्मृतिर्लब्धा
त्वत्प्रसादान्मयाच्युत स्थितोस्मि गतसंदेहः करिष्ये वचनं तव ७३ संजय उवाच इत्यहं वासुदेवस्य पार्थस्य च महात्मनः संवाद
मिममश्रौषमद्भुतं रोमहर्षणं ७४ व्यासप्रसादाच्छ्रुतवानेतद्गुह्यमहं परं योगं योगेश्वरात्कृष्णात्साक्षात्कथयतः स्वयं ७५

दपि यमहमस्मीति स्वरूपानुसंधानरूपा स्मृतिर्लब्धा अतः स्थितोस्मि युद्धायोपस्थितोस्मि यतोधर्मविषयः संदेहो यस्य सोहं तव आज्ञां करिष्यामी
ति ७३ तदेवं धृतराष्ट्रं प्रति श्रीकृष्णार्जुनसंवादं कथयित्वा प्रस्तुतं कथामनुसंधानः संजय उवाच इतीति मे सहर्षदो मांचकं संवादमश्रौषं श्रुतवा
नहं स्पष्टमन्यत् ७४ आत्मनः श्रवणे संभावनामाह व्यासप्रसादादिति भगवता व्यासेन दिव्यं चक्षुः श्रोत्रादि मह्यं दत्तं अतो व्यासस्य प्रसादेनतद
हं श्रुतवानस्मि किं तदित्यपेक्षायामाह परं योगं परतत्त्वमाविष्करोति योगेश्वरात्कृष्णात्स्वयमेव साक्षात्कथयतः श्रुतवानिति ७५ ७

किंच राजन्निति हृष्यामि रोमांचितो भवामि हर्षं प्राप्नोस्मीति वा ७६ किंच तच्चेति विश्वरूपं निर्दिशति स्पष्टमन्यत् ७७ अतस्त्वं पुत्राणां राज्या
दिकं कां परित्यजेत्याशयेनाह यत्रेति यत्र येषां पक्षे योगमायेश्वरः श्रीकृष्णः वर्तते यत्र च पार्थो गांडीवधनुर्धरः तत्रैव श्रीः राज्यलक्ष्मीः तत्रैव वि
जयः तत्रैव भूतिरुत्तरोत्तराभिवृद्धिश्च नीतिर्न्यायोपि तत्रैव ध्रुवा निश्चितेति सर्वत्र संबध्यते इति मम मतिर्निश्चयः अतइदानीमपि तावत्स
पुत्रस्त्वं श्रीकृष्णं शरणमुपेत्य पांडवान्प्रसाद्य सर्वस्वं तेभ्यो निवेद्य पुत्रप्राणरक्षणं कुर्विति भावः भगवद्भक्तिप्रवर्तकस्य तत्प्रसादात्मबोधतः स्फुटं

राजन्संस्मृत्य संस्मृत्य संवादमिममद्भुतं केशवार्जुनयोः पुण्यं हृष्यामि च मुहुर्मुहुः ७६ तच्च संस्मृत्य संस्मृत्य रूप
मत्यद्भुतं हरेः विस्मयो मे महान्राजन्हृष्यामि च पुनः पुनः ७७ यत्र योगेश्वरः कृष्णो यत्र पार्थो धनुर्धरः तत्र श्रीर्विज
यो भूतिर्ध्रुवा नीतिर्मतिर्मम ७८ ७९ ॐ हरिः ॐ तत्सदिति श्रीमन्महाभारते शतसाहस्र्यां संहितायां वैयासिक्यां
भीष्मपर्वणि श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे मोक्षसंन्यासयोगो नाम अष्टादशोध्यायः १८

बंधविमुक्तिः स्यादिति गीतार्थसंग्रहः तथाहि पुरुषः स परः पार्थ भक्त्येति भक्त्या त्वनन्यया शक्य अहमेवंविधोर्जुनेत्यादौ भगवद्भक्तेर्मोक्षं प्रति
साधकतमत्वश्रवणात् तेषां सततयुक्तानामिति मद्भक्त एतद्विज्ञायेति च मद्भावायोपपद्यत इति मोक्षनिर्देशात् तदेकांतभक्तिरेव तत्प्रसादात्मज्ञा
नावांतरव्यापारयुक्ता मोक्षहेतुरिति स्फुटं प्रतीयते ज्ञानस्य भक्त्यवांतरव्यापारत्वमेवयुक्तं तेषां सततयुक्तानां भजतामित्युक्तत्वात् मद्भक्त

एतद्वितीयेतीत्यादिवचनात् न च ज्ञानमेव भक्तिरित्युक्तं समः सर्वेषु भूतेषु मद्भक्तिं लभते परां इत्यादौ भेदनिर्देशात् न चैवं सति तमेव विदित्वा
ति मृत्युमेति नान्यः पंथा विद्यतेऽयनायेत्यादिश्रुतिविरोधः शंकनीयः भक्तेरेवांतरव्यापारत्वात् ज्ञानस्य न हि काष्ठैः पचतीत्युक्ते ज्वालाना
म साधनत्वमुक्तं भवति यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ तस्यैते कथिता ह्यर्थाः प्रकाशंते महात्मनः देहांते देवः परं ब्रह्म तार
कं व्याचष्टे यमेवैष वृणुते तेन लभ्य इत्यादिश्रुतिपुराणवचनानि एवं सति समंजसानि भवंति तस्माद्भगवद्भक्तिरेव मोक्षहेतुरिति सिद्धं
तेनैव दत्तया मत्या तद्गीता विवृतिः कृता सएव परमानंदस्तया प्रीयतां माधवः १ श्रीमत्परमानंदपादाब्जरजःश्रीधारिणाकृता श्री
धरस्वामियतिना कृता गीतासुबोधिनी २ सप्रागल्भ्यवरा इद्द्विलोड्य भगवद्गीतामतांतर्गतं तत्त्वं प्रेप्सुरुपैति कं गुरुकृपापीयूषदृ
ष्टिं विना अंबुस्वांजलिना निरस्य जलधेराद्दिस्सुरन्तर्मणीन्नावेत्तेषु च किन्निमज्जन्निजनः सत्कर्णधारं विना ३ इति श्रीमत्प
रमहंसपरिव्राजकाचार्यश्रीधरस्वामिविरचितायां भगवद्गीताटीकायां सुबोधिन्यां मोक्षसंन्यासयोगो नामअष्टादशोऽध्यायः १८

इति श्रीभगवद्गीताटीका श्रीधरी समाप्तः ॥ पत्रसंख्या ॥ ८७ ॥

[OrderDescription]
,CREATED=17.02.20 15:44
,TRANSFERRED=2020/02/17 at 16:17:51
,PAGES=193
,TYPE=STD
,NAME=S0002843
,Book Name=M-2689-BHAGWATGEETA TIKA
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF

FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF

FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF
,FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF

FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
,FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF
,FILE67=00000067.TIF
,FILE68=00000068.TIF
,FILE69=00000069.TIF
,FILE70=00000070.TIF
,FILE71=00000071.TIF

FILE72=00000072.TIF
,FILE73=00000073.TIF
,FILE74=00000074.TIF
,FILE75=00000075.TIF
,FILE76=00000076.TIF
,FILE77=00000077.TIF
,FILE78=00000078.TIF
,FILE79=00000079.TIF
,FILE80=00000080.TIF
,FILE81=00000081.TIF
,FILE82=00000082.TIF
,FILE83=00000083.TIF
,FILE84=00000084.TIF
,FILE85=00000085.TIF
,FILE86=00000086.TIF
,FILE87=00000087.TIF
,FILE88=00000088.TIF
,FILE89=00000089.TIF
,FILE90=00000090.TIF
,FILE91=00000091.TIF

FILE92=00000092.TIF
,FILE93=00000093.TIF
,FILE94=00000094.TIF
,FILE95=00000095.TIF
,FILE96=00000096.TIF
,FILE97=00000097.TIF
,FILE98=00000098.TIF
,FILE99=00000099.TIF
,FILE100=00000100.TIF
,FILE101=00000101.TIF
,FILE102=00000102.TIF
,FILE103=00000103.TIF
,FILE104=00000104.TIF
,FILE105=00000105.TIF
,FILE106=00000106.TIF
,FILE107=00000107.TIF
,FILE108=00000108.TIF
,FILE109=00000109.TIF
,FILE110=00000110.TIF
,FILE111=00000111.TIF

FILE112=00000112.TIF
,FILE113=00000113.TIF
,FILE114=00000114.TIF
,FILE115=00000115.TIF
,FILE116=00000116.TIF
,FILE117=00000117.TIF
,FILE118=00000118.TIF
,FILE119=00000119.TIF
,FILE120=00000120.TIF
,FILE121=00000121.TIF
,FILE122=00000122.TIF
,FILE123=00000123.TIF
,FILE124=00000124.TIF
,FILE125=00000125.TIF
,FILE126=00000126.TIF
,FILE127=00000127.TIF
,FILE128=00000128.TIF
,FILE129=00000129.TIF
,FILE130=00000130.TIF
,FILE131=00000131.TIF

FILE132=00000132.TIF
,FILE133=00000133.TIF
,FILE134=00000134.TIF
,FILE135=00000135.TIF
,FILE136=00000136.TIF
,FILE137=00000137.TIF
,FILE138=00000138.TIF
,FILE139=00000139.TIF
,FILE140=00000140.TIF
,FILE141=00000141.TIF
,FILE142=00000142.TIF
,FILE143=00000143.TIF
,FILE144=00000144.TIF
,FILE145=00000145.TIF
,FILE146=00000146.TIF
,FILE147=00000147.TIF
,FILE148=00000148.TIF
,FILE149=00000149.TIF
,FILE150=00000150.TIF
,FILE151=00000151.TIF

FILE152=00000152.TIF
,FILE153=00000153.TIF
,FILE154=00000154.TIF
,FILE155=00000155.TIF
,FILE156=00000156.TIF
,FILE157=00000157.TIF
,FILE158=00000158.TIF
,FILE159=00000159.TIF
,FILE160=00000160.TIF
,FILE161=00000161.TIF
,FILE162=00000162.TIF
,FILE163=00000163.TIF
,FILE164=00000164.TIF
,FILE165=00000165.TIF
,FILE166=00000166.TIF
,FILE167=00000167.TIF
,FILE168=00000168.TIF
,FILE169=00000169.TIF
,FILE170=00000170.TIF
,FILE171=00000171.TIF

FILE172=00000172.TIF
,FILE173=00000173.TIF
,FILE174=00000174.TIF
,FILE175=00000175.TIF
,FILE176=00000176.TIF
,FILE177=00000177.TIF
,FILE178=00000178.TIF
,FILE179=00000179.TIF
,FILE180=00000180.TIF
,FILE181=00000181.TIF
,FILE182=00000182.TIF
,FILE183=00000183.TIF
,FILE184=00000184.TIF
,FILE185=00000185.TIF
,FILE186=00000186.TIF
,FILE187=00000187.TIF
,FILE188=00000188.TIF
,FILE189=00000189.TIF
,FILE190=00000190.TIF
,FILE191=00000191.TIF

FILE192=00000192.TIF
,FILE193=00000193.TIF
,